1st Elective
Phalita Jyotisha

Sastri IInd Year
Part : II, Paper - 2

# BṚHAJJĀTAKAM

*(11-25 Adhyāyāḥ)*


## Directorate of Distance Education

Rashtriya Sanskrit Vidyapeetha
Accredited at 'A' level by NAAC
Tirupati - 517 507 (A.P.)

# चन्द्रयोगाध्यायः।

**उद्देश्यम्-**

अस्य पाठस्यास्य अध्ययनेन भवान् अधोलिखितेषु विषयेषु निपुणः भविष्यति।

☞ केन्द्रे पणफरापोक्लीमस्थे चन्द्रे जातस्य स्वरूपज्ञानं पठिष्यति।

☞ अधियोगः अध्येष्यति।

☞ सुनफानफदुरधुराः योगाः ज्ञास्यति।

---

## केन्द्रे पणफरापोक्लीमस्थे चन्द्रे जातस्य स्वरूपम्।

यस्य जन्मसमये आपोक्लीमस्थः चन्द्रः भवति तस्य विनयादीनि वरिष्ठानि भवन्ति। यस्य अहनि जन्म भवति, चन्द्रश्च यस्मिन् तस्मिन् राशौ स्वनवांशकस्थोभवति, स्वस्य अधिमित्रांशकस्थे स्थितो वा सुरगुरुणा, जीवेन दृष्टः, तदा सः पुरुषो वित्तवान् सुखी च भवति। अथ यस्य निशि रात्रौ जन्म भवति, चन्द्रमाः स्वनवांशकस्थो अधिमित्रनवांशकस्थो वा भवति, शुक्रेण दृश्यते, तदा जातो वित्तवान् सुखी च भवति।

**अधमसमवरिष्ठान्यर्ककेन्द्रादि संस्थे शशिनि विनयवित्तज्ञानधीनैपुणानि।**

**अहनि निशि च चन्द्रे स्वे अधिमित्रांशके वा सुरगुरुसितदृष्टे वित्तवान् स्यात् सुखी च।।१।।**

**अन्वयः**=विनयो वित्तं, ज्ञानं, धीः, सूक्ष्मदर्शित्वम्, अर्का केन्द्रादिसंस्थे शशिनि चन्द्रे जातस्य विनयवित्तज्ञानधीनैपुणानि अधमसमवरिष्ठानि भवन्ति।

**अन्वायार्थः**=विनयो= नीतिः सुशीलता, वित्तं= धनं, ज्ञानं= विज्ञानं शास्त्रज्ञानबोधः, धीः=नैपुण्यं कार्येषु, सूक्ष्मदर्शित्वम्, अर्कादित्यात् केन्द्रादिसंस्थे केन्द्रपणफरापोक्लीमसंस्थे शशिनि चन्द्रे जातस्य विनयवित्तज्ञानधीनैपुणानि अधमसमवरिष्ठानि=निकृष्टमध्यमोत्तमानि भवन्ति। यस्य आदित्यात् जन्मनि केन्द्रस्थ चन्द्रमा भवति तस्यैतानि विनयादीनि अधमानि भवन्ति। यस्य जन्मसमये पणफरस्थः चन्द्रः

मध्यमानि भवन्ति।यस्य आदित्यात् जन्मनि केन्द्रस्थ चन्द्रमा भवति तस्यैतानि विनयादीनि अधमानि भवन्ति। यस्य जन्मसमये पणफरस्थः चन्द्रः मध्यमानि भवन्ति।

-अथाधियोगाख्यं योगम्-

षष्ठे राशौ यदा सर्वे सौम्यग्रहाः भवन्ति तदैकःअधियोगः भवति। सप्तमे राशौ यदा सर्वे ग्रहाः भवन्तिततदा द्वितीयः अधियोगः भवति। एवं अष्टमे तृतीयः। षष्टामयोः चतुर्थः। षष्ठाष्टमयोः पञ्चमः। सप्तमाष्टमयोः पञ्चमः। सप्तमाष्टमयोः षष्ठः। षष्ठसप्तमाष्टमेषु सप्तम इति। एवमेवं स्थितेषु सौम्येषु अधियोगः। अर्थात् एव एवम् अवस्थितेषु पापैः पापः। मिश्रैः मिश्रः।

**अवबोधप्रश्नः**

1. अधियोगः कथं भवति?

**-अधियोगजातानां फलम्-**

अधियोगे जाताः चमूपः अर्थात् सेनापतिः भवति। सचिवो भवति। क्षितिपालो भवति। तेषां युगपद् सम्भवात् पृथकत्वं व्याख्यातम्।

**सौम्यैः स्मरारिनिधनेष्वधियोगेन्दोस्तस्मिंश्चमूपसचिवक्षितिपालजन्म ।**

**सम्पन्नसौख्यविभवाहतशत्रवश्च दीर्घायुषो विगतरोगभयाश्च जाताः ।। २।।**

**अन्वयः**=इन्दोः सौम्यैः स्मरारिनिधनेषुअधियोगाख्योस्तस्मिंश्चमूपसचिवक्षितिपालजन्म ।

सम्पन्नसौख्यविभवा हतशत्रवश्च दीर्घायुषो विगतरोगभयाश्च जाताः ।। २।।

**अन्वयार्थः**=इन्दोः=चन्द्रात्, सौम्यैः बुधगुरुसितैः स्मरारिनिधनेषु=सप्तमषष्ठामेषु त्रिषु स्थानेषु द्वयोः वा स्थानयोः एकस्मिन् वा स्थाने सर्वं एव भवन्ति, तदधियोगाख्यो योगो व्याख्याता भवति। अत्र कैश्चित् षष्ठ-सप्तम-अष्टमानां स्थानानां सौम्यग्रहत्रयस्य अवस्थानादशून्यतायाम् अधियोगो व्याख्यातः।

**अवबोधप्रश्नः**

2. अधियोगजातानां फलम् व्याख्यात।

**-सुनफानफादुरुधुराःयोगाः-**

**हित्वार्कं सुनफानफादुरुधुराः स्वान्त्योभयस्थैर्ग्रहैः।**

**शीतांशोः कथितोऽन्यथा तु बहुभिः केमद्रुमोऽन्यैस्त्वसौ।।**

**केन्द्रे शीतकरेऽथ वा ग्रहयुते केमद्रुमो नेष्यते।**

**केचित् केन्द्रनवांशकेषु च वदन्त्युक्तिः प्रसिद्धा न ते ।। ३।।**

आदित्यम् हित्वा अन्यः कश्चिद् ग्रहः भौमादयः, शीतांशोः चन्द्रात् स्वान्त्योभयस्थो भवति। द्वितीयद्वादशस्थौ वा द्वौ भवतःतदा सुनफा अनफा दुरधुराख्यं योगत्रयं भवति। अर्कं हित्वा यदा अन्यो ग्रहः कश्चिद् चन्द्रात् द्वितीयस्थाने भवति, तदा सुनफा नाम योगो भवति। अर्कं वर्जयित्वा चन्द्रात् द्वादशे कश्चिद् ग्रहो भवति तदा अनफा नाम योगो भवति। एवम् अर्कं वर्जयित्वा चन्द्रात् द्वितीयद्वादशगौ ग्रहो भवतःतदा दुरधुरा नाम योगो भवति।अत्र योगत्रयोपि आदित्यो द्वितीये द्वादशे वा स्थाने भवति तदा न योगभङ्गकृद् भवति। किन्तु योगकर्तृणां मध्ये न गण्यते। एतदुक्तं भवति। आदित्यो द्वितीये द्वादशे स्थाने वा भवतु, मा भवतु, वा भौमादि तत्रस्थो यथा दर्शितयोगकर्ता भवति। एते योगाः बहुभिः आचार्यैः पाठिताः अन्यथा केमद्रुम उक्तः। अस्माद् योगत्रयात् एकोपि योगो न भवति, तदा केमद्रुमाख्यो योगो भवति। एतदुक्तं भवति। भौमादीनां केन्द्रे शीतकरे अथवा ग्रहयुते केमद्रुमो नेष्यते। अन्येषां गर्गादीनाम् एवं मतम्।

**अवबोधप्रश्नः**

3. सुनफानदुरुधुराः योगानां व्याख्यात।

**अपवादः-**

केन्द्रे जन्मलग्ने केन्द्रे शीतकरे चन्द्रे वा भौमादिग्रहयुते, भौमादिग्रहविरहितयोः अपि, चन्द्रात् द्वितीयद्वादशस्थानयोः, केमद्रुमो न भवति। केन्द्रे ग्रहयुत इत्यत्र कैश्चित् केन्द्रमेव केवलं व्याख्यातम्। तच्च अयुक्तम्। चन्द्रकेन्द्रे ग्रहयुते, योगो अन्तर्भवति।

**।।सुनफयोगभेदाः।।**

एकत्रिंशत् सुनफाख्या योगाः भवन्ति। तावन्तः एव अनफाख्याः भवन्ति। षष्ठित्रयम् अशीत्यधिकं शतं दुरुधुराप्रभेदानाम् एषां पूर्ववद्विकल्पगणितम्। एतत् लोके, लोष्टुक् प्रस्तारं नाभासयोगाध्याये व्याख्यातम्। इच्छाविकल्पैः क्रमशः परिपाट्य अन्यत्र लोष्टुकम् अभिनीय नीते निवृत्तिः कार्यः। पुनः भूयः अन्यनीतिः इत्यत्र स्थानान्तरे चालनम्। अथ सुनफादयो भौमबुधगुरुसितासितैः, पञ्चभिनिष्पाद्यन्ते। तस्मात् इच्छाविकल्पाः पञ्च तेषां न्यासः। अत्र प्राग्वत् पूर्वेण गणितेन युक्तस्थानं विनान्त्यं प्रवदन्ति साङ्क्यमिति कृत्वा जातम् 5, 4 3 2 1। अथवा प्राग्वत् संस्थः, स्वसङ्ख्या जाताः, 5/1, 4/2, 3/3,2/4, 1/5.। एवमेकविकल्पाः 5 द्विविकल्पाः , 10 विकल्पाः, दशचतुर्विकल्पाः, पञ्च पञ्च विकल्पाः,एकः एवम् एकत्रिंशत्,। 5, 10, 10, 5,1।तद्यथा द्वितीये चन्द्रात् भौमः, बुधः बृहस्पतिः शुक्रः सौरः एवम् एकविकल्पाः पञ्च।

**अन्वयः**=अर्कम् हित्वा शीतांशोः स्वान्त्योभयस्थो तदा सुनफा अनफा दुरधुराख्यं अन्यथा केमद्रुमाख्यो योगो भवति। भौमादीनां केन्द्रे शीतकरे अथवा ग्रहयुते केमद्रुमो नेष्यते। केन्द्रे ग्रहयुत इत्यत्र कैश्चित् केन्द्रमेव केवलं व्याख्यातम्। तच्च अयुक्तम्। चन्द्रकेन्द्रे ग्रहयुते, योगो अन्तर्भवति।

**त्रिंशत् सरूपाः सुनफानफाख्याः षष्टित्रयं दौरुधुरे प्रभेदाः ।**

**इच्छा विकल्पैः क्रमशोऽभिनीय नीते निवृत्तिः पुनरन्य नीतिः ।। ४।।**

स्वयम्अधिगतम् वित्तं येन पार्थिवो राजा भवति। तत्समो वा। यदि राजा न भवति तदा राजतुल्यो वा भवति। धीधनख्यातिमान् युक्तः एवं विधः सुनफायां योगे जातो भवति। प्रभुरप्रतिहताज्ञः अगदशरीरो, शीलवान् दमविनयादिदिर्गुणैः ख्यातकीर्तिः प्रथितयशाः, जनविदिसद्गुणः, विषयसुखः शब्दस्पर्शरूपगन्धाः, विषयाः तत्सुखैः युक्तः। ननुकिं विषयव्यतिरिक्तसुकमस्ति? उच्यते। अस्ति। यद्योगिनं मनःसुखं सुवेषः अनुपलेपन अलंकार, माल्यसद्वस्त्रधारणशीलः निवृत्तिः, मनोदुःखविनिर्मुक्तः एवं विधे अनफायां योगे जाता भवति।

**स्वयम् अधिगतवित्तः पार्थिवस्तत्समो वा भवति हि सुनफायां धीधनख्यातिमांश्च ।**

**प्रभुरगदशरीरः शीलवान् ख्यातकीर्तिर्विषयसुखसुवेषो निर्व्र्तश्चानफायाम् ।। ५।।**

**अन्वयः=** स्वयम् अधिगत वित्तः पार्थिवस्तत्समो वा हि सुनफायां धी धन ख्यातिमांश्च भवति। प्रभुर गद शरीरः शीलवान् ख्यात कीर्तिर्विषय सुख सुवेषो निर्व्न्तश्चानफायाम् भवति।

अधिगतम्=अर्जितम्।

**अवबोधप्रश्नः**

4. अनफायां योगो जाता कीदृशो भवति?

**दुरधुराकेमद्रुमयोगयोः फलम्।**

यत्र तत्र तथोत्पन्नभोगैः सुखानि, भुङ्क्ते वित्तेन वाहनैः आश्वादिभिः आढ्यः, त्यागान्वितो दाता, सुभृत्यः, शोभनभृत्यु एवं विधो दुरुधुरा योगे जातो भवति। केमद्रुमो इति।मलिनः, स्नानालसश्च, दुःखितः, शरीराद्यैः दुःखैः अन्वितः,स्वकुल अनुचित अधमकर्मकरः, निस्वः,प्रेष्यः, दुर्जनस्वभावः एषामुक्तार्थानाम् अन्यतमेन युक्तो यदि नृपतेः राज्ञोपि वंशे, कुले जातः, तथापि एवं विधः, केमद्रुमजातो भवति।

**उत्पन्नभोगसुखभुग् धनवाहनाढ्यस्त्यागान्वितो दुरुधुरा प्रभवः सुभृत्यः ।**

**केमद्रुमे मलिनदुःखितनीचनिःस्वाः प्रेष्याः खलाश्च नृपतेरपि वंशजाताः ।। ६।।**

यत्र तत्र तथोत्पन्नभोगैः सुखानि, भुङ्क्ते धनेनवाहनैः आश्वादिभिः आढ्यः, त्यागान्वितो दाता, सुभृत्यः, शोभनभृत्यु एवं विधो दुरुधुरा योगे जातो भवति। केमद्रुमो इति। मलिनः, स्नानालसश्च, दुःखितः, स्वकुल अनुचित अधमकर्मकरः, निस्वः, प्रेष्यः खलःएषामुक्तार्थानाम् यदि नृपतेः राज्ञोपि वंशे, कुले जातः, तथापि एवं विधः, केमद्रुमजातो भवति।

**अवबोधप्रश्नः**

5. केमद्रुमयोगः कथम् भवति?

उत्साहवान्, शौर्यवान्, धनवान्, साहसवान् समीक्षितकार्यकारी यद्यत् कार्यं यदा काले तु अविचार्य करोति यः सः, साहसिकः एवं विधो महीजः अङ्गारकः योगकर्ता भवति तदा जातो भवति।पटुः सुवचनः

कलासु निपुणः, गीतवाद्यनृत्यचित्रपुस्तकर्मादिषु सूक्ष्मदृष्टिः यदि सौम्यो बुधो योगकर्ता भवति, तदा एवं विधो जातो भवति। अर्थभाक्, धर्मभाक् अनुरतः, सुखभाक्, नृपपूजितः यदि जीवो योगकरः तदा एवं विधो भवति। कामी, स्त्रीलोलः, बहुधनः प्रभूतार्थः, विषयोपभोक्ता विषयाणाम्, तत्सुकान्वितः यदि शुक्रो योगकरः तदा एवं विधो जातो भवति।

**उत्साहशौर्यधनसाहसवान् महीजः सौम्यः पटुः सुवचनो निपुणः कलासु ।**

**जीवोऽर्थधर्मसुखभाङ्नृपपूजितश्च कामीभृगुर्बहुधनो विषयोपभोक्ता ।। ७।।**

उत्साहवान्= बली नित्योद्यमशीलः, शौर्यवान्= रणप्रियः, धनवान्=वित्तान्वितः साहसवान् समीक्षितकार्यकारी= यद्यत् कार्यं यदा काले तु अविचार्य करोति यः सः, पटुः= दक्षः सुवचनः= शोभनवाक्, अर्थभाक्=धनानां भाजनः, धर्मभाक्=धर्मक्रियासु अनुरतः, सुखभाक्= नित्यं सुखितः, नृपपूजितः= राज्ञां मान्यः यदि जीवो योगकरः तदा एवं विधो भवति। कामी= कामुकः, स्त्रीलोलः=बहुधनः प्रभूतार्थः, विषयोपभोक्ता=विषयाणाम् इन्द्रियाणाम् उपभोक्ता उपभोगशीलः तत्सुकान्वितः यदि भृगुः शुक्रो योगकरः तदा एवं विधो जातो भवति।

**अवबोधप्रश्नः**

6. शुक्रः कीदृशो फलं ददाति?

परर्जितानाम् ऐश्वर्याणां परिच्छिदानां गृहवस्त्रवाहनपरिकराणाम् उपभोक्ता भवति। बहुकार्यकृत्, बहुगणस्वामी, गणाः संघाः, तेषां प्रभुः. एवं विधो रवितनयः, शनैश्चरो योगकर्तारो यदि भवति तदा जातो भवति। अत्र योगत्रये सुनफानफादुरुधुराख्ये एकैकस्य ग्रहस्य फलमुक्तं द्व्यादि संभवे फलं द्वयादिकं वाच्यम्। अशुभकृद् इति। उडुपश्चन्द्रो अहनि दिने दृश्यमूर्तिः दृश्यमानशरीरः, अशुभकृद्, एतदुक्तं भवति। स पुरुषो दारिद्र्यादियुक्तो, भवतीत्यर्थः। गलिततनु शुभः। एतदुक्तं भवत्यदृश्यत्वे चक्रार्द्धे स्थितः, शुभकृत् जातः, ऐश्वर्यादियुक्तो भवति।

**परविभवपरिच्छदोपभोक्तारवितनयो बहुकार्यकृद् गणेशः ।**

**अशुभकृद्-उडुपोऽह्निदृश्यमूर्तिर्गलिततनुश्च शुभोऽन्यथान्यद् उह्यम् ।। ८।।**

अन्वयः= परविभवपरिच्छिदानाम् उपभोक्ता बहुकार्यकृत् कार्याणां कर्ता, गणेशः एवं विधो रवितनयः,योगकर्तारो यदि भवति तदा जातो भवति। अशुभकृद्उडुपोऽह्निदृश्यमूर्तिः गलिततनुश्च शुभोऽन्यथान्यद् ऊह्यम् भवति।

कठिणपदार्थः -विभवानाम्=ऐश्वर्याणाम्।

**।। वसुमान् योगः।।**

पुरुषस्य सम्पदानां कथं ज्ञानं भवति?इति जिज्ञासा। तर्हि वसुमान् योगः कथितः।वसुः नाम सम्पदः। अयं योगः लग्नात् चिन्त्यते। चन्द्रादपि चिन्त्यते। यथा-

यस्य जन्मनि लग्नात् सौम्यग्रहाः, बुधजीवसिताः, उपचयगताः, भवन्ति, सर्व एव स पुरुषो अतीव वसुमान् भवति। एवं समस्तैः त्रिभिः एतत् फलम्। द्वाभ्यां समः। यस्य लग्नात् चन्द्रात् वा यस्य एकः सौम्यग्रहः, उपचयगतो भवति, सः अल्पवसुमान् किञ्चित् धनान्वितो भवति। लग्नात् चन्द्रात् वा यस्योपचये न कश्चित् सौम्यग्रहो भवति, स दरिद्रः भवति। यस्य लग्नचन्द्रद्वयोरपि सौम्यग्रहाः उपचयस्थाः कयापि युक्त्या भवन्ति, सोपि अतीव वसुमान् भवति। अन्येषु सत्सु अपि फलेषु इति। अन्येषु शोभनेषु अपि फलेषु सत्सु इदं फलम् उत्कटेन बाहुल्येन भवति। यस्य लग्नात् चन्द्रात् वा उपचयस्थाः सौम्यग्रहाः भवन्ति, तस्य योगम् अशुभमपि केमद्रुमादिफलम् अभिभूय इदं शुभमेव फलम् उत्कटत्वेन भवति।

**लग्नाद् अतीव वसुमान् वसुमाञ्छशाङ्कात् सौम्यग्रहैरुपचयोपगतैः समस्तैः ।**

**द्वाभ्यां समोऽल्पवसुमांश्च तदूनतायाम् अन्येष्वसत्स्वपि फलेष्विदम् उत्कटेन ।।९।।**

**।। ज्ञानविधिः ।।**

**लग्नात् उपचये बुधः यदि स्यात् तर्हि -1 अङ्कः।**

**लग्नात् उपचये गुरुः यदि स्यात् तर्हि -1 अङ्कः।**

**लग्नात् उपचये शुक्रः यदि स्यात् तर्हि -1 अङ्कः।**

**चन्द्रात् उपचये बुधः यदि स्यात् तर्हि -1 अङ्कः।**

**चन्द्रात् उपचये गुरुः यदि स्यात् तर्हि -1 अङ्कः।**

**चन्द्रात् उपचये बुधः यदि स्यात् तर्हि -1 अङ्कः।**

**आहत्य -6। षण्णाम् कति इति आकलय्य जानन्तु।**

**उत्तराणि-**

1. षष्ठे राशौ यदा सर्वे सौम्यग्रहाः भवन्ति तदैकः अधियोगः भवति।
2. अधियोगे जाताः चमूपः अर्थात् सेनापतिः भवति।
3. आदित्यम् हित्वा अन्यः कश्चिद् ग्रहः भौमादयः, शीतांशोः चन्द्रात् स्वान्त्योभयस्थो भवति। द्वितीयद्वादशस्थौ वा द्वौ भवतःतदा सुनफा अनफा दुरधुराख्यं योगत्रयं भवति।
4. यद्योगिनं मनःसुखं सुवेषः अनुपलेपन अलंकार, माल्यसद्वस्त्रधारणशीलः निवृत्तिः, मनोदुःखविनिर्मुक्तः एवं विधे अनफायां योगे जाता भवति।
5. कामी, स्त्रीलोलः, बहुधनः प्रभूतार्थः, विषयोपभोक्ता विषयाणाम्, तत्सुकान्वितः यदि शुक्रो योगकरः तदा एवं विधो जातो भवति।

## ।।द्विग्रहयोगाध्यायः।।

**उद्देश्यम्-**

- आदित्ये चन्द्रादियुक्ते जातस्य स्वरूपम्।
- भौमादियुक्ते चन्द्रे जातस्य स्वरूपम्।
- बुधे जीवादियुक्ते जातस्य स्वरूपम्।
- जीवे शुक्रादियुक्ता जातस्य स्वरूम्।
- शुक्रशनियुते जातस्य स्वरूम्।

**आदित्ये चन्द्रादियुक्ते जातस्य स्वरूपम्।**

आदित्यः चन्द्रमसा सहितोयन्त्राश्मकारं नरं जनयति। यन्त्राणि सहस्रघातिप्रभृतीन्यश्मानः पाषाणाः तत्क्रियासु निरतंतं करोति।एवं भौमेन सह एकराशिगतः अर्कः पापासक्तं जनयति। बुधेन क्रियासु निपुणं सूक्ष्मदृष्टिं धीकीर्तिसौख्यान्वितं वाक्पतिना गुरुणा विषमस्वभावम् अन्यकार्यनिरतं परकर्मतत्परं जनयति।शुक्रेण रङ्गायुधैः रङ्गावतरणक्रियया मल्लादिकयाऽयुधैः खड्गादिभिश्च लब्धस्वं प्राप्तार्थं जनयति। रविजेन धातुषु ताम्राद्युत्पत्तिमृत्तिकासु समुद्गादयस्तेषु कुशलं वा।

**तिग्मांशुर्जनयत्युषेशसहितो यन्त्राश्मकारंनरम्।**
**भौमेनाघरतं बुधेन निपुणं धीकीर्तिसौख्यान्वितम्।**
**क्रूरं वाक्-पतिनान्यकार्यनिरतं शुक्रेणरङ्गायुधैर्लब्धस्वम्।**
**रविजेनधातु कुशलं भाण्डप्रकारेषु वा ।। १।।**

पदार्थः= तिग्मांशुः=आदित्यः, उषेशेन=चन्द्रमसा,उषा=रात्रिः, उशेषः।(धीः=बुद्धिः, कीर्तिः=यशः, सौख्यं=सुखं सुखभावः)।

**अवबोधप्रश्नाः**

1. आदित्यः चन्द्रमसा सहितो कीदृशं नरं जनयन्ति?

2. रविशुक्रयुतिः किं फलं ददाति?

3. रविशनियुतिः जातकं कथं निर्माति?

**भौमादियुक्ते चन्द्रे जातस्य स्वरूपम्-**

कूटं,स्त्रीपण्यम्, आसवपण्यम्, कुम्भपण्यम्, अशिवम्, श्रेयस्करं मातुः जनन्याः एवं विधः चन्द्रमाः सवक्रो युक्तो नरं जनयति।प्रसृतवाक्यम्, अर्थनिपुणम्, सौभाग्येन सर्वजनवल्लभेन, कीर्त्या यशसान्वितं संयुक्तं संज्ञो बुधसहितः शशी नरं जनयति। विक्रान्तं शत्रुजेतारम्, वंशप्रधानम् अस्थिरमतिं चपलंधनस्वामिनम्, गुरुणा संयुक्तः शशी नरं जनयति। क्रियादि कुशलं सर्वक्रियासु निपुणं सार्किः आर्किणा शनैश्चरेण युक्तः द्विः संस्कृता पुनर्भूः तस्याः सुतं पुत्रं शशी नरं जनयति। पुनर्भूलक्षणम्।

"परिणीता पतिं हित्वा सवर्णं कामतः श्रयेत्। अक्षता च क्षता चैव पुनर्भूः संस्कृता पुनः।"

**कूटस्त्र्यासव कुम्भपण्यमशिवं मातुः स वक्रः शशी।**

**स ज्ञः प्रश्रित वाक्यम् अर्थ निपुणं सौभाग्य कीर्त्यान्वितम् ।**

**विक्रान्तं कुल मुख्यम् अस्थिर मतिं वित्तेश्वरं साङ्गिरा।**

**वस्त्राणां स सितः क्रियादि कुशलं सार्किः पुनर्भू सुतम् ।। २।।**

**अन्वयः**=कूटं स्त्री आसव, कुम्भपण्यम् अशिवं मातुः सवक्रो जनयति।प्रसृतवाक्यम्, अर्थनिपुणमर्थेषु सौभाग्येन कीर्त्या अन्वितं शशी नरं जनयति। विक्रान्तं कुलमुख्यम् अस्थिरमतिं वित्तेश्वरं साङ्गिराः गुरुणा संयुक्तः शशी नरं जनयति। क्रियादि कुशलं सार्किः शनैश्चरेण युक्तः पुनर्भूः सुतं पुत्रं शशी नरं जनयति।

**अन्वयार्थः**=कूटं =पण्यद्रव्याणां प्रतिरूपक्रियासक्तं, स्त्रीपण्यं =नारीविक्रयकम्, आसवपण्यं= पानविक्रयम्, कुम्भपण्यं =घटविक्रयकम्, अशिवम्=अश्रेयस्करम्, मातुः= जनन्याः एवं विधः शशी =चन्द्रमाः, सवक्रो= अङ्गारकेण युक्तो नरं जनयति।प्रसृतवाक्यं=प्रियं वदम्, अर्थनिपुणमर्थेषु = सूक्ष्मदृष्टिं, सौभाग्येन =सर्वजनवल्लभेन, कीर्त्या= यशसान्वितं संयुक्तं संज्ञो बुधसहितः शशी नरं जनयति। विक्रान्तं= शत्रुजेतारं, कुलमुख्यं = वंशप्रधानम्, अस्थिरमतिं = चपलं, वित्तेश्वरं= धनस्वामिनं, साङ्गिराः= अङ्गिरसा गुरुणा

संयुक्तः शशी नरं जनयति। क्रियादि कुशलं =सर्वक्रियासु निपुणं, सार्किः= आर्किणा शनैश्चरेण युक्तः, द्विः संस्कृता =पुनर्भूः तस्याः सुतं पुत्रं शशी नरं जनयति।

**बोधप्रश्नाः**

4. शशिमङ्गलसंयोगे कीदृशो नरो जायते?
5. चन्द्रबृहस्पतिसंयोगे कीदृशो नरो जायते?

**- बुधे जीवादियुक्ते जातस्य स्वरूपम्-**

ससौम्ये भूमिजे बुधयुक्तेऽङ्गारके जातो वणिग् भवति। स च वणिङ्गमूलादिभिः व्यवहरति मूलादीनि मूलपुष्पवल्कलसारफलानि स्नेहतैलादयः एतैः व्यवहरति। कूटैश्च द्रव्यप्रतिरूपैः कृत्रिमैः व्यवहरति। बाहुयोद्धा नियुद्धकुशलश्च भवति। एवं विधः ससौम्ये युक्ते भूमिजे जातो भवति। पुर्युध्यक्षः नगराधिकृतः पुरि अध्यक्षः स्वामी अथवा नरपतिः राजा भवति। अथवा द्विजो ब्राह्मणः, प्राप्तवित्तो लब्धधनः। केचित्प्राप्तविद्या इति पठन्ति। सजीवे गुरुसंयुक्ते भौमे जातो भवति। गोपः गोपालकः, मल्लः बाहुयोद्धा। अथ शब्दः पादपूरणे। दक्षः चतुरः परयुवतिरतः परस्त्रीसक्तः, द्यूतकृत् कितवः, सासुरेज्ये असुरैः इज्यः, शुक्रः, तेन शुक्रेण युक्ते भूमिजे जातः एवं विधः भवति। दुःखार्तः असत्यसन्धः निन्दितः सौरेणयुक्ते भूमिजे जातो भवति।

**मूलादि स्नेहकूटैर्व्यवहरति वणिग् बाहुयोद्धा ससौम्ये।**

**पुर्यध्यक्षः सजीवे भवति नरपतिः प्राप्तवित्तो द्विजो वा ।**

**गोपो मल्लोऽथदक्षः परयुवति रतो द्यूत कृत् सासुरेज्ये।**

**दुःखार्तोऽसत्य संधः स सवितृ तनये भूमिजे निन्दितश्च ।। ३।।**

**अन्वयः**=ससौम्ये भूमिजे जातो वणिग् कूटैश्च व्यवहरति। बाहुयोद्धा भवति। एवं विधः ससौम्ये भूमिजे जातो भवति। पुर्युध्यक्षः अथवा द्विजो, प्राप्तवित्तो भवति। केचित्प्राप्तविद्या इति पठन्ति। सजीवे, गोपः गोपालकः, मल्लः बाहुयोद्धा। अथ शब्दः पादपूरणे। दक्षः, चतुरः, परयुवतिरतः परस्त्रीसक्तः, द्यूतकृत् कितवः, सासुरेज्ये असुरैः इज्यः, शुक्रः, तेन शुक्रेण युक्ते भूमिजे जातः एवं विधः भवति। दुःखार्तः असत्यसन्धः निन्दितः सौरेणयुक्ते भूमिजे जातो भवति।

**अन्वायार्थः=** ससौम्ये भूमिजे= बुधयुक्तेऽङ्गारके, जातो वणिग् = वणिङ्गमूलादिभिः व्यवहरति । मूलादीनि= मूलपुष्पवल्कलसारफलानि= स्नेहतैलादयः एतैः व्यवहरति। कूटैश्च= द्रव्यप्रतिरूपैः कृत्रिमैः व्यवहरति। बाहुयोद्धा=नियुद्धकुशलश्च भवति। एवं विधः ससौम्ये =सौम्येन अर्थात् बुधेन युक्ते भूमिजे जातो भवति। पुर्युध्यक्षः= नगराधिकृतः, पुरि अध्यक्षः स्वामी अथवा नरपतिः राजा भवति। अथवा द्विजो= ब्राह्मणः, प्राप्तवित्तो = लब्धधनः। केचित्प्राप्तविद्या इति पठन्ति। सजीवे= गुरुसंयुक्ते भौमे जातो भवति। गोपः = गोपालकः, मल्लः =बाहुयोद्धा। अथ शब्दः पादपूरणे। दक्षः =चतुरः, परयुवतिरतः= परस्त्रीसक्तः, द्यूतकृत्= कितवः, सासुरेज्ये =असुरैः इज्यः, शुक्रः, तेन शुक्रेण युक्ते भूमिजे जातः एवं विधः भवति। दुःखार्तः असत्यसन्धः निन्दितः सौरेणयुक्ते भूमिजे जातो भवति।

**बोधप्रश्नाः**

6. मङ्गलबुधयुते कीदृशो नरो जायते?
7. मङ्गलबृहस्पतौ कीदृशो नरो जायते?

**- जीवे शुक्रादियुक्ता जातस्य स्वरूम् ।-**

रङ्गचरो मल्लादियुक्तः, गीतप्रियः=गीतवल्लभः, नृत्यवित्=नृत्यज्ञः, एवं विधो सौम्ये बृहस्पतिना युक्ते जातो भवति। प्रशस्ता वाग्यस्य स वाग्मी वचनक्रियया परप्रत्यायनसमर्थः भूगणपः भुवश्च गणानां संघानाम् अधिपतिः, एवं विधो बुधे शुक्रेण सहिते जातो जातो भवति। मायापटुः परवञ्चनदक्षः, लङ्कः गुरुवचनातिक्रामी एवं विधो मृदुना शनैश्चरेण सहिते बुधे जातो भवति। सद्विद्या इति। सद्विद्यः शोभनविद्याः धनदारवान् वित्तकलत्रसंयुक्तः, बहुगुणयुक्तः एवं विधे गुरुशुक्रेण युक्ते जातो भवति। श्मश्रुकरो नापितः अथवा घटकृत् कुम्भकारः अथवान्नकारः सूपकारः एवं विधः सितेन सौरेण युक्ते गुरौ शुक्रेण युक्ते जातो भवति।

**सौम्ये रङ्गचरो बृहस्पति युते गीतप्रियो नृत्यविद्।**

**वाग्मी भू गणपः सितेन मृदुना माया पटुर्लङ्घकः।**

**सद् विद्यो धनदारवान् बहु गुणः शुक्रेणयुक्ते गुरौ।**

**ज्ञेयः श्मश्रु करोऽसितेन घटकृज् जातोऽन्नकारोऽपि वा ।। ४।।**

**अन्वयः**= रङ्गचरो, गीतप्रियः, नृत्यवित्ज्ञः, एवं विधो सौम्ये बृहस्पतिना युक्ते जातो भवति। वाग्मी,गणपः भुवश्च, एवं विधो बुधे सितेन सहिते जातो भवति। मायापटुः, लङ्घकः एवं विधो मृदुना शनैश्चरेण सहिते बुधे जातो भवति। सद्विद्या इति। सद्विद्यः, धनदारवान् वित्तकलत्रसंयुक्तः, बहुगुणयुक्तः एवं विधे गुरुशुक्रेण युक्ते जातो भवति। श्मश्रुकरो अथवा घटकृत् अथवान्नकारः सूपकारः एवं विधः सितेन सौरेण युक्ते गुरौ शुक्रेण युक्ते जातो भवति।

**अन्वायार्थः**-रङ्गचरो= मल्लादियुक्तः, गीतप्रियः=गीतवल्लभः, नृत्यवित्=नृत्यज्ञः, एवं विधो सौम्ये बृहस्पतिना युक्ते जातो भवति। प्रशस्ता वाग्यस्य स वाग्मी वचनक्रियया परप्रत्यायनसमर्थः भूगणपः= भुवश्च गणानां संघानाम् अधिपतिः, एवं विधो बुधे सितेन शुक्रेण सहिते जातो जातो भवति। मायापटुः=परवञ्चनदक्षः, लङ्घकः =गुरुवचनातिक्रामी एवं विधो मृदुना= शनैश्चरेण सहिते बुधे जातो भवति। सद्विद्या इति। सद्विद्यः= शोभनविद्यः धनदारवान् =वित्तकलत्रसंयुक्तः, बहुगुणयुक्तः एवं विधे गुरुशुक्रेण युक्ते जातो भवति। श्मश्रुकरो= नापितः अथवा घटकृत्= कुम्भकारः अथवान्नकारः= सूपकारः एवं विधः सितेन सौरेण युक्ते गुरौ शुक्रेण युक्ते जातो भवति।

**बोधप्रश्नाः**

8. गुरुशुक्रयतौ कीदृक् मानवः जायते?
9. बुधगुरूयुते कीदृक् मानवः जायते?

## -शुक्रशनियुते जातस्य स्वरूम्-

अल्पचक्षुरल्पदृष्टिः युवतिसमाश्रयेण स्त्रीसंश्रयणेन सम्यक् प्रवृद्धं वित्तं यस्य स युवतिसमाश्रयसंप्रवृद्धवित्तः लिपिरक्षरविन्यासः, पुस्तकलेखकर्म चित्रमालेख्यम् एषां वेत्ता तज्ज्ञः एवं विधः असितसितसमागमे संयोगे जातः पुरुषः एवं विधः भवति। यदि राशिद्वये द्वौ ग्रहयोगौ भवतः तच्च द्विग्रहयोगद्वयस्यापि फलं वाच्यम्।कथितफलैरिति। द्वाभ्यां परतोऽपरेऽन्ये त्रयो ग्रहो यदैकगता भवन्ति तदा कथितफलै उक्तफलैरेव विकल्पनीयाः तदा द्विग्रहयोगत्रयस्य फलं वाच्यम्।यदि अर्कचन्द्रभौमाः,

एकराशिस्थाः भवन्ति, तदार्कचन्द्रयोगे यत्फलमुक्तं यच्चादित्याङ्गारकयोगे फलं तत्फलत्रयमपि वाच्यम्। एवं यथासम्भवमन्यत्रापि ग्रहत्रयस्यैकराशिगतस्य फलं वक्तव्यम्। यद्येकराशौ त्रिग्रहयोगोऽन्यत्र वा भवतः तदा सर्वाणि फलानि वाच्यानीति।

**असितसितसमागमे अल्पचक्षुर्युवति समाश्रय सम्प्रवृद्ध वित्तः।**

**भवति च लिपिपुस्तकचित्रवेत्ताकथितफलैः परतो विकल्पनीयाः ।। ५।।**

अन्वायार्थः=अल्पचक्षुः=अल्पदृष्टिः, युवतिसमाश्रयेण स्त्रीसंश्रयणेन सम्यक् प्रवृद्धं वित्तं=धनं यस्य स युवतिसमाश्रयसंप्रवृद्धवित्तः लिपिरक्षरविन्यासः, पुस्तकलेखकर्म चित्रमालेख्यम् एषां वेत्ता तज्ज्ञः एवं विधः असितसितसमागमे=शनैश्चरस्य शुक्रेण संयोगे जातः पुरुषः एवं विधः भवति। यदि राशिद्वये द्वौ ग्रहयोगौ भवतः तच्च द्विग्रहयोगद्वयस्यापि फलं वाच्यम्।कथितफलैरिति। द्वाभ्यां परतोऽपरेऽन्ये त्रयो ग्रहो यदैकगता भवन्ति तदा कथितफलै उक्तफलैरेव विकल्पनीयाः तदा द्विग्रहयोगत्रयस्य फलं वाच्यम्। यदि अर्कचन्द्रभौमाः, एकराशिस्थाः भवन्ति, तदार्कचन्द्रयोगे यत्फलमुक्तं=यच्चादित्याङ्गारकयोगे फलं तत्फलत्रयमपि वाच्यम्। एवं यथासम्भवमन्यत्रापि ग्रहत्रयस्यैकराशिगतस्य फलं वक्तव्यम्। यद्येकराशौ त्रिग्रहयोगोऽन्यत्र वा भवतः तदा सर्वाणि फलानि वाच्यानीति।

**बोधप्रश्नः।**

10. **असितसितसमागमे कीदृशो मनुष्यः जनयति?**

**प्रश्नोत्तराणि**

1. आदित्यः चन्द्रमसा सहितो यन्त्राश्मकारं नरं जनयति।
2. शुक्रेण रङ्गायुधैः रङ्गावतरणक्रियया मल्लादिकयाऽयुधैः खड्गादिभिश्च लब्धस्वं प्राप्तार्थं जनयति।
3. रविजेन धातुषु ताम्राद्युत्पत्तिमृत्तिकासु समुद्गादयस्तेषु कुशलं वा।
4. कूटं, स्त्रीपण्यम्, आसवपण्यम्, कुम्भपण्यम्, अशिवम्, श्रेयस्करं मातुः जनन्याः एवं विधः चन्द्रमाः सवक्रो युक्तो नरं जनयति।

5. विक्रान्तं शत्रुजेतारम्, वंशप्रधानम् अस्थिरमतिं चपलं धनस्वामिनम्, गुरुणा संयुक्तः शशी नरं जनयति।

6. स च वणिङ्गमूलादिभिः व्यवहरति मूलादीनि मूलपुष्पवल्कलसारफलानि स्नेहतैलादयः एतैः व्यवहरति। कूटैश्च द्रव्यप्रतिरूपैः कृत्रिमैः व्यवहरति। बाहुयोद्धा नियुद्धकुशलश्च भवति। एवं विधः ससौम्ये युक्ते भूमिजे जातो भवति।

7. द्विजो ब्राह्मणः, प्राप्तवित्तो लब्धधनः। केचित्प्राप्तविद्या इति पठन्ति। सजीवे गुरुसंयुक्ते भौमे जातो भवति।

8. सद्विद्यः शोभनविद्याः धनदारवान् वित्तकलत्रसंयुक्तः, बहुगुणयुक्तः एवं विधे गुरुशुक्रेण युक्ते जातो भवति।

9. प्रशस्ता वाग्यस्य स वाग्मी वचनक्रियया परप्रत्यायनसमर्थः भूगणपः भुवश्च गणानां संघानाम् अधिपतिः, एवं विधो बुधे शुक्रेण सहिते जातो जातो भवति।

10. अल्पचक्षुरल्पदृष्टिः युवतिसमाश्रयेण स्त्रीसंश्रयणेन सम्यक् प्रवृद्धं वित्तं यस्य स युवतिसमाश्रयसंप्रवृद्धवित्तः लिपिरक्षरविन्यासः, पुस्तकलेखकर्म चित्रमालेख्यम् एषां वेत्ता तज्ज्ञः एवं विधः असितसितसमागमे संयोगे जातः पुरुषः एवं विधः भवति।

## ।। प्रवृज्ययोगः ।।

**उद्देश्यम्-**

* चतुरादिभिः एकस्थैः ग्रहैः जातस्य स्वरूपम्।
* अस्तामितानि जितानि दृष्टानां ग्रहाणाम् अपवादम्।
* चतुरादिभिः एकस्थैः  विना प्रवृज्ययोगः।
* येन योगेन जातः शास्त्रकारो भवति येन च राजापि दीक्षितो भवति तद्योगः।

---

**चतुरादिभिः एकस्थैः ग्रहैः जातस्य स्वरूपम्-**

एकस्मिन्यत्र तत्र राशौ चतुरादयो ग्रहा भवन्ति, चत्वारः पञ्चषट्सप्त वा भवन्ति,  तै एकस्थैः चतुरादिभिः बलयुतैः वीर्यवद्भिः माहेयादिभिः जाताः सम्भूताः शाक्यादिकाः प्रव्रजकाः भवन्ति। किन्तु चतुरादिभिः बलयुतैः एका प्रवृज्या भवति। एतदुक्तं भवति चतुरादीनाम् एकस्थानां मध्यान्न कश्चिद् बली भवति तदा जातस्य प्रवृज्याद्वयमेव भवति। यदा बहवो बलिनः तदा बहव्यःप्रवृज्या भवन्ति। एवमेकस्थैः चतुरादिभिः बलयुतैः, जाता प्रवृज्यभाजो भवन्ति। यस्माद् उक्तम्। प्रवृज्या बलिभिः समाः। ताश्च पृथग्वीर्यगैः माहेयादिभिः भौमाद्यैः शाक्याद्या भवन्ति। तद्यथा। चतुरादीनाम् एकस्थानां माहायाद्यदा माहेयो भौमो बलवान् भवति, तदा जातः शाक्यो रक्तपटो भवति। एव ज्ञे बलवति आजीविको भवति ।

**एकस्थैश्चतुरादिभिर्बलयुतैर्जाताः पृथग् वीर्यगैः।**

**शाक्याजीविकभिक्षुवृद्धचरकानिर्ग्रन्थवन्याशनाः ।।**

**माहेयज्ञगुरुक्षपाकरसितप्राभाकरीनैः क्रमात् ।**

**प्रव्रज्या बलिभिः समापरजितैस्तत् स्वामिभिः प्रच्युतिः ।। १।।**

एकस्मिन्यत्र चतुरादिभिः बलयुतैः= वीर्यवद्भिः, माहेयादिभिः  जाताः =सम्भूताः,शाक्यादिकाः=प्रव्रजकाः भवन्ति।

**अवबोधप्रश्नः।**

1. चतुरादिभिः एकस्थैः ग्रहैः जातस्य प्रवृज्ययोगः लिखत।

**-अस्तामितानि जितानि दृष्टानां ग्रहाणाम् अपवादम्-**

**रविलुप्तकरैरदीक्षिता बलिभिस्तद्गत भक्तयो नराः ।**

**अभियाचित मात्रदीक्षिता निहतैरन्य निरीक्षितैरपि ।। २।।**

चतरादीनाम् एकस्थानां मध्याद् यावन्तो ग्रहा बलिनः तावन्तो स्वप्रव्रज्यादायकास्तत्रापि बलिनां मध्ये यावन्तो रविलुप्तकराः सूर्यमण्डलगाः अस्तमिता भवन्ति, तैरदीक्षिता जाता भवन्ति। तावन्तः स्वकीयाः प्रव्रज्याः न प्रयच्छतीत्यर्थः। किन्तु जाता नराः तत्प्रव्रज्याप्रविष्टानां मध्ये भक्ता भवन्ति। अत्र रविलुप्तकरत्वदीक्षित्वम् उदयास्तमयं गणयित्वाऽन्वेष्यम्। शुक्रगुरुज्ञार्किकुजाः कालांशै उत्तरोत्तरैः नवभिः दृश्यादृश्यादृक्कर्माणा रवेः द्वादशाभिरिन्दुरित्येवमादिकर्माणि कृते कदाचिद् आदित्येन सहैकराशिहगतैरपि, नास्तमितो भवति। कदाचित् द्वितीयराशिस्थोऽप्यस्तमितो भवति। एवमुदयास्तममन्वेष्यास्तमितफलं वाच्यम्। अभियाचितमात्रदीक्षिता बलिभिरित्यनुवर्तते। बलिभिः निहितैः ग्रहयुद्धेऽन्यग्रहवर्जजितै अन्यैश्च ग्रहैः निरीक्षितैः दृष्टैः अभियाचितमात्रदीक्षिताः दीक्षाप्रार्थनपरा भवन्ति। न च तां प्राप्नुवन्ति। पूर्वमुक्तं पराजितैस्तत्स्वमिभिः प्रच्युतिरित्यस्यायमपवादः। तेनैतदुक्तं भवति। बलिनग्रहो ग्रहयुद्धेऽन्येन विजितो भवति। न केनचिद् दृश्यते तदा तत्प्रव्रज्यां गृहीत्वा पुनस्त्यजति। अथ बली ग्रहः समागमेन ग्रहेण विजितो भवत्यन्येन च दृश्यते तदा प्रव्रज्यामानोऽपि न प्राप्नोति। यस्य च प्रव्रज्याप्रच्युतिः जाता तस्यैव दशाकाले दीक्षां लभते नरोऽवश्यम्। यस्य च दीक्षाच्यवनं तस्यैव दशावसाने स्यात्। एवं जातककाले सञ्चिन्त्य बलाबलं वाच्यम्।

2. कदा जातकः दीक्षाप्रार्थनकरो भवति?

**चतुरादिभिः एकस्थैः विना प्रवृज्ययोगः-**

**जन्मेशोऽन्यैर्यद्यदृष्टोऽर्कं पुत्रं पश्यत्यार्किर्जन्मपं वा बलोनम् ।**

**दीक्षां प्राप्नोत्यार्कि दृक् काण संस्थे भौमार्क्यंशे सौरदृष्टे च चन्द्रे ।। ३।।**

जन्मिनियस्मिन् राशौ चन्द्रः स्थितः तस्य योऽधिपतिर्ग्रहः सः जन्मेशः। स च यद्यन्यैः ग्रहैः अदृष्टे नावलोकितः न केनचिद् ग्रहेण दृश्यते, तथाभूतो असौ शनैश्चरं पश्यति तदा जातस्य प्रवृज्या भवति। सा च शनैश्चरकृता शनैश्चरजन्मेशयोः यो बलवांस्तदीयान्तर्दशादीक्षालाभो तद्बलयोगाद्दशाकाले। उक्तञ्च-"यस्येक्षते अर्कपुत्रं जन्मभनाथो ग्रहैः न सन्दृष्टः। तस्य हि दीक्षालाभो तद्बलयोगाद् दशाकाले।"

पश्यत्यार्किरिति। अथवार्किः सौरः, सबलो जन्मराश्याधिपं बलोनं वीर्यरहितं पश्यति तथापि शनैश्चरोक्त प्रव्रज्यां वदति। उक्तञ्च शनिदृष्टे बलहीने जन्मनि नाथे वदेच्च निर्ग्रन्थम्।दीक्षां प्राप्नोतीति। यत्र तत्र राशौ चन्द्रे शशान्यार्किद्रेष्काणसंस्थे सौरद्रेष्काणव्यवस्थिते न केवलं यावद्भौमाार्क्यांशे कुजसौरयोरन्यतरनवांशकस्थे तस्मिंश्च सर्वग्रहादृष्टे शनैश्चरेणक्षमाणे दीक्षां प्राप्नोति। तथा च -

सौरद्रेष्काणसंस्थो यदि भवति शशी तदंशसंस्थश्च। वक्रांशे वा दृष्टः सौरेण तु सर्वदर्शनविमुक्तः। निर्ग्रन्थसंज्ञो योऽर्कपुत्रवीर्यानुसारेण। जन्माधिपतिः पापैरपि निरीक्षितस्त्वेक ईक्षते सौरः। यस्य पुरुषस्य मूर्तौ नियता दीक्षिता भवति, तस्य जन्माधिपतिं विबलं निरीक्षते। यस्य सूर्यजः सबलः सोऽपि खलु भाग्यहीनः प्रवृज्यां प्राप्नुयाज्जातः मान्द्ये कौजे वांशे शशी स्थितः कृष्णजे द्रेष्काणे वा अंशाधिपानुरूपे काले दीक्षाप्रदे भवति। अत्र योगत्रयेऽपि पूर्वापवादा अनुवर्तनीयाः।

**बोधप्रश्नाः**

3. सर्वदर्शनविमुक्तः योगः कदा भवति?

---

येन योगेन जातः शास्त्रकारो भवति येन च राजापि दीक्षितो भवति तद्योगः –

**सुरगुरुशशिहोरास्वार्की दृष्टासु धर्मे गुरुरथ नृपतीनां योगजस्तीर्थ कृत् स्यात् ।**

**नवमभवनसंस्थे मन्दगे अन्यैर्दृष्टे भवति नरपयोगे दीक्षितः पार्थिवेन्द्रः ।। ४।।**

सुरुगुरुः, शशी, होरा एतासु शनैश्चरेण दृष्टासु नवमे स्थाने गुरुः जीवो यदि भवति। अथशब्दः पादपूरणे। नृपतीनां योगजः कश्चिद् राजयोगो जातस्य भवति तदा सः पुरुषः तीर्थकृत् शास्त्रकृत् भवेत्। कणाद-बुद्ध-पाञ्चशिख-वराहमिहिर-ब्रह्मगुप्तप्रतिम इति।सुरगुरुशशिहोरासु इति। धन्विमीनकर्कटलग्नैः कैश्चिद् व्याख्यातम्। तच्चायुक्तम्। यस्मान्माण्डव्यः। 'गते मन्दालोकं गुरुशशिविलग्ने नवमगे गुरौ निष्पाद्यन्ते न इह

नृपयोगे नृपतव्यः। विजृम्भन्ते येषां लटहरचनारम्भसुभगा जगत्यां विद्वद्गुणकथनापाषाणसदृशाः। तथा चोक्तम्। गुरुशशिलग्ना दृष्टा कोणे नवमगे यदि गुरुः नरनाथजन्मजातः शास्त्रकरो भवति न च नृपः। अथ द्वितीय राजयोगस्तत्रोपस्थानं करोति तदा राजा भवति। तीर्थकरश्च जनककाशीराजस्फुजिध्वजप्रतिम इति। उक्तं च अस्मिन् योगे चान्यो नृपयोगो भवति तत्र यो जातः। स भवति जिनेन्द्रतुल्यो नरनाथः शास्त्रकर्ता च। नवमभवनसंस्थे मन्दं गच्छतीति मन्दगः, लग्नभवनसंस्थे सर्वग्रहैः अदृष्टे राजानाम् मध्याद् अन्यतमे राजयोगे सति जातो दीक्षितः पार्तिवेन्द्रश्च राजाधिराजो भवति। पश्चात् तत्कालं सर्वबली तत्तत् दीक्षितश्च भवति। राजयोगं विना अयमपि प्रव्रज्या योगः। योगजः चेत् जातो राजा दीक्षितः च भवति। अन्यथादीक्षित एव। उक्तं च नवमस्थाने सौरो यदि स्थितः सर्वदर्शनविमुक्तः नरनाथयोगजातो नृपोऽपि दीक्षान्वितो भवति। नृपयोगस्य भावे योगे अस्मिन् दीक्षितो नरो जातः। निःसंदिग्धं प्रवदेत् योगस्यास्य प्रभावेन। "इति।

**कठिणपदार्थः**=सुरुगुरुः=जीवः, शशी=चन्द्रः, होरा=लग्नम्, आर्किणा=शनैश्चरेण, दृष्टासु=अवलोकितासु, धर्मे=नवमे स्थाने, गुरुः=जीवो, तीर्थकृत्=शास्त्रकृत्, सुरगुरुशशिहोरासु=धन्विमीनकर्कटलग्नैः कैश्चिद्। मन्दं गच्छतीति मन्दगः, पार्थिवेन्द्रः=राजाधिराजो भवति।

**बोधप्रश्नः**

4. पुरुषः कदा तीर्थकृत् भवति?

**उत्तराणि-**

1. एकस्थैः चतुरादिभिः बलयुतैः वीर्यवद्भिः माहेयादिभिः जाताः सम्भूताः शाक्यादिकाः प्रव्रजकाः भवन्ति।
2. बलिभिः निहितैः ग्रहयुद्धेऽन्यग्रहवर्जजितै अन्यैश्च ग्रहैः निरीक्षितैः दृष्टैः अभियाचितमात्रदीक्षिताः दीक्षाप्रार्थनपरा भवन्ति।
3. सौरद्रेष्काणसंस्थो यदि भवति शशी तदंशसंस्थश्च। वक्रांशे वा दृष्टः सौरेण तु सर्वदर्शनविमुक्तः।
4. सुरुगुरुः, शशी, होरा एतासु शनैश्चरेण दृष्टासु नवमे स्थाने गुरुः जीवो यदि भवति। अथशब्दः पादपूरणे। नृपतीनां योगजः कश्चिद् राजयोगो जातस्य भवति तदा सः पुरुषः तीर्थकृत् शास्त्रकृत् भवेत्।

## ।।ऋक्षशीलाध्यायः।।

- ❖ अश्विनीभरण्योः जातस्य स्वरूपम्ज्ञास्यति।
  - ❖ कृत्तिकारोहिण्योः जातस्य स्वरूपम्।
  - ❖ मृगशीर्षाद्रयोः जातस्य स्वरूपम्।
  - ❖ पुनर्वसौ जातस्य स्वरूपम्।
  - ❖ पुष्याश्लेषायोः जातस्य स्वरूपम्।
  - ❖ माघपूर्वाफल्गुन्ययोः स्वरूपम्।
  - ❖ उत्तराफल्गुनीहस्तयोः जातस्य स्वरूपम्।
  - ❖ चित्रास्वात्योः जातस्य स्वरूपम्।
  - ❖ विशाखानुराधयोः जातस्य स्वरूपम्।
  - ❖ ज्येष्ठामूलयोः जातस्य स्वरूपम्।
  - ❖ पूर्वोत्तराषाढयोः जातस्य स्वरूपम्।
  - ❖ श्रवणधनिष्टयोः जातस्य स्वरूपम्।
  - ❖ शतभिष्कपूर्वाभाद्रपदयोः जातस्य स्वरूपम्।
  - ❖ उत्तराभाद्रपदरेवत्योः जातस्य स्वरूपम्।

### अश्विनीभरणीनक्षत्रयोः जातस्य फलम्।

अलङ्करणवल्लभः, शोभनरूपः, वपुष्यामान्गः, सर्वजनप्रियः, सर्वकार्यकरणपटुः, बुद्धिमान् एवं विधे अश्विनीषु जातः भवति। तारकापेक्षया अत्र सर्वत्र बहुवचननिर्देशः, कृतः। कृतनिश्चय इति। कृतनिश्चयः प्रारब्धानां कर्माणामंतगः, सत्यवाक्, अरुक्, नीरूजः, दक्षः, चतुरः, सुखितो दुःखनिर्मुक्तः, एवं विधः भरणीषु जाता भवति।

**प्रियभूषणः सुरूपः सुभगो दक्षोऽश्विनीषु मतिमांश्च ।**

**कृत निश्चय सत्यारुग् दक्षः सुखितश्च भरणीषु ।। १।।**

**अन्वयः=** प्रियभूषणः सुरूपः वपुष्यामान् सर्वजनप्रियः सर्वकार्यकरणपटुः, मतिमान् एवं विधे अश्विनीषु जातः भवति। तारकापेक्षया अत्र सर्वत्र बहुवचननिर्देशः, कृतः। कृतनिश्चय इति। कृतनिश्चयः, सत्यः अरुक्, दक्षः, सुखितो, एवं विधः भरणीषु जाता भवति।

**अन्वयार्थः=**प्रियभूषणः=अलङ्करणवल्लभः, सुरूपः=शोभनरूपः, वपुष्यामान्=सुभगः, सर्वजनप्रियः, दक्षः=सर्वकार्यकरणपटुः, मतिमान्=बुद्धिमान् एवं विधे अश्विनीषु जातः भवति। तारकापेक्षया अत्र सर्वत्र बहुवचननिर्देशः, कृतः। कृतनिश्चय इति। कृतनिश्चयः=प्रारब्धानां कर्माणामंतगः, सत्यः=सत्यवाक्, अरुक्=नीरूजः, दक्षः=चतुरः, सुखितो= दुःखनिर्मुक्तः, एवं विधः भरणीषु जाता भवति।

**अवबोधप्रश्नः**

1. अश्विनीनक्षत्रे जातस्य स्वरूपं लिखत।

**रोहिणीनक्षत्रजातस्य फलम्।**

प्रभूताहारः, परस्त्रीषु आसक्तः, असहिष्णुः, विख्यातः, एवं विधः कृत्तिकासु जातो भवति। अवितथभाषी, शुचिः, परस्वाद्युलब्धः, शास्त्रोक्तशौचानुष्ठाता, प्रियंवदः, मधुरवाक् स्थिरमतिः, एकमतिः, सुरूपश्च, वपुष्मान् एवं विधः रोहिण्यां जातो भवति।

**बहुभुक् परदाररतस्तेजस्वी कृत्तिकासु विख्यातः ।**

**रोहिण्यां सत्यशुचिः प्रियंवदः स्थिरमतिः सुरूपश्च ।। २।।**

**शब्दार्थः=** बहुभुक्=प्रभूतहारः, परदाररतः=परस्त्रीषु आसक्तः, तेजस्वी=असहिष्णुः, विख्यातः, सर्वत्र=प्रसिद्धकीर्तिः, एवं विधः कृत्तिकासु जातो भवति। सत्यः= अवितथभाषी, शुचिः=परस्वाद्युलब्धः, शास्त्रोक्तशौचानुष्ठाता प्रियंवदः=मधुरवाक्, स्थिरमतिः=एकमतिः, सुरूपश्च=वपुष्मान् एवं विधः रोहिण्यां जातो भवति।

**अवबोधप्रश्नः**

2. रोहिणीनक्षत्रजातस्य स्वरूपं लिखत।

## मृगशीर्षार्द्रयोः जातस्य फलम्।

चपलः क्रियासु अनवस्थितः,चतुरः, दक्षः, भीरूः, पटुः, प्रवक्ता, सोद्यमः,धनी, भोगी सम्भोगशीलः एवं विधे मृगे मृगशिरसि जातो भवति। शठः, गर्वितः, कृतघ्नः, खलः, कृतमुपकृतं हन्ति यः स कृतघ्नः, हिस्त्रः, पापकर्माकर्ता एवं विधो रौद्रर्क्षे जातो भवति।

**चपलश्चतुरो भीरुः पटुरुत्साही धनी मृगे भोगी।**

**शठ गर्वितः कृतघ्नो हिंस्त्रः पापश्चरौद्रऋक्षे।।३।।**

**अन्वयः**= चपलः चतुरः भीरूः पटुः उत्साही, धनी, भोगी एवं विधे मृगे मृगशिरसि जातो भवति। शठः गर्वितः कृतघ्नः, कृतमुपकृतं हिस्त्रः, पापः एवं विधो रौद्रर्क्षे आर्द्रायां जातो भवति।

**अन्वयार्थः**= चपलः= क्रियासु, अनवस्थितःचतुरः= दक्षः, भीरूः= भयार्तः, पटुः= प्रवक्ता उत्साही, सोद्यमः= धनी, वित्तवान्, भोगी= सम्भोगशीलः, एवं विधे मृगे मृगशिरसि जातो भवति। शठः=परकार्यविमुखः इति। गर्वितः मानी, कृतघ्नः= खलः कृतमुपकृतं हन्ति यः स कृतघ्नः, हिस्त्रः= वधिकः, पापः= पापकर्माकर्ता एवं विधो रौद्रर्क्षे= आर्द्रायां जातो भवति।

## पुनर्वसुनक्षत्रे जातस्य फलम्।

दान्तः शमपरः,तपःक्लेशसहः, सुखितः, सुशीलः, शोभनशीलः विनयवान्, दुर्मेधा जडप्रायः रोगभाक् पीडितोदेहः तृषार्त्तःस अल्पेन स्तोकेनैवार्थेन सन्तुष्टः एवं विधो मनुजो पुनर्वसौ उत्पद्यते।

**दान्तः सुखी सुशीलो दुर्मेधारोग भाक् पिपासुश्च ।**

**अल्पेन च संतुष्टः पुनर्वसौ जायते मनुजः ।। ४।।**

**अन्वयः**= चपलः चतुरः भीरूः पटुः उत्साही, सोद्यमः, भोगी एवं विधे मृगे मृगशिरसि जातो भवति। शठः परकार्यविमुखः इति। गर्वितः, कृतघ्नः, हिस्त्रः, वधिकः, पापः एवं विधो रौद्रर्क्षे जातो भवति।

**अन्वयार्थः**=चपलः =क्रियासु अनवस्थितः, चतुरः= दक्षः, भीरूः=भयार्तः, पटुः= प्रवक्ता, उत्साही, सोद्यमः, धनी= वित्तवान्, भोगी= सम्भोगशीलः, एवं विधे मृगे मृगशिरसि जातो भवति। शठः =परकार्यविमुखः इति। गर्वितः =मानी, कृतघ्नः= खलः कृतमुपकृतं= हन्ति यः स कृतघ्नः हिस्रः वधिकः, पापः पापकर्माकर्ता एवं विधो रौद्रर्क्षे आर्द्रायां जातो भवति।

**अवबोधप्रश्नाः**

3. आर्द्रा नक्षत्रे जातस्य स्वरूपम् लिखत।

**पुष्यायां आश्लेषायां च जातस्य फलम्।**

शान्तात्मा जितेन्द्रियः, सुभगः, शास्त्रवित्, वित्तवान्, धर्मनिरतः एवं विधः पुष्यजो भवति। शठः, सर्वभक्षः, सञ्चयनशीलः, पापकर्मरतः, कृतघ्नः, कृतमुपकृतम् इति स कृतघ्नः, धूर्तः परवञ्चनदक्षः एवं विधो भैजगे आश्लेषायां जातो भवति।

**शान्तात्मा सुभगः पण्डितो धनी धर्म संसृतः पुष्ये ।**

**शठः सर्वभक्ष पापः कृतघ्नधूर्तश्च भौजङ्गे** ।। ५।।

**अन्वयः**= शान्तात्मा शमदमपरो जितेन्द्रियः, सुभगः सर्वजनप्रियः पण्डितः शास्त्रवित्, धनी वित्तवान्, धर्मनिरतः एवं विधः पुष्यजो भवति। शठः परकार्यविमुखः सर्वभक्षः सञ्चयनसीलः पापकर्मरतः, कृतघ्नः कृतमुपकृतम् इति स कृतघ्नः, धूर्तः परवञ्चनदक्षः एवं विधो भौजगे आश्लेषायां जातो भवति।

**अन्वयार्थः**= शान्तात्मा = शमदमपरो जितेन्द्रियः, सुभगः= सर्वजनप्रियः पण्डितः शास्त्रवित्, धनी=वित्तवान्, धर्मनिरतः एवं विधः पुष्यजो भवति। शठः=परकार्यविमुखः सर्वभक्षः=सञ्चयनशीलः पापकर्मरतः, कृतघ्नः= कृतमुपकृतम् इति स कृतघ्नः, धूर्तः = परवञ्चनदक्षः एवं विधो भौजगे आश्लेषायां जातो भवति।

**अवबोधप्रश्नाः**

4. पुष्यानक्षत्रे जातस्य स्वरूपं कीदृशः भवति?

बहुभृत्यधनः प्रभूतपरिवारवित्तान्वितः, भोगान्वितः, सुरपितृभक्तः देवानां पितृणां च भक्तः, मोहद्यमः महोत्साही एवं विधः पित्र्ये मघायां जातो भवति। अभिमतवक्ता, दानशीलः द्युतिमान् सुकान्तिः, परिभ्रमणशीलः, नृपसेवकः राजसेवानुरतः एवं विधो भाग्ये पूर्वाफल्गुन्यां जातो भवति।

**बहुभृत्यधनो भोगी सुरपितृभक्तो महोद्यमः पित्र्ये।**

**प्रियवाग्-दाताद्युतिमान् अटनो नृपसेवको भाग्ये ।। ६।।**

**अन्वयः**= बहुभृत्यधनः प्रभूतपरिवारवित्तान्वितः, भोगी भोगान्वितः, सुरपितृभक्तः देवानां पितृणां च भक्तः, मोहद्यमः महोत्साही एवं विधः पित्र्ये मघायां जातो भवति।

**अन्वयार्थः**=बहुभृत्यधनः= प्रभूतपरिवारवित्तान्वितः, भोगी=भोगान्वितः, सुरपितृभक्तः =देवानां पितृणां च भक्तः , मोहद्यमः= महोत्साही एवं विधः पित्र्ये मघायां जातो भवति।

सुभगः सर्वजनप्रियः। विद्यया आप्तं धनं येन स। भोगान्वितः , सुःखभाग्दुःखरहितं एवं विधो उत्तराफलगुन्यां जातो भवति। सोद्यमः प्रतिभायुक्तः निर्लज्जो वा पानप्रियः आसनवानुरक्तः, निर्दयः, चौरः एवं विधो हस्ते जातो भवति।

**सुभगो विद्याप्तधनो भोगी सुखभाक् द्वितीय फाल्गुन्याम्।**

**उत्साही धृष्टः पानपो घृणी तस्करो हस्ते ।। ७।।**

**अन्वयः**= विद्याप्तधनः भोगी, सुःखभाग् एवं विधो द्वितीयफल्गुन्यां जातो भवति। उत्साही धृष्टः निर्लज्जो वा पानपः आसनवानुरक्तः, अघृणी , तस्करः एवं विधो हस्ते जातो भवति।

**अन्वयार्थः**= विद्याप्तधनः=विद्यया आप्तं धनं येन स। भोगी=भोगान्वितः , सुःखभाग्दुःखरहितं एवं विधो द्वितीयफल्गुन्याम्= उत्तराफलगुन्यां जातो भवति। उत्साही =सोद्यमः, धृष्टः=प्रतिभायुक्तः, निर्लज्जो वा पानपः= पानप्रियः,आसनवानुरक्तः, अघृणी = निर्दयः, तस्करः= चौरः एवं विधो हस्ते जातो भवति।

**अवबोधप्रश्नाः**

5. **हस्तानक्षत्रे जातस्य निसर्गः कीदृशः भवति?**

**चित्रानक्षत्रे जातस्य स्वरूपम्।**

नानाप्रकाराणि अम्बराणि, माल्यानि त धारयति। सुलोचनाङ्गः नानाप्रकराणि नेत्रावयवा यस्य एवं विधः चित्रायां जातो भवति। दान्तो जितेन्द्रियः वणिक्क्रयविक्रयज्ञः कृपालुः केचित्तृषालुरिते पठन्ति तृषालुः तृषां न सहते प्रियवाक्, धर्माश्रितः धर्मरतः एवं विधः स्वातौ जातो भवति।

**चित्राम्बरमाल्यधरः सुलोचनाङ्गश्च भवति चित्रायाम्।**

**दान्तो वणिक् कृपालुः प्रियवाग् धर्माश्रितः स्वातौ ।। ८।।**

**अन्वयः**= चित्राम्बरमाल्यधरः, सुलोचनाङ्गः एवं विधः चित्रायां जातो भवति। दान्तो जितेन्द्रियः वणिक्क्रयविक्रयज्ञः कृपालुः केचित्तृषालुरिते पठन्ति तृषालुः तृषां न सहते प्रियवाक्, धर्माश्रितः धर्मरतः एवं विधः स्वातौ जातो भवति।

**अन्वयार्थः**= चित्राम्बरमाल्यधरः= चित्राणि नानाप्रकाराणि अम्बराणि, वस्त्राणि= माल्यानि त धारयति। सुलोचनाङ्गः =नानाप्रकराणि नेत्रावयवा यस्य एवं विधः चित्रायां जातो भवति। दान्तो= विनयान्वितः जितेन्द्रियः वणिक्क्रयविक्रयज्ञः कृपालुः केचित्तृषालुरिते पठन्ति तृषालुः तृषां न सहते प्रियवाक्=अभिमतवक्ता, धर्माश्रितः= धर्मरतः एवं विधः स्वातौ जातो भवति।

ईर्ष्युः, लुब्धो, द्युतिमान्, वचनपटुः , केचिदर्थपटुरितः पठन्ति, अर्थार्जने पटुः प्रवीणः कलहकृद्विरोधशीलः एवं विधो विशाखासु जातो भवति। आढ्यः ईश्वरः, विदेशवासी परदेशनिवासनशीलः, क्षुधालुः क्षुधां न सहते। अटनः एवं विधः अनुराधासु जातो भवति।

**ईर्ष्युर्लुब्धो द्युतिमान् वचन पटुः कलह कृद् विशाखासु।**

**आढ्यो विदेश वासी क्षुधालुरटनोऽनुराधासु ।। ९।।**

**अन्वयार्थः** ईर्ष्युः =परार्द्धिमत्सरी, लुब्धो= लोभाभिभूतः, द्युतिमान्= सुकान्तिः, वचनपटुः= सम्भाषणदक्षः। केचिदर्थपटुरितः पठन्ति, अर्थार्जनेपटुः=प्रवीणः, कलहकृद्विरोधशीलः एवं विधो विशाखालु जातो भवति।

आढ्यः=ईश्वरः, विदेशवासी=परदेशनिवासनशीलः, क्षुधालुः = क्षुधां न सहते। अटनः=परिभ्रमणशीलः एवं विधः अनुराधासु जातो भवति।

**अवबोधप्रश्नः**

6. अनुराधा नक्षत्रे जातस्य निसर्गः कीदृशो भवति?

न बहुमित्रः स्वल्पसुहृत् , सन्तुष्टः, धर्मकृद्धर्मानुरतः, प्रचुरकोपः, एवं विधो ज्येष्ठासु जातो भवति। मानी, धनवान्, सुखी, न हिंस्रः, सौम्यप्रकृतिः। परविधातं न करोति स्थिरः एकमतिः, भोगी भोगान्वितः एवं विधो मूले जातो भवति।

**ज्येष्ठासु न बहुमित्रः संतुष्टो धर्म कृत् प्रचुर कोपः ।**

**मूले मानी धनवान् सुखी न हिंस्रः स्थिरो भोगी ।। १०।।**

**अन्वयः**=न बहुमित्रः, सन्तुष्टः, धर्मकृद्, प्रचुरकोपः एवं विधो ज्येष्ठासु जातो भवति। मानी धनवान्, सुखी, न हिंस्रः, सौम्यप्रकृतिः। परविधातं न करोति स्थिरः एकमतिः, भोगी भोगान्वितः एवं विधो मूले जातो भवति।

**अन्वयार्थः**=न बहुमित्रः=स्वल्पसुहृत्, सन्तुष्टः=सन्तोषशीलः धर्मकृद्=धर्मानुरतः, प्रचुरकोपः= अतिक्रोधी, एवं विधो ज्येष्ठासु जातो भवति। मानी=गर्वितः, धनवान्= प्रभूतवित्तः, सुखी =सुखितः, न हिंस्रः, सौम्यप्रकृतिः। परविधातं न करोति स्थिरः एकमतिः, भोगी=भोगान्वितः एवं विधो मूले जातो भवति।

**इष्टानन्द कलत्रो मानी दृढ सौहृन्दश्च जलदैवे ।**

**वैश्वे विनीतधार्मिक बहु मित्र कृतज्ञ सुभगश्च ।। ११।।**

इष्टाभिमतम् कलत्रं यस्य मानी दृढसौहृदः स्थिरसुहृतः एवं विधो जलदैव दूर्वाषाढायां जातो भवति। विनीतः, धार्मिकः, बहुमित्रः प्रभूतसुहृत्, कृतज्ञः, प्रत्युपकारशीलः, सर्वजनप्रियः, एवं विधः उत्तराषाढायां जातो भवति।

**श्रवणाधनिष्ठानक्षत्रे जातस्य निसर्गः।**

श्रीमान्, उदारदारः उदारा दारा यस्य स शोभनस्त्रीकः, धनान्वितः ख्यातः जनविदितकीर्तिः एवं विधः श्रवणे जातो भवति। दाता,आढ्यः, रणप्रियः, धनलुब्धः एवं विधो धनिष्ठासु जातो भवति।

**श्रीमाञ् छ्रवणे श्रुतवान् उदारदारो धनान्वितः ख्यातः ।**

**दाताढ्यः शूरो गीत प्रियो धनिष्ठासु धन लुब्धः ।। १२।।**

**अन्वयः=** श्रीमान् श्रिया युक्तः श्रुतवान् पण्डितः, उदारदारः उदारा दारा यस्य स शोभनस्त्रीकः, धनान्वितः वित्तवान् ख्यातः जनविदितकीर्तिः एवं विधः श्रवणे जातो भवति। दाता दानशीलः आढ्यः ईश्वरः, रणप्रियः गीतवल्लभः, धनलुब्धः अर्थरुचिः एवं विधो धनिष्ठासु जातो भवति।

**अन्वयार्थः=** श्रीमान् = श्रिया युक्तः, श्रुतवान्= पण्डितः, उदारदारः=उदारा दारा यस्य स शोभनस्त्रीकः, धनान्वितः= वित्तवान्, ख्यातः जनविदितकीर्तिः एवं विधः श्रवणे जातो भवति। दाता= दानशीलः, आढ्यः =ईश्वरः, रणप्रियः=गीतवल्लभः, धनलुब्धः= अर्थरुचिः एवं विधो धनिष्ठासु जातो भवति।

**अवबोधप्रश्नः**

7. **श्रवणनक्षत्रे जातस्य स्वरूपम् लिखत।**

**शतभिषज् पूर्वभाद्रयोः जातस्य फलम्।**

स्फुटवाक् व्यसनी स्त्री आदि व्यसनोपहतः रिपुहा साहसिकः ह्यसमीक्षितकार्यकृत्, दुर्ग्रह्यः एवं विधः शतभिषजि जातो भवति। उद्विग्नः दुःखितमना स्त्रीजितः धनी अथवा धनपटुः धनार्जने चतुरः आदाता कदर्यः एवं विधः पूर्वाभाद्रपदासु जातो भवति।

**स्फुटवाग् व्यसनी रिपुहा साहसिकः शतभिषजि दुर्ग्राह्यः ।**

**भाद्रपदासु द्वि गनः स्त्री जितधनी पटुरदाता च ।। १३।।**

**अन्वयः=** स्फुटवाक्दी व्यसनी रिपुहा साहसिकः, दुर्ग्रह्यः एवं विधः शतभिषजि जातो भवति। उद्विग्नः दुःखितमना स्त्रीजितः स्त्रीभिः अभिभूतः जितधनी धनार्जने चतुरः आदाता कदर्यः एवं विधः पूर्वाभाद्रपदासु जातो भवति।

**अन्वयार्थः=** स्फुटवाक्=सत्यवादी व्यसनी स्त्री आदि व्यनोपहतः रिपुहा= शत्रुघातकः साहसिकः= ह्यसमीक्षितकार्यकृत् , दुर्ग्रह्यः= दुराराध्यः एवं विधः शतभिषजि जातो भवति। उद्विग्नः =दुःखितमना, स्त्रीजितः= स्त्रीभिः अभिभूतः, धनी= धनवान् अथवा धनपटुः धनार्जने चतुरः, आदाता= कदर्यः एवं विधः पूर्वाभाद्रपदासु जातो भवति।

## उत्तराभाद्रपदरेवत्यां जातस्य निसर्गः।

वक्ता सम्भाषणे दक्षः, सुखी, प्रजावान्, जितशत्रुः, धार्मिकः एवं विधो द्वितीयासूत्तराभाद्रपदासु जातो भवति। सम्पूर्णाङ्गः, सुभगः, शूरः, शुचिः, परधनादिषु अलुब्धः, अर्थवान् एवं विधः पौष्णे रेवत्यां जातो भवति। एते यथोक्ता नक्षत्रस्वभावाश्चन्द्रस्य सबलत्परिपूर्णा भवन्ति।

**वक्ता सुखी प्रजावान् जितशत्रुर्धार्मिको द्वितीयासु।**

**सम्पूर्णाङ्गः सुभगः शूरः शुचिरर्थवान् पौष्णे** ।। १४।।

**अन्वयः=** वक्ता, सुखी, प्रजावान्, जितशत्रुः, धार्मिकः एवं विधो द्वितीयासु जातो भवति। सम्पूर्णाङ्गः सुभगः, शूरः, परधनादिषु अलुब्धः, अर्थवान् एवं विधः पौष्णे जातो भवति। एते यथोक्ता नक्षत्रस्वभावाश्चन्द्रस्य सबलत्परिपूर्णा भवन्ति।

**अन्वयार्थः=**वक्ता=वचनपटुः सम्भाषणे= दक्षः, सुखी=विद्यमानसुखः, प्रजावान्= बुहपुत्रपौत्रः, जितशत्रुः= जितारिः, धार्मिकः एवं विधो द्वितीयासूत्तराभाद्रपदासु जातो भवति। सम्पूर्णाङ्गः = परिपूर्णावयवः, सुभगः= सर्वजनप्रियः, शूरः= सङ्ग्रामधीरः शुचिः, परधनादिषु अलुब्धः, अर्थवान् = धनान्वितः एवं विधः पौष्णे रेवत्यां जातो भवति। एते यथोक्ता नक्षत्रस्वभावाश्चन्द्रस्य सबलत्परिपूर्णा भवन्ति।

8. रेवती नक्षत्रजातस्य स्वरूपम् लिखत?

**अवबोधप्रश्नोत्तराणि-**

1. अलङ्करणवल्लभः, शोभनरूपः, वपुष्यामान्गः, सर्वजनप्रियः, सर्वकार्यकरणपटुः, बुद्धिमान् एवं विधे अश्विनीषु जातः भवति।
2. अवितथभाषी, शुचिः, परस्वाद्युलब्धः, शास्त्रोक्तशौचानुष्ठाता, प्रियंवदः, मधुरवाक् स्थिरमतिः, एकमतिः, सुरूपश्च, वपुष्मान् एवं विधः रोहिण्यां जातो भवति।
3. शठः, गर्वितः, कृतघ्नः, खलः, कृतमुपकृतं हन्ति यः स कृतघ्नः, हिस्रः, पापकर्माकर्ता एवं विधो रौद्रर्क्षे जातो भवति।
4. शान्तात्मा जितेन्द्रियः, सुभगः, शास्त्रवित्, वित्तवान्, धर्मनिरतः एवं विधः पुष्यजो भवति।
5. सोद्यमः प्रतिभायुक्तः निर्लज्जो वा पानप्रियः आसनवानुरक्तः, निर्दयः, चौरः एवं विधो हस्ते जातो भवति।
6. आढ्यः ईश्वरः, विदेशवासी परदेशनिवासनशीलः, क्षुधालुः क्षुधां न सहते। अटनः एवं विधः अनुराधासु जातो भवति।
7. आढ्यः ईश्वरः, विदेशवासी परदेशनिवासनशीलः, क्षुधालुः क्षुधां न सहते। अटनः एवं विधः अनुराधासु जातो भवति।
8. सम्पूर्णाङ्गः, सुभगः, शूरः, शुचिः, परधनादिषु अलुब्धः, अर्थवान् एवं विधः पौष्णे रेवत्यां जातो भवति।

## ।।चन्द्रराशिशीलाध्यायः।।

**उद्देश्यम्-**

- मेषस्थे चन्द्रमसि जातस्य स्वरूम्।
- वृषस्थे चन्द्रमसि जातस्य स्वरूपम्।
- मिथुनस्थे चन्द्रमसि जातस्य स्वरूपम्।
- कर्कटस्थे चन्द्रमसि जातस्य स्वरूपम्।
- सिंहस्थे  चन्द्रमसि जातस्य स्वरूपम्।
- कन्यागते चन्द्रमसि जातस्य स्वरूपम्।
- तुलास्थे चन्द्रमसि जातस्य स्वरूपम्।
- वृश्चिकस्थे चन्द्रमसि जातस्य स्वरूपम्।
- धनुर्धरस्थे चन्द्रमसि जातस्य स्वरूपम्।
- मकरस्थे चन्द्रमसि जातस्य स्वरूपम्।
- कुम्भस्थे चन्द्रमसि जातस्य स्वरूपम्।
- मीनस्थे चन्द्रमसि जातस्य स्वरूपम्।

चन्द्रः मनसः कारकः। चन्द्रमसः व्यक्तित्वस्य च सम्बन्धः अस्ति।चन्द्रमसः  यस्मिन् राशौ स्थितः तस्यानुसारं शास्त्रे फलानि कथितानि। तानि अग्रे लिख्यन्ते।

### मेषराशिस्थ चन्द्रमसि जातस्य फलम्।

वृत्ते आताम्रे दृष्टी यस्य स वृत्तताम्रदृक्, परिवर्तुललोहितनेत्रः उष्णं शाकं लघु च स्वल्पं भुक्ते स उष्णशाकलघुभुक्, उष्णशाकभोजी, क्षिप्रप्रसादः, अटनः कामी दुर्बलजानुः,  अस्थिरधनः, अचिरवित्तः, शूरः अङ्गनावल्लभः, अङ्गनानां  वल्लभो  अङ्गनावल्लभो यस्य। सेवाज्ञः पराराधनकुशलः, कुनखी,  व्रणाङ्कितशिराः, मानी,सहोत्थाग्रजः सहोत्थानाम् अग्रणी गुणप्रधानः, पाणितले, स चिह्नविशेषणाङ्कितः,  अतिचपलः, क्रियासु अनवस्थितः, तोये  च जले भीरुः सभयः एवं विधाः क्रिये मेषस्थिते चन्द्रमसि जातो भवति।

**वृत्तातामृदृग् उष्ण शाक लघु भुक् क्षिप्र प्रसादोऽटनः ।**

**कामी दुर्बल जानुरस्थिरधनः शूरोऽङ्गना वल्लभः ।।**

**सेवाज्ञः कनखी व्रणाङ्कित शिरा मानी सहोत्थाग्रजः।**

**शक्त्या पाणि तले अङ्कितोऽतिचपलस्तोये अतिभीरुः क्रिये ।। १।।**

**कठिणपदार्थः**=वृत्ते=परिवर्तुले,आताम्रे=लोहितवर्णे दृष्टी चक्षुषी यस्य स, वृत्ताताम्रदृक् परिवर्तुललोहितनेत्रः, उष्णं शाकं लघु च स्ल्पं भुक्ते स उष्णशाकलघुभुक्, उष्णभोजी शाकभोजी, क्षिप्रप्रसादः=आश्वेवप्रसीदति, अटनः=परिभ्रमणशीलः, कामी= सुरतप्रियः दुर्बलजानुः=निर्मांसलजङ्घासन्धिः, अस्थिरधनः=अचिरवित्तः, शूरः= रणप्रियः, अङ्गनावल्लभः= स्त्रीप्रियः, अङ्गनानां वल्लभो= अङ्गनावल्लभो यस्य। सेवाज्ञः =पराराधनकुशलः, कुनखी= कुत्सितनखः, व्रणाङ्कितशिराः= सच्छिद्रमूर्द्धा, मानी=गर्वितः सहोत्थाग्रजः =सहोत्थानां सहजातानाम् अग्रणी गुणप्रधानः, पाणितले=हस्ततले, स चिह्नविशेषणाङ्कितः=चिह्नितः अतिचपलः=क्रियासु अनवस्थितः, तोये च जले भीरुः सभयः एवं विधाः क्रिये मेषस्थिते चन्द्रमसि जातो भवति।

**अवबोधप्रश्नः**

1. मेषराशिजातस्य स्वरूपंकीदृशम्भवति?

**।।वृषभराशिस्थ चन्द्रमसि जातस्य स्वरूपम्।।**

कान्तःखेलगतिः, पृथूरुवदनः। पृष्ठं पश्चिमभागः आस्यं वक्त्रं पार्श्वे प्रसिद्धे एषामन्यतमस्थाने अङ्कितचिह्नितः, त्यागी, क्लेशसहः, प्रभुरप्रतिहताज्ञः, ककुदवान्, कन्याप्रजः कन्या प्रजा यस्य, स्त्रीजनकः, श्लेष्मलः, पूर्वैः प्रथमैः, बन्धुभिः कुटुम्बैः, धनैः, आत्मजैः पुत्रैश्च विरहितः वियुक्तः सौभाग्ययुक्तः, सर्वजनवल्लभः. क्षमी, सहिष्णुः इत्यर्थः। दीप्ताग्निः प्रमदाप्रियः , स्थिरसुहृत् , मध्यांत्यसौख्यः मध्ये यौवनेंऽत्य वृद्धत्वे च सुखितः अर्थादेवबाल्ये दुःखित एवं विधो गवि वृषस्थे चन्द्रे जातो भवति।

**कान्तः खेल गतिः पृथु ऊरु वदनः पृष्ठास्य पार्श्वाङ्कितः।**

**त्यागी क्लेश सहः प्रभुः ककुदवान् कन्या प्रजः श्लेष्मलः।।**

**पूर्वैर्बन्धु धनात्मजैर्विरहितः सौभाग्ययुक्तः क्षमी।**

**दीप्ताग्निः प्रमदा प्रियः स्थिर सुहृन् मध्यान्त्य सौख्यो गवि ।। २।।**

**अन्वयः**= कान्तः खेलगतिः पृथूरुवदनः वदनं मुखं यस्य। पृष्ठम् आस्यं वक्रं प्रसिद्धे एषामन्यतमस्थाने अङ्कितचिह्नितः त्यागी क्लेशसहः, प्रभुरप्रतिहताज्ञः, ककुदवान् , कन्याप्रजः, कफाधिकः, पूर्वैः, बन्धुभिः, धनैः, आत्मजैः पुत्रैश्च विरहितः, सौभाग्ययुक्तः, क्षमी इत्यर्थः। दीप्ताग्निः प्रमदाप्रियः, दृढमित्रः, मध्यांत्यसौख्यः मध्ये यौवनेंऽत्य वृद्धत्वे च सुखितः अर्थादेवबाल्ये दुःखित एवं विधो गवि चन्द्रे जातो भवति।

**कठिणपदार्थः**= कान्तः =दर्शनीयः, खेलगतिः=सविलासगामी, पृथूरुवदनः=पृथु विस्तीर्णावूरू वदनं मुखं यस्य। पृष्ठं=पश्चिमभागः आस्यं वक्रं पार्श्वे प्रसिद्धे एषामन्यतमस्थाने अङ्कितचिह्नितः त्यागी= दाता, क्लेशसहः=कदर्थनासमर्थः, प्रभुरप्रतिहताज्ञः, ककुदवान्=ककुदसंयुक्तः, कन्याप्रजः कन्या प्रजा यस्य, स्त्रीजनकः श्लेष्मलः=कफाधिकः , पूर्वैः =प्रथमैः , बन्धुभिः= कुटुम्बैः, धनैः=वित्तैः, आत्मजैः=पुत्रैश्च विरहितः वियुक्तः सौभाग्ययुक्तः=सर्वजनवल्लभः. क्षमी=क्षमवान् सहिष्णुः इत्यर्थः। दीप्ताग्निः=बह्वाशीः प्रमदाप्रियः=स्त्रीवल्लभः, स्थिरसुहृत् =दृढमित्रः, मध्यांत्यसौख्यः मध्ये यौवनेंऽत्य वृद्धत्वे च सुखितः अर्थादेवबाल्ये दुःखित एवं विधो गवि=वृषस्थे चन्द्रे जातो भवति।

**अवबोधप्रश्नः**

2. **वृषस्थे चन्द्रे जातस्य स्वरूपं लिखत?**

## मिथुनराशिस्थ चन्द्रे जातस्य फलम्।

स्त्रीलोलः, सुरतोपचारकुशलः, ताम्रेक्षणः, शास्त्रवित्, दूतः परेच्छया गमनागमनशीलः, कुञ्चितमूर्द्धजः, पटुमतिः, अतीवप्राज्ञः, हास्यम्, इङ्गितं परचित्तज्ञानं, द्यूतं प्रसिद्धम् एतानि वेत्ति जानाति। चार्वङ्गः, प्रियवाग्, अभिमतवक्ता, प्रभक्षणरुचिः, गीतप्रियः, नृत्यवित्, क्लीबैः, सह रतिं याति गच्छति, समुन्नतनस एवं विधश्चन्द्रे तृतीयर्क्षगे तृतीयराशौ स्थिते मिथुनगे जातो भवति।

**स्त्री लोलः सुरतोपचार कुशलस्ताम्रेक्षणः शास्त्रविद्**

**दूतः कुञ्चित मूर्धजः पटु मतिर्हास्येङ्गितद्यूतवित्।**

**चार्वङ्गः प्रिय वाक् प्रभक्षणरुचिर्गीतप्रियो नृत्यवित्**

**क्लीबैर्याति रतिं समुन्नत नसश्चन्द्रे तृतीयऋक्षगे ।। ३।।**

**अन्वयः**= स्त्रीलोलः, सुरतोपचारकुशलः, शिक्षितः, ताम्रेक्षणः, शास्त्रवित्, दूतः, कुञ्चितमूर्द्धजः, पटुमतिः, हास्यमुपहास्यम् इङ्गितं द्यूतं प्रसिद्धम् एतानि वेत्ति जानाति। चार्वङ्गः, प्रियवाग् बहुभुक् गीतप्रियःनृत्यवित् क्लीबैः समुन्नतनस एवं विधश्चन्द्रे तृतीयर्क्षगे जातो भवति।

**कठिणपदार्थः**= स्त्रीलोलः= स्त्रीषु अभिलाषकरः, सुरतोपचारकुशलः= सुरतोपतारे सुरतकर्मणि कामशास्त्रेषु कुशलः शिक्षितः , ताम्रेक्षणः= लोहितनेत्रः , शास्त्रवित्= शास्त्रज्ञः पण्डितः, दूतः परेच्छया=गमनागमनशीलः, कुञ्चितमूर्द्धजः=कुटिलशिरोरुहः, पटुमतिः=चतुरधीः, अतीवप्राज्ञः, हास्यमुपहास्यम्=इङ्गितं परचित्तज्ञानं= द्यूतं प्रसिद्धम् एतानि वेत्ति जानाति। चार्वङ्गः=शोभनावयवः, प्रियवाग्=अभिमतवक्ता प्रभक्षणरुचिः=बहुभुक्, गीतप्रियः=गीतरतिः, नृत्यवित्=नृत्यज्ञः, क्लीबैः=षण्ढैः, सह रतिं याति गच्छति, समुन्नतन= उन्नतनासिकः एवं विधश्चन्द्रे तृतीयर्क्षगे=तृतीयराशौ स्थिते मिथुनगे जातो भवति।

**कर्कराशिस्थे चन्द्रमसि जातस्य स्वरूपम्।**

आवक्रं कुटिलं द्रुतं सत्वरं गच्छतीति आवक्रद्रुतगः कुटिलसत्वरगामी, समुन्नतकटिः उच्चजघनः स्त्रीनिर्जितः प्रमदाजितः, सत्सुहृत् शोभनमित्रः, दैवज्ञः ज्योतिशास्त्रर्थवेत्ता, प्रचुरालयः, प्रभूतगृहकर्ता, क्षयधनै अपचयोपचयै चन्द्रवत् शशिवत्संयुज्यते, कदाचित् सधनः कदाचित् विधनः इत्यर्थः) चन्द्रक्षयवृद्धिवत्, ह्रस्वः अदीर्घः पीनगलः मांसलकण्ठः, साम्ना प्रीत्या वसं वश्यतां समेति याति, सुहृद्वत्सलः मित्रवल्लभः,तोयोद्यानरतः जलोपवनसक्तः, तोये जले उपवने उद्याने चरतः एवं विधः स्ववेश्मसहिते कर्कटस्थे शशाङ्के चन्द्रे नरः पुरुषः जातो भवति।

**आवक्रद्रुतगः समुन्नत कटिः स्त्रीनिर्जितः सत्**

**सुहृद् दैवज्ञः प्रचुरालय क्षयधनैः संयुज्यते चन्द्रवत् ।**

**ह्रस्वः पीन गलः समेति च वंश साम्ना सुहृद् वत्सल**

**स्तोयोद्यानरतः स्व वेश्म सहिते जातः शशाङ्के नरः ।। ४।।**

**अन्वयः**= आवक्रं, समुन्नतकटिः स्त्रीनिर्जितः, सत्सुहृत्, दैवज्ञः, प्रचुरालयः, प्रभूतगृहकर्ता, क्षयधनै अपचयोपचयै चन्द्रवत्, चन्द्रक्षयवृद्धिवत्, ह्रस्वः, पीनगलः, साम्ना वशं याति, सुहृद्वत्सलः, तोयोद्यानरतः, एवं विधः स्ववेश्मसहिते शशाङ्के चन्द्रे नरः पुरुषः जातो भवति।

**कठिणपदार्थः**= आवक्रं=कुटिलं द्रुतं सत्वरं गच्छतीति,आवक्रद्रुतगः= कुटिलसत्वरगामी, समुन्नतकटिः = उच्चजघनः , स्त्रीनिर्जितः= प्रमदाजितः, सत्सुहृत्=शोभनमित्रः, दैवज्ञः = ज्योतिशास्त्रर्थवेत्ता, प्रचुरालयः= प्रभूतगृहकर्ता, क्षयधनै=अपचयोपचयै, चन्द्रवत्= शशिवत्संयुज्यते, कदाचित् सधनः= कदाचित् विधनः इत्यर्थ) चन्द्रक्षयवृद्धिवत्= ह्रस्वः अदीर्घः पीनगलः मांसलकण्ठः, साम्ना प्रीत्या वशं=वश्यतां समेति याति, सुहृद्वत्सलः= मित्रवल्लभः , तोयोद्यानरतः =जलोपवनसक्तः, तोये जले उपवने उद्याने चरतः एवं विधः स्ववेश्मसहिते = कर्कटस्थे , शशाङ्के=चन्द्रे, नरः =पुरुषः जातो भवति।

3. कर्कराशिस्थे चन्द्रे जातस्य स्वरूपं लिखत।

**सिंहराशिस्थ चन्द्रमसि जातस्य निसर्गः।**

तीक्ष्णः, स्थूलहनुः,विस्तीर्णवक्रः, पिङ्गेक्षणः, अल्पात्मजः, स्त्रीद्वेषी, प्रियमांसः, कानननगः, अगः, एते प्रिया यस्य आमिषवनपर्वतानुरतः अकार्ये अकरणीयेऽर्थे कुप्यति, चिरं, केचिद् काण्डे अकाले। क्षुत्प्रसिद्धा तृष्णा पिपासा, उदरं, दान्ता, मनश्चित्तमेभ्यो जाता रुजः पीडास्ताभिः, सम्पीडित उपतप्तः, त्यागवान् दाता, विक्रान्तः, स्थिरधीः एकमतिः गर्वितमनाः अभिमानसंयुक्तः मातुर्विधेयो जननीवश्यः भक्तः इत्यर्थः। विधेयो वचनग्राही। इत्यमरः। एवं विधो अर्कभे सूर्यराशौ सिंहस्थे चन्द्रे जातो भवति।

**तीक्ष्णः स्थूलहनुर्विशालवदनः पिङ्गेक्षणोऽल्पात्मजः ।**

**स्त्री द्वेषी प्रिय मांस कानन नगः कुप्यत्यकार्ये चिरम् ।।**

**क्षुत् तृणोदरदन्त मानसरुजा सम्पीडितस्त्यागवान्**

**विक्रान्तः स्थिरधीः सुगर्वित मना मातुर्विधेयोऽर्के भे ।। ५।।**

**कठिणपदार्थः**=तीक्ष्णः=अमर्षशीलः, स्थूलहनुः = बृहद्धनुः, बृहत्कपोलः= विशालो वदनो, विस्तीर्णवक्रः, पिङ्गेक्षणः=कपिलनेत्रः,अल्पात्मजः=स्वल्पापत्यः, स्त्रीद्वेषी=प्रमदाद्विट् इति केचित् पठन्ति। प्रियमांसः=काननगः, मांसमामिषं=काननमरण्यं , मगः=पर्वतः, एते प्रिया यस्य आमिषवनपर्वतानुरतः अकार्ये अकरणीयेऽर्थे कुप्यति क्रुध्यति, चिरं=बहुकालं , केचिद् काण्डे अकाले। क्षुत्प्रसिद्धा=तृष्णा पिपासा, उदरं=जठरं, दान्ता=दशनाः, मनश्चित्तमेभ्यो= जाता रुजः पीडास्ताभिः, सम्पीडित=उपतप्तः, त्यागवान्=दाता, विक्रान्तः =पराक्रमशीलः, स्थिरधीः=एकमतिः, गर्वितमनाः=अभिमानसंयुक्तः मातुर्विधेयो=जननीवश्यः भक्तः इत्यर्थः। विधेयो वचनग्राही। इत्यमरः। एवं विधो अर्कभे= सूर्यराशौ सिंहस्थे चन्द्रे जातो भवति।

4. सिंहराशिस्थे जातस्य स्वरूपम् वर्णयत।

---

**।। कन्याराशिस्थे चन्द्रमसि जातस्य निसर्गः।।**

**व्रीडामन्थरचारुवीक्षणगतिः स्रस्तांसबाहुः सुखी**

**श्लक्ष्णः सत्यरतः कलासु निपुणः शास्त्रार्थविद् धार्मिकः ।**

**मेधावी सुरतप्रियः परगृहैर्वित्तैश्च संयुज्यते**

**कन्यायां परदेशगः प्रिय वचाः कन्या प्रजोऽल्पात्मजः ।। ६।।**

देवब्राह्मणसाधुपूजनरतः, प्रज्ञालक्षणम्। अतीतानुस्मृतिर्मेधा बुद्धिस्तत्कालग्राहिणी। शुभाशुभविचारज्ञा प्रज्ञा धीरै उदाहृता। शुचिः परधननाद्यलुब्धः, श्रोत्रियो वा, स्त्रीजितः, प्रांशुः, उन्नतनासिकः, कृशचलद्गात्रः, दुर्बलशिथिलावयवः, कृशं दुर्बलं चलत् बलहीनं गात्रं शरीरं यस्य। अटनः परिभ्रमणशीलः,अर्थान्वितः सधनः, हीनाङ्गः, अपरिपूर्णावयवः क्रयेषु विक्रयेषु च कुशलः शक्तः देवद्विनामा

सभ्यपर्यायद्वितीयाभिधानः द्वितीयनाम देवाख्यं चास्य भवति, सरुक् पीडितदेहः, बन्धूनां स्वकुटुम्बानाम् उपकारकृद्धितकारी तैश्च बन्धुभिः, विरुषितः भर्त्सितः पराभूतः त्यक्तःश्च एवं विधः सप्तमे तुलास्थे चन्द्रमसि जातो भवति।

**अवबोधप्रश्नः**

5. **तुलाराशौ चन्द्रमसि जातस्य स्वरूपं लिखत।**

**।। तुलायां स्थितः चन्द्रे जातस्य प्रकृतिः।।**

**देवब्राह्मणसाधुपूजनरतः प्राज्ञः शुचिः स्त्रीजितः**

**प्रांशुश्च उन्नतनासिकः कृशचलद्गात्रोऽटनोऽर्थान्वितः**

**हीनाङ्गः क्रयविक्रयेषु कुशलो देवद्विनामासरुक्**

**बन्धूनामुपकार कृद्विरुषितस्त्यक्तस्तु तैः सप्तमे ।। ७।।**

**कठिणपदार्थः**= देवब्राह्मणसाधुपूजनरतः= देवानां सुराणां ह्मणानां द्विजानां साधूनां सज्जनानां च पूजने रतः सक्तः, प्राज्ञः मेधावी अत्र मेधा वृद्धिः। प्रज्ञालक्षणम्। अतीतानुस्मृतिर्मेधा बुद्धिस्तत्कालग्राहिणी। शुभाशुभविचारज्ञा=प्रज्ञा धीरै उदाहृता। शुचिः परधननाद्यलुब्धः, श्रोत्रियो वा, स्त्रीजितः योषितां वशगः, प्रांशुः=अत्युचः, उन्नतनासिकः=अत्युन्नतनासः, कृशचलद्गात्रः, दुर्बलशिथिलावयवः, कृशं=दुर्बलं चलत् बलहीनं=गात्रं शरीरं यस्य। अटनः= परिभ्रमणशीलः,अर्थान्वितः=सधनः, हीनाङ्गः=अपरिपूर्णावयवः क्रयेषु = विक्रयेषु च कुशलः शक्तः देवद्विनामा सभ्यपर्यायद्वितीयाभिधानः द्वितीयनाम देवाख्यं चास्य भवति, सरुक्=पीडितदेहः , बन्धूनां=स्वकुटुम्बानाम् उपकारकृद्धितकारी तैश्च बन्धुभिः, विरुषितः भर्त्सितःपराभूतः त्यक्तः त्ययजितश्च एवं विधः सप्तमे तुलास्थे चन्द्रमसि जातो भवति।

**।।वृश्चिकस्थे चन्द्रे जातस्य निसर्गः।।**

पृथुलनयनवक्षाः, वृत्ते जंघे ऊरू जानुनी च एवं विधो अलिनि चन्द्रे जातो भवति। जनकैः मातृपितृभिः गौरवयुक्तैः च वियुक्तो रहितः, शैशवे बाल्ये व्याधितः पीडितः, नरपतिकुले राज्ञां वंशे पूज्यः,

आराध्यः, पिङ्गलः क्रूरचेष्टः, विषमस्वभावः, झषकुलिशखगाङ्कः, झषो मीनः, कुलिशं वज्रं, खगः पक्षी, एतैः मत्स्यवज्रपक्षिसमानैः अङ्कैः चिह्नैः अङ्कितचिह्नितः, छन्नपापः, गुप्ताशुभकृत्, एवं विधो अलिनि चन्द्रे जातो भवति।

**पृथुलनयनवक्षाः वृत्त जङ्घोरुजानुर्जनकगुरुवियुक्तः शैशवे व्याधितश्च ।**

**नरपतिकुलपूज्यः पिङ्गलः क्रूरचेष्टो झषकुलिशखगाङ्कश्छन्नपापोऽलिजातः ।। ८।।**

**अन्वयः**=पृथुलनयनवक्षाः वक्ष वृत्ते जंघा ऊरू जानुनी जनकैः मातृपितृभिः गौरवयुक्तैः च वियुक्तो रहितः, शैशवे बाल्ये व्याधितः पीडितः, नरपतिकुले राज्ञां वंशे पूज्यः, आराध्यः, पिङ्गलः क्रूरचेष्टः, विषमस्वभावः, झषकुलिशखगाङ्कः, झषो मीनः, कुलिशं, खगः पक्षी, एतैः मत्स्यवज्रपक्षिसमानैः अङ्कैः चिह्नैः अङ्कितचिह्नितः, छन्नपापः, गुप्ताशुभकृत्, एवं विधो अलिनि वृश्चिकस्थे चन्द्रे जातो भवति।

**कठिणपदार्थः=** पृथुलनयनवक्षाः =पृथुले विस्तीर्णे नयने =नेत्रे वक्ष उरो यस्य वृत्ते परिवर्तुले जंघे ऊरू जानुनी च यस्य । जनकैः मातृपितृभिः गौरवयुक्तैः च वियुक्तो रहितः, शैशवे =बाल्ये व्याधितः= पीडितः, नरपतिकुले राज्ञां=वंशे पूज्यः, आराध्यः, पिङ्गलः क्रूरचेष्टः, विषमस्वभावः, झषकुलिशखगाङ्कः, झषो=मीनः, कुलिशम्=वज्रं, खगः= पक्षी, एतैः मत्स्यवज्रपक्षिसमानैः अङ्कैः चिह्नैः अङ्कितचिह्नितः, छन्नपापः, गुप्ताशुभकृत्, एवं विधो अलिनि वृश्चिकस्थे चन्द्रे जातो भवति।

**।।धनुषिस्थिते चन्द्रे जातस्य निसर्गः।।**

व्यादीर्घास्याशिरोधरः, पितृधनः जनकवित्तान्वितः, त्यागी दाता, कविः काव्याज्ञा, वीर्यवान् बली, वक्ताः सम्भाषणे दक्षः, स्थूलरदश्रवाधरनसः, स्थूला महत्प्राणा रदा दन्ताः श्रवसी कर्णौ, अधर ओष्ठः, नसः नासिका घ्राणः, एते सर्वे स्थूला यस्य। कर्मोद्यतः सर्वकार्याणाम् उद्यमशीलः, शिल्पज्ञः, लिपिपुस्तकचित्रज्ञः, कुब्जांसः, अस्पष्टस्कन्धः, कुनखी कुत्सितनखः, समांसलभुजः, पीनबाहुः , प्रागल्भ्यवान् अतिप्रतिभायुक्तः, धर्मवित् धर्मज्ञः, बन्धुद्विट्, बन्धूनाम् प्रीतिभाक्, द्वेष्टा, बलात् हठात् आक्रमणात्, वशं संविधेयतां वश्यतां न समेति नायाति। साम्ना प्रीत्या एकैनैव गुणेन साध्यः स्वीक्रियते एवं विधो अश्वज्ञो धनुषि स्थिते चन्द्रे जातो भवति।

**व्यादिर्घास्य शिरो धरः पितृ धनस्त्यागी कविर्वीर्यवान्।**

**वक्ता स्थूलरदश्रवोऽधरनसः कर्मोद्यतः शिल्पवित् ।।**

**कुब्जांशः कुनखी समांसलभुजः प्रागल्भवान् धर्मविद्।**

**बन्धुद्विट् न बलात्-समैति च वंशं साम्नैकसाध्योऽश्वजः ।। ९।।**

**कठिणपदार्थः=** व्यादीर्घास्याशिरोधरः=व्यादीर्घमतिः दीर्घमास्यं मुखं शिरोधर ग्रीवा च यस्य पितृधनः=जनकवित्तान्वितः, त्यागी=दाता, कविः=काव्याज्ञा, वीर्यवान्=बली, वक्ताः सम्भाषणे दक्षः, स्थूलरदश्रवाधरनसः, स्थूला =महत्प्राणा, रदा= दन्ताः श्रवसी=कर्णौ, अधर=ओष्ठः, नसः =नासिका घ्राणः, एते सर्वे स्थूला यस्य। कर्मोद्यतः सर्वकार्याणाम् उद्यमशीलः, शिल्पज्ञः, लिपिपुस्तकचित्रज्ञः, कुब्जांसः=अस्पष्टस्कन्धः, कुनखी=कुत्सितनखः, समांसलभुजः=पीनबाहुः, प्रागल्भ्यवान्=अतिप्रतिभायुक्तः, धर्मवित्=धर्मज्ञः, बन्धुद्विट्=बन्धूनां प्रीतिभाक्, द्वेष्टा, बलात् हठात् =आक्रमणात्, वशं संविधेयतां वश्यतां न समेति नायाति। साम्ना प्रीत्या एकैनैव गुणेन साध्यः स्वीक्रियते एवं विधो अश्वज्ञो धनुषि स्थिते चन्द्रे जातो भवति।

**अवबोधप्रश्नः**

6. धनुराशौ जातस्य स्वरूपं लिखत

---

**।।मकरस्थे चन्द्रे फलम्।।**

नित्यं लालयति स्वदारतनयान् धर्मध्वजः, मिथ्याधार्मिकः, अधःकृशः, स्वक्षः, क्षामकटिः, कृशजघनः गृहीतवचनः उक्तग्राहकः यदुच्यते तत्सकृदेव गृह्णाति। सौभाग्ययुक्तः, अलसः। अटनः, सत्वाधिकः, बलाधिको वा, काव्यकृत्, लुब्धः, अगम्यासु, जरदङ्गनासु, सन्त्यक्तलज्जः विमुक्तव्रीडः,अघृणः एवं विधो मनुजो मकरस्थे चन्द्रे जातो भवति।

**नित्यं लालयति स्वदार तनयान् धर्मध्वजोऽधः कृशः।**

**स्वक्षः क्षाम कटिर्गृहीत वचनः सौभाग्ययुक्तोऽलसः ।।**

**शीतालुर्मनुजोऽटनश्च मकरे सत्वाधिकः काव्य कृत्**

**लुब्धोऽगम्य जराङ्गनासु निरतः सन्त्यक्त लज्जोऽघृणः ।। १०।।**

**कठिणपदार्थः**=स्वदारतनयान्=स्वकलत्रं, तनयांश्च पुत्रान् लालयति प्रीत्या भजते। धर्मध्वजः=दाम्भिकः, मिथ्याधार्मिकः, अधःकृशः अधोभागादतिदुर्बलः, स्वक्षः=शोभननेत्रः, क्षामकटिः, कृशजघनः=गृहीतवचनः उक्तग्राहकः यदुच्यते तत्सकृदेव गृह्णाति। सौभाग्ययुक्तः=सर्वजनप्रियः, अलसः=क्रियासु अपटुः शीतालुः शीतं न सहते। अटनः= परिभ्रमणशीलः, सत्वाधिकः=उदारचेष्टः, बलाधिको वा, काव्यकृत्=विद्वान्, लुब्धः= लोभाभिभूतः, अगम्यासु अगमनीयासु निकृष्टजातिषु जरदङ्गनासु वृद्धस्त्रीषु निरतः, सन्त्यक्तलज्जः विमुक्तव्रीडः,अघृणः=निर्दयः एवं विधो मनुजो=मनुष्यो मकरस्थे चन्द्रे जातो भवति।

**अवबोधप्रश्नाः**

7. **मकरराशौ जातस्य स्वरूपं लिखत।**

---

**।।कुंभे चन्द्रे जन्मनि जातस्य निसर्गः।।**

करभगलः सशिरालुः शिरासन्ततः खराः कर्कशाः लोमा यस्याः सा लोमेसा दीर्घा अत्युच्चा तनुः शरीरं यस्य। पृथू विस्तीर्णौ चरणौ पादौ तथा ऊरू जानूपरिभागौ पृष्ठं देहपश्चिमभागे जघनं नितम्बस्थानम् आस्यं, कटिश्च वस्तिः यस्यः सः पृथुचरणोरूपृष्ठजघनास्यकटिः, तथा जरठः, परवनितासु, परार्थेषु पापे च निरतः सक्तः, क्षयवृद्धियुतः उपचयपापचयैर्युक्तः, प्रियकुसुमानुलेपनसुहृत् कुसुमानि, पुष्पाणि, अनुलेपनं समालम्भनं सुहृदो मित्राणि यस्य। अध्वसहः एवं विधो घटजः कुम्भस्थे चन्द्रमसि जातो भवति।

**करभगलः शिरालुः खरलोमशदीर्घतनुः, पृथुचरणोरुपृष्ठजघनास्य कटिर्जरठः ।**

**परवनितार्थ पापनिरतः क्षयवृद्धियुतः,प्रियकुसुमानुलेपन सुहृद्‌ घटजोऽध्व सहः ।। ११।।**

**कठिणपदार्थः**=करभगलः=उष्ट्रसमग्रीवः, सशिरालुः =शिरासन्ततः, खराः=कर्कशाः लोमा यस्याः सा लोमेसा दीर्घा अत्युच्चा तनुः शरीरं यस्य। पृथू=विस्तीर्णौ, चरणौ= पादौ तथा ऊरू= जानूपरिभागौ पृष्ठं= देहपश्चिमभागे जघनं= नितम्बस्थानम् आस्यं=मुखं , कटिश्च वस्तिः यस्यः सः पृथुचरणोरूपृष्ठजघनास्यकटिः, तथा जरठः =मूर्खः, परवनितासु =परस्त्रीषु, परार्थेषु पापे च निरतः= सक्तः,

क्षयवृद्धियुतः= उपचयपापचयैर्युक्तः, प्रियकुसुमानुलेपनसुहृत् =कुसुमानि, पुष्पाणि, अनुलेपनं= समालम्भनं सुहृदो= मित्राणि प्रियाणि यस्य। अध्वसहः= पथिक्षम एवं विधो घटजः कुम्भस्थे चन्द्रमसि जातो भवति।

**अवबोधप्रश्नः**

8. **कुम्भराशिस्थे चन्द्रे जातस्य स्वरूपं लिखत**

## ।।मीने राशौ जातस्य निसर्गः।।

जलपरधनभोक्ता जलधनानामुदकोत्पन्नवित्तानां मुक्ताफलानां क्रयविक्रयजातानां परधनानां च भोक्ता स्वामी, दारवासोनुरक्तः दारेषु कलत्रेषु, विषयेषु, वासांसि वस्त्राणि एतेषु चानुरक्तःसमरुचिरशरीरः समं तुल्यं सर्वावयव परिपूर्णं रुचिरं दीप्तमिच्छशरीरं यस्य। तुङ्गनासोऽत्यच्चनासिकः बृहत्कः विस्तीर्णमूर्द्धा अभिभवति सपत्नान् शत्रून् अभिभवति पराभवति स्त्रीजितः, निधिः भूमवधः स्थितोऽर्थो निधिशब्देनोच्यते धनं वित्तमेषां भोगी भोक्ता पण्डितश्च शास्त्रार्थवित् एवं विधः अन्त्यराशौ मीनस्थे चन्द्रमसि जातो भवति।

**जलपरधनभोक्तादार वासोऽनुरक्तः,समरुचिर शरीरस्तुङ्ग नासो बृहत्कः ।**

**अभिभवति स पत्नान् स्त्री जितश्चारु द्रिष्टः,द्युति निधि धन भोगी पण्डितश्चान्त्यराशौ ।१२।**

**कठिणपदार्थः**=जलपरधनभोक्ता= जलधनानामुदकोत्पन्नवित्तानां, मुक्ताफलानां क्रयविक्रयजातानां परधनानां च भोक्ता स्वामी, दारवासोनुरक्तः =दारेषु कलत्रेषु, विषयेषु, वासांसि =वस्त्राणि एतेषु चानुरक्तः=समरुचिरशरीरः समं तुल्यं सर्वावयव परिपूर्णं= रुचिरं दीप्तमिच्छशरीरं यस्य। तुङ्गनासोऽत्यच्चनासिकः=बृहत्कः विस्तीर्णमूर्द्धा अभिभवति सपत्नान्= शत्रून् अभिभवति पराभवति स्त्रीजितः, निधिः = भूमवधः स्थितोऽर्थो निधिशब्देनोच्यते धनं वित्तमेषां भोगी= भोक्ता पण्डितश्च= शास्त्रार्थवित् एवं विधः अन्त्यराशौ= मीनस्थे चन्द्रमसि जातो भवति।

**अवबोधप्रश्नः**

9. **मीनराशिस्थे चन्द्रे जातस्य स्वरूपं लिखत।**

पुरुषस्य जन्मसमये यस्मिन् राशौ चन्द्रमा व्यवस्थित तस्मिन् बलवति सबले तथा तस्य च राशेः यो अधिपतौ च बलवति चछा तुहिनांशुः चन्द्रमा स च यदि स्वबलेन आत्मीयने वीर्येण पूर्वोक्तेन संयुतोऽन्वितः स्याद्भवेत् एवमेतेषु त्रिषु यदि सबलत्वं विद्यते, तदा यथोक्तराशिस्वरूपं जातो पुरुषो भवति। यथा उक्तं कथितफलानाम् अविकलदातेति। अनया सामग्र्य स चन्द्रः कथितफलानाम् उक्त,फलरूपाणाम् अविकलानां परिपूर्णानां दाता भवति, एषां मध्याद् द्वयो बलवतोः मध्ये युक्तं स्वरूपं प्राप्नोति। एकस्मिन् बलवति हीनं किञ्चित् , न कस्मिश्चिद् बलवति, तदुक्तं स्वरूपं न किञ्चिद्भवति। शशिवरदत इति। अतो अस्मात् चन्द्रवत् परिक्ल्प्याः। यत्र राशौ स्थिता भवन्ति, तदाश्रयेण वक्ष्यमाणं स्वरूपं दास्यन्ति। तदपि चन्द्रवत्। एतदुक्तं भवति। बलवति राशौ तदधिपतौ च बलवति यस्य ग्रहस्य राशिस्वरूपं पठ्यते तस्मिन्नपि बलवति तदधिपतौ च सम्पूर्णं राशिस्वरूपं भवति। यद्येकयोः च वलवतोः मध्यमोनम् इति न कस्मिंश्चिद् बलवति। नैतत्किञ्चिदिति। चन्द्रराशिस्वभाव इति।

**बलवति राशौ तदधिपतौ च स्व बलयुतः स्याद् यदि तुहिनांशुः ।**

**कथित कलानाम् अविकलदाता शशिवद् अतोऽन्येत्यनुपरिचिन्त्याः ।। १३।।**

**कठिणपदार्थः**- जलपरधनभोक्ता=जलधनानामुदकोत्पन्नवित्तानां मुक्ताफलानां क्रयविक्रयजातानां परधनानां च भोक्ता स्वामी, दारवासोनुरक्तः दारेषु =कलत्रेषु, विषयेषु, वासांसि =वस्त्राणि एतेषु चानुरक्तः=समरुचिरशरीरः समं तुल्यं सर्वावयव परिपूर्णं=रुचिरं दीप्तमिच्छशरीरं यस्य। तुङ्गनासोऽत्यच्चनासिकः बृहत्कः विस्तीर्णमूर्द्धाअभिभवति सपत्नान्=शत्रून् अभिभवति पराभवति=स्त्रीजितः, निधिः = भूमवधः स्थितोऽर्थो निधिशब्देनोच्यते धनं=वित्तमेषां भोगी =भोक्ता पण्डितश्च =शास्त्रार्थवित् एवं विधः अन्त्यराशौ=मीनस्थे चन्द्रमसि जातो भवति।

**उत्तराणि-**

1. परिवर्तुललोहितनेत्रः, उष्णशाकलघुभुक्, क्षिप्रप्रसादः, अटनः कामी दुर्बलजानुः, अस्थिरधनः, अचिरवित्तः, शूरः अङ्गनावल्लभः, सेवाज्ञः पराराधनकुशलः, कुनखी, व्रणाङ्कितशिराः, मानी, सहोत्थाग्रजः

सहोत्थानाम् अग्रणी गुणप्रधानः, पाणितले, स चिह्वविशेषणाङ्कितः, अतिचपलः, क्रियासु अनवस्थितः, तोये च जले भीरुः सभयः एवं विधाः क्रिये मेषस्थिते चन्द्रमसि जातो भवति।

2. कान्तः खेलगतिः पृथूरुवदनः क्लेशसहः, प्रभुरप्रतिहताज्ञः, ककुदवान् , कन्याप्रजः, कफाधिकः, पूर्वैः, बन्धुभिः, धनैः, आत्मजैः पुत्रैश्च विरहितः, सौभाग्ययुक्तः, क्षमी इत्यर्थः। दीप्ताग्निः प्रमदाप्रियः, दृढमित्रः, मध्यांत्यसौख्यः मध्ये यौवनेंऽत्य वृद्धत्वे च सुखितः अर्थादेवबाल्ये दुःखित एवं विधो गवि चन्द्रे जातो भवति।

3. आवक्रं, समुन्नतकटिः स्त्रीनिर्जितः, सत्सुहृत्, दैवज्ञः, प्रचुरालयः, प्रभूतगृहकर्ता, क्षयधनै अपचयोपचयै चन्द्रवत्, चन्द्रक्षयवृद्धिवत्, ह्रस्वः, पीनगलः, साम्ना वशं याति, सुहृद्वत्सलः, तोयोद्यानरतः, एवं विधः स्ववेश्मसहिते शशाङ्के चन्द्रे नरः पुरुषः जातो भवति।

4. तीक्ष्णः, स्थूलहनुः, पिङ्गेक्षणः, अल्पात्मजः, स्त्रीद्वेषी, प्रियमांसः, काननगः, अगः, एते प्रिया अकरणीयेऽर्थे कुप्यति, चिरं, केचिद् काण्डे अकाले। क्षुत्प्रसिद्धा तृष्णा पिपासा, उदरं, दान्ता, मनश्चित्तमेभ्यो जाता रुजः पीडास्ताभिः, त्यागवान्, विक्रान्तः, स्थिरधीः, गर्वितमनाः, अभिमानसंयुक्तः, मातुर्विधेयो जननीवश्यः भक्तः इत्यर्थः। एवं विधो सिंहस्थे चन्द्रे जातो भवति।

5. शुचिः परधननाद्यलुब्धः, श्रोत्रियो वा, स्त्रीजितः, प्रांशुः, उन्नतनासिकः, कृशचलद्गात्रः, दुर्बलशिथिलावयवः, परिभ्रमणशीलः,अर्थान्वितः, हीनाङ्गः, अपरिपूर्णावयवः क्रयेषु विक्रयेषु च कुशलः शक्तः देवद्विनामा सभ्यपर्यायद्वितीयाभिधानः, सरुक् , बन्धूनां स्वकुटुम्बानाम् उपकारकृद्धितकारी तैश्च बन्धुभिः, विरुषितः, भर्त्सितः त्यक्तश्च एवं विधः सप्तमे तुलास्थे चन्द्रमसि जातो भवति।

6. व्यादीर्घास्याशिरोधरः, जनकवित्तान्वितः, त्यागी, कविः, वीर्यवान्, वक्ताः, स्थूलरदश्रवाधरनसः, कर्मोद्यतः, शिल्पज्ञः, लिपिपुस्तकचित्रज्ञः, कुब्जांसः, अस्पष्टस्कन्धः, कुनखी, समांसलभुजः, पीनबाहुः, प्रागल्भ्यवान्, धर्मज्ञः, बन्धुद्विट्, बन्धूनाम् प्रीतिभाक्, द्वेष्टा, बलात् हठात् आक्रमणात्, वशं संविधेयतां साम्ना एवं विधो अश्वज्ञो धनुषि स्थिते चन्द्रे जातो भवति।

7. नित्यं लालयति स्वदारतनयान् धर्मध्वजः, मिथ्याधार्मिकः, अधःकृशः, स्वक्षः, क्षामकटिः, कृशजघनः गृहीतवचनः उक्तग्राहकः यदुच्यते तत्सकृदेव गृह्णाति। सौभाग्ययुक्तः, अलसः। अटनः, सत्वाधिकः,

बलाधिको वा, काव्यकृत्, लुब्धः, अगम्यासु, जरदङ्गनासु, सन्त्यक्तलज्जः विमुक्तव्रीडः,अघृणः एवं विधो मनुजो मकरस्थे चन्द्रे जातो भवति।

8. करभगलः सशिरालुः शिरासन्ततः पृथूरूचरणौ, कटिश्च वस्तिः यस्यः सः, परवनितासु, परार्थेषु पापे च निरतः सक्तः, क्षयवृद्धियुतः उपचयपापचयैर्युक्तः, प्रियकुसुमानुलेपनसुहृत् कुसुमानि, पुष्पाणि, अनुलेपनं समालम्भनं सुहृदो  मित्राणि यस्य। अध्वसहः एवं विधो घटजः कुम्भस्थे चन्द्रमसि जातो भवति।

9. जलपरधनभोक्ता, दारवासोनुरक्तः, समरुचिरशरीरः, तुङ्गनासः, बृहत्कः विस्तीर्णमूर्द्धा अभिभवति, पराभवति स्त्रीजितः, निधिः भूमवधः स्थितोऽर्थौ पण्डितश्च एवं विधः अन्त्यराशौ मीनस्थे चन्द्रमसि जातो भवति।

## ।।राशिशीलाध्यायः।।

**उद्देश्यम्-**

- मेषवृषगते अर्के जातस्य स्वरूपम्।
- मिथुनकर्ककसिंहकन्यास्थे जातस्य स्वरूपम्।
- तुलावृश्चिकधन्विमकरस्थे अर्के जातस्य स्वरूपम्।
- कुम्भमीनगते अर्के जातस्य स्वरूपम्।
- मेषवश्चिकवृषतुलास्थे कुजे जातस्य स्वरूपम्।
- मिथुनकन्याकर्काटस्थे भैमे जातस्य स्वरूपम्।
- सिंहधनुमीनकुम्भमकरस्थे भौमे जातस्य स्वरूपम्।
- मेषवृश्चिकतुलावृषगते बुधे जातस्य स्वरूपम्।
- मिथुनकर्कटस्थे बुधे जातस्य स्वरूपम्।
- सिंहकन्यागते बुधे जातस्य स्वरूपम्।
- मकरकुम्भधनुमीनगते बुधे जातस्य स्वरूपम्।
- मेषवृश्चिकवृषतुलमिथुनकन्यागते जीवे जातस्य स्वरूपम्।
- कर्कटसिंहधन्विमीनकुम्भमकरस्थे जीवे जातस्य स्वरूपम्।
- मेषवृश्चिवृषतुलागते शुक्रे जातस्य स्वरूपम्।
- मिथुनकन्यामकरकुम्भस्थे शुक्रे जातस्य स्वरूपम्।
- कर्काटकसिंहधनुमीनस्थे शुक्रे जातस्य स्वरूपम्।
- मेषवृश्चिकमिथुनकन्यागते सौरे जातस्य स्वरूपम्-
- वृषतुलाकर्कटसिंहस्थे सौरे जातस्य स्वरूपम्।
- धनुमीनमकरकुम्भगते सौरे जातस्य स्वरूपम्.
- मेषादिषु लग्नेषु चन्द्राक्रान्तराश्युक्तस्वरूपम्-

### ।। मेषे अर्के जातस्य स्वरूपम् ।।

प्रथितः, अटनः, अल्पवित्तः, आयुधभृत् एवं विधः क्रियगे भानौ जातो भवति। एतच्च फलं यदि परमोच्चं वर्जयित्वा अन्यत्र स्थितेऽर्के चैतत्फलम् दोषभाग् जातो न भवति। तद्यथा अल्पवित्तो बहुवित्तो न भवति, अटनो न भवति, आयुधभृतोऽनुयायिनो भवन्ति। अन्ये तु पुनः पूर्वोक्तगुणाः। प्रथितश्चतुरो भवति। गवीत्यादि। वस्त्राम्बरैः सुगन्धद्रव्यैः पण्यैश्च जीवति।

**।। वृषगते अर्के जातस्य स्वरूपम्।।**

वनिताद्विट्, गेये गीते वाद्ये च वादनविधौ कुशलः शिक्षितः, एवं विधो गवि वृषस्थे सूर्यो जातो भवति।

**प्रथितश्चतुरोऽटनोऽल्प वित्तः क्रियगे त्वायुधभृद् वितुङ्गभागे।**

**गविवस्त्रसुगन्धपण्यजीवीवनिताद्विट् कुशलश्च गोयवाद्ये।। १।।**

**शब्दार्थः**-प्रथितः=प्राख्यातः, चतुरः=दक्षः, अटनः=परिभ्रमणशीलः, अल्पवित्तः=स्तोकार्थः, आयुधभृत्=शस्त्रधारणजीवी एवं विधिः क्रियगे=मेषस्थे भानवादित्ये जातो भवति। एतच्च फलं वितुङ्गभागे यदि तत्रैव मेषस्थः आदित्यः, परमोच्चस्थो भवति, तुङ्गभागं=परमोच्चं वर्जयित्वा अन्यत्र स्थितेऽर्के चैतत्फलम् दोषभाग् जातो न भवति। तद्यथा अल्पवित्तो बहुवित्तो न भवति, अटनो न भवति, आयुधभृतोऽनुयायिनो भवन्ति। अन्ये तु पुनः पूर्वोक्तगुणाः। प्रथितश्चतुरो भवति। गवीत्यादि। वस्त्राम्बरैः=सुगन्धद्रव्यैः पण्यैश्च जीवति। वनिताद्विट् =स्त्रीषु द्वेष्टा, गेये =गीते वाद्ये च वादनविधौ कुशलः=शिक्षितः, एवं विधो गवि=वृषस्थे सूर्यो जातो भवति।

**बोधप्रश्नः**

1. मेषवृषगते अर्के जातस्य स्वरूपम्।

**मिथुनस्थे अर्के जातस्य स्वरूपम्।**

विद्या ज्योतिषविद्यावान्, ज्योतिषशास्त्रज्ञः, वित्तवान् एवं विधो मिथुनस्थे भानौ जातो भवति।

**कर्के अर्के जातस्य स्वरूपम्।**

तीक्ष्णः, अस्वः, परकार्यकृद्, श्रमपथक्लेशैः, दुःखैश्च सर्वकालं संयुज्यते, एवं विधः कुलीरस्थे कर्कटगते भानौ जातो भवति।

**।। सिंहस्थे अर्के जातस्य स्वरूपम्।।**

सिंहस्थे इति। वनम्, शैलः, गोकुलः, एतेषु स्थानेषु रतिः निवासशीलः तदासक्त इति। वीर्यान्वितः अज्ञः मूर्खः एवं विधः पुरुषः सिंहस्थे अर्के जातो भवति।

**।। कन्यास्थे अर्के जातस्य स्वरूपम्।।**

लिपिः लेख्यं, काव्यं कवेः कर्म, गणितं, ज्ञानं एतैः अन्वितो युक्तः, स्त्रीवपुः, एवं विधः कन्यास्थे अर्के जातो भवति।

**विद्याज्योतिषवित्तवान् मिथुनगे भानौ कुलीरे स्थिते।**

**तीक्ष्णोऽस्वः पर कार्य कृच्छ्रम पथ क्लेशैश्च संयुज्यते ।।**

**सिंहस्थे वनशैलगो कुलरतिर्वीर्यान्वितोऽज्ञः पुमान् ।**

**कन्यास्थे लिपि लेख्य काव्य गणित ज्ञानान्वितः स्त्री वपुः ।। २।।**

**कठिणपदार्थः**- विद्या ज्योतिषविद्यवान् पण्डितः, ज्योतिषवान्=ज्योतिषशास्त्रज्ञः वित्तवान्= धनी एवं विधो मिथुनस्थे भानौ जातो भवति। तीक्ष्णः= उग्रः,अस्वः= दरिद्रः, परकार्यकृदन्येषां=कार्यकर्ता, श्रमपथक्लेशैः = श्रमेण= खेदन यथाऽध्वना क्लेशैः = दुःखैश्च सर्वकालं = संयुज्यते, एवं विधः कुलीरस्थे=कर्कटगते भानौ जातो भवति। सिंहस्थ इति। वनम् =अरण्यं, शैलः=पर्वतः, गोकुलः=गोवाटः., एतेषु स्थानेषु रतिः=निवासशीलः तदासक्त इति। वीर्यान्वितः=बली, अज्ञः=मूर्खः एवं विधः पुरुषः सिंहस्थे अर्के जातो भवति। लिपिः= अक्षरविन्यास लेख्यंचित्रकर्म, काव्यं कवेः कर्म, गणितं=ग्रहगणितादि, ज्ञानं=विज्ञानम् एतैः अन्वितो युक्तः, स्त्रीवपुः= स्त्रीतुल्यशरीरः, एवं विधः कन्यास्थे अर्के जातो भवति।

अवबोधप्रश्नाः

2. **ज्योतिषविद्यां रविः कस्मिन् राशौ सति फलं विदधाति?**

3. **कर्कराशिगते भानौ कीदृशं फलं दधाति?**

**जातस्तौलिनि शौण्डिकोऽध्वनि रतो हैरण्यको नीचकृत्**

**क्रूरः साहसिको विशार्जितधनः शस्त्रान्तगोऽलिस्थिते ।**

**सत्पूज्यो धनवान् धनुर्धरगते तीक्ष्णो भिषक्कारुको**

**नीचोऽज्ञः कुवणिङ् मृगे अल्पधनवांल्लब्धोऽन्य भाग्यैर्रतः ।। ३।।**

**।। कुंभस्थे अर्के जातस्य स्वरूपम्।।**

नीचः, तनयैः जनवल्लभ्येन च विरहितः, अस्वः निर्धनः, एवं विधो घटे कुंभस्थे अर्के जातो भवति।

**।।मीनस्थे अर्के जातस्य स्वरूपम्।।**

तोयोत्तं, मुक्ताफलादि तत्पण्येन, तद्विक्रयेण विभवम् ऐश्वर्यं यस्य। वनिताद्दतः, स्त्रीपूज्यः एवं विधः अन्त्ये मीनस्थे अर्के जातो भवति।

**।।लक्ष्मादि ज्ञानम्।।**

नक्षत्रमानवतनु इत्यादि। नक्षत्रमानवको राशिपुरुषः कालाङ्गानी इत्यादिना प्रदर्शितः तुहिनरश्मिः दिनेश एतौ समेतौ यस्मिन् राशौ स्थितौ च रशिनक्षत्रपुरुषस्य यस्मिन् अङ्गे स्थितः तत्र पुरुषस्य जातस्य लक्ष्मचिह्नं मस्तकादौ समादिशेत् वदेत्। यथा मेषस्थयोः शिरसि वृषस्थयोः मुख इत्येवम् ऊह्यम्। इति आदिक्यराशिस्वभावः।

**नीचो घटे तनय भाग्य परिच्युतोऽस्व।स्तोयोत्थ पण्य विभवो बनिताद् ऋतोऽन्त्ये।**

**नक्षत्र मानव तनु प्रतिमे विभागे।लक्ष्मादिशेत् तुहिनरश्मिदिनेशयुक्ते ।। ४।।**

**कठिणपदार्थः**=नीचः= कुलानुचिताधर्मकर्मकृत्, तनयैः= पुत्रैः भाग्यैश्च परिच्युतः= त्यक्तः पुत्रैः जनवल्लभ्येन च विरहितः, अस्वः =निर्धनः, एवं विधो घटे कुंभस्थे अर्के जातो भवति। तोयोत्तं= जलोत्पन्नं मुक्ताफलादि

तत्पण्येन तद्विक्रयेण विभवम्= ऐश्वर्यं यस्य। वनितादृतः= स्त्रीपूज्यः एवं विधः अन्त्ये मीनस्थे अर्के जातो भवति। नक्षत्रमानवतनु इत्यादि। तुहिनरश्मिः =चन्द्रः दिनेश= आदित्यः ।

**बोधप्रश्नः**

4. **मीनस्थे अर्के जातस्य स्वरूपम् लिखत?**

**।। स्वराशिस्थ कुजे जातस्य फलम् ।।**

नरपतिः सत्कृतः, अटनः, चमूपः, वणिक्, सधनाः,क्षततनुः, चौरतस्करः भूरिविषयः विप्रकीर्णेन्द्रियः एवं विधान् स्वगृहे मेषवृश्चिकस्थः कुजः भौमः जनयेत्।

**।।शुक्रराशिगते कुजे फलम्।।**

युवतिजितः सुहृत्सु विषमः सक्रूरस्वभावः परदाररतः, कुहुकज्ञः सुवेषः,भीरुः, परुषः, निस्नेहः एवं विधान् पुरुषान् सितभे शुक्रक्षेत्रे वृषे तुले च स्थितो भौमो जनयेदुत्पादयेत्।

**नरपति सत् कृतोऽटनश्चमूपवणिक् सधनः ।क्षततनुश्चौरभूरिविषयांश्च कुजः स्वगृहे ।**

**युवतिजितान् सुहृत्सु विषमान् परदाररतान्। कुहकसुवेषभीरुपौर्षान् सितभे जनयेत् ।।५।।**

**कठिणपदार्थः**=नरपतिः सत्कृतः= राजपूजितः, अटनः=परिभ्रमणशीलः, चमूपः =सेनापतिः, वणिक्= क्रयविक्रयज्ञः सधनाः= वित्तान्वितः, क्षततनुः=विक्षतदेहः व्रणितशरीरः=चौरतस्करः भूरिविषयः विप्रकीर्णेन्द्रियः एवं विधान् स्वगृहे मेषवृश्चिकस्थः कुजः= भौमः जनयेत्। युवतिजितः=स्त्रीविधेयः सुहृत्सु= मित्रेषु विषमः दुर्विधेयः सक्रूरस्वभावः परदाररतः= परयोषिति प्रसक्तः, कुहुकज्ञः =ऐन्द्रजालिकः, सुवेषः= शोभनालङ्कारः,भीरुः=सभयः परुषः=कर्कशः निस्नेहः एवं विधान् पुरुषान् सितभे= शुक्रक्षेत्रे वृषे तुले च स्थितो भौमो जनयेद् उत्पादयेत्।

**अवबोधप्रश्नः**

5. मेषगते भौमः कीदृशं फलं ददाति?

**।। बौधे मिथुनकन्यास्थे जातस्य निसर्गः ।।**

असहः तेजस्वी , तनयवान् पुत्रयुक्तः, विसुहृतः मित्ररहितः, कृतज्ञः, परोपकारशीलः गान्धर्वयुद्धकुशलः गान्धर्वे गीते युद्धे च सङ्ग्रामे प्रवेशनिर्गमव्यूहरचनादिषु च कुशलः तज्ज्ञः, कृपणः अदाता, अभयः निर्भयः, अर्थी याञ्चापरः एवं विधो बौधे मिथुनकन्यास्थे कुजे भौमे जातो भवति। अथ कर्कटस्ते भौमे जातस्य स्वरूपम् आह। चन्द्रे इति। अर्थवान् सधनः, सलिलयानसमर्जितस्वः सलिलयानेन प्लवादिना सम्यग् अर्जितं स्वं धनं येन अथवा सलिलेन जलेन यानेन गमनेनाध्वना समार्जितं स्वं धनं येन। प्राज्ञः मेधावी, विकले अङ्गहीनः , खलः दुर्जनः एवं विधश्चन्द्रे कर्कटगते भौमे जातो भवति।

**बौधे असहस्तनयवान् विसुहृत् कृतज्ञो।गान्धर्वयुद्ध कुशलः कृपणोऽभयोऽर्थी।।**

**चान्द्रे अर्थवान् सलिलयान समर्जित स्वः।प्राज्ञश्च भूमि तनये विकलः खलश्च।।६।।**

**कठिणपदार्थः** असहः= तेजस्वी, तनयवान्= पुत्रयुक्तः, विसुहृतः =मित्ररहितः, कृतज्ञः= परोपकारशीलः, गान्धर्वयुद्धकुशलः=गान्धर्वे गीते युद्धे च सङ्ग्रामे प्रवेशनिर्गमव्यूहरचनादिषु च, कुशलः=तज्ज्ञः, कृपणः= अदाता, अभयः= निर्भयः, अर्थी= याञ्चापरः एवं विधो बौधे मिथुनकन्यास्थे कुजे भौमे जातो भवति। अथ कर्कटस्थे भौमे जातस्य स्वरूपम् आह। चन्द्रे इति। अर्थवान्= सधनः, सलिलयानसमर्जितस्वः= सलिलयानेन प्लवादिना सम्यग् अर्जितं स्वं धनं येन अथवा सलिलेन= जलेन यानेन गमनेनाध्वना समार्जितं स्वं= धनं येन। प्राज्ञः =मेधावी, विकले अङ्गहीनः , खलः= दुर्जनः एवं विधश्चन्द्रे कर्कटगते भौमे जातो भवति।

**अवबोधप्रश्नः**

6. मिथुनगते भौमो कीदृशं फलं ददाति?

**।।सिंहस्थे भौमे जातस्य निसर्गः।।**

निस्वः, क्लेशसहः, कदर्थनाक्षमः, वनान्तरचरः,केचिदभयो वनचर इति पठन्ति। अभयो, वनान्तरचरोऽण्यचारी, अल्पदारत्मजो, अल्पापत्तयः, एवं विधःसिंहस्थे भौमे जातो भवति।

।।धन्विमीनस्थे भौमे**जातस्य निसर्गः।।**

अनेकरिपुः, नरेन्द्रसचिवः, ख्यातः, विदितकीर्तिः, अभयः, अल्पापत्यः, एवं विधो धन्विमीनस्थे भौमे जातो भवति।

**।।कुंभस्थे भौमेजातस्य निसर्गः।।**

दुःखार्तः, विधनः, दरिद्रः, अटनः, अनृतरतः,तीक्ष्णः, क्रूरः एवं विधः कुंभस्थे भौमे जातो भवति।

**।।मृगगते मकरस्थे भौमे जातस्य प्रकृतिः।।**

भूरिधनात्मजः, प्रभूतपुत्रः,भूपः अथवा तत्समः राजतुल्यः एवं विधो मृगगते मकरस्थे भौमे जातो भवति। इति भौमराशिस्वभावः।

**निःस्वः क्लेश सहो वनान्तर चरः सिंहे अल्पदारात्मजो**

**जैवे नैकरिपुर्नरेन्द्र सचिवः ख्यातोऽभयाल्पात्मजः ।**

**दुःखार्तो विधनोऽटनोऽनृतरतस्तीक्ष्णश्च कुम्भ स्थिते**

**भौमे भूरि धनात्मजो मृग गते भूपोऽथ वा तत् समः ।। ७।।**

**कठिणपदार्थः** निस्वः= निर्धनः , क्लेशसहः= आपद्धीरः कदर्थनाक्षमः, वनान्तरचरः= अरण्यमध्यचारी, केचिद्भयो वनचर इति पठन्ति। अभयो=भयरहितः, वनान्तरचरो=अरण्यचारी, अल्पदारत्मजो=अल्पकलत्रः, अल्पापत्तयः, एवं विधःसिंहस्थे भौमे जातो भवति। अनेकरिपुः=बह्वरिः नरेन्द्रसचिवः=मन्त्री, ख्यातः, विदितकीर्तिः, अभयः=निर्भयः, अल्पापत्यः=स्वल्पापत्यः, एवं विधो धन्विमीनस्थे भौमे जातो भवति। दुःखार्तः=नित्यं दुःखसन्तप्तः, विधनः=दरिद्रः, अटनः= परिभ्रमणशीलः अनृतरतः= असत्यभाषी,तीक्ष्णः=निरपेक्षः, क्रूरः एवं विधः कुंभस्थे भौमे जातो भवति। भूरिधनात्मजः=प्रभूतधनः प्रभूतपुत्रः,भूपः =राजा अथवा तत्समः राजतुल्यः एवं विधो मृगगते=मकरस्थे भौमे जातो भवति। इति भौमराशिस्वभावः।

**अवबोधप्रश्नः**

7. धन्विमीनगते भौमे कीदृशः नरः जायते?

---

**।।बुधे भौमर्क्षे जातस्य निसर्गः।।**

द्यूते अक्षज्ञाने, ऋणे परस्वहरणे, पाने च निरतः सक्तः, नास्तिकः शास्त्रार्थदपेतः, तार्किकः नास्ति परलोके मतिर्यस्य स नास्तिकः चौरतस्करः, निस्वः दरिद्रः, कुस्त्रीकः कुस्त्रीकभार्यः, कूटकृत् कूटकृर्ता दाम्भिकः , असत्यनिरतः, अनृतभाषी, एवं विधा जाताः सौम्ये बुधे भौमर्क्षे मेषवृश्चिकस्थे भवन्ति।

**।।वृषतुलास्थे बुधे जातस्य निसर्गः।।**

आचार्यः उपदेशकर्ता, भूरिसुतः प्रसूतापत्यः, भूरिदारो बहुकलत्र, धनार्जनमिष्टम् अस्य अर्थार्जन नित्यमुद्यतः वदान्यः दाता, गरुभक्तरताः मातृपितृगुरूणां भक्ताः एवं विधाः पुरुषाः शौक्रे वृषतुलास्थे बुधे जाता भवन्ति।

**द्यूतर्णपानरत नास्तिक चौरनिःस्वाः कुस्त्रीक कूटकृद् असत्यरताः कुजर्क्षे।**

**आचार्य भूरि सुतदारधनार्जनेष्टाः शौक्रे वदान्यगुरु भक्ति रताश्च सौम्ये ।। ८।।**

**कठिणपदार्थः** द्यूते=अक्षज्ञाने, ऋणे=परस्वहरणे, पाने च निरतः= सक्तः, नास्तिकः शास्त्रार्थदपेतः, तार्किकः नास्ति परलोके मतिर्यस्य स नास्तिकः चौरतस्करः , निस्वः =दरिद्रः, कुस्त्रीकः =कुस्त्रीकभार्यः, कूटकृत् = कूटकृर्ता दाम्भिकः, असत्यनिरतः= अनृतभाषी, एवं विधा जाताः सौम्ये=बुधे भौमर्क्षे=मेषवृश्चिकस्थे भवन्ति। आचार्यः=उपदेशकर्ता, भूरिसुतः= प्रसूतापत्यः, भूरिदारो=बहुकलत्र, धनार्जनमिष्टम् अस्य अर्थार्जन नित्यमुद्यतः वदान्यः दाता, गरुभक्तरताः =मातृपितृगुरूणां भक्ताः एवं विधाः पुरुषाः शौक्रे वृषतुलास्थे बुधे जाता भवन्ति।

**अवबोधप्रश्नः**

8. **वृषातुलास्थे बुधे जातो कीदृशो भवति?**

---

**।।मिथुनस्थे बुधे जातस्य फलम्।।**

विकत्थनः, शास्त्रकलाविदग्धः, विदग्धः, प्रियं वदो, सौख्यरतः, एवं विधः शशाङ्कजे बुधे तृतीये मिथुनस्थे जातो भवति।

**।।कर्कराशिस्थे बुधे जातस्य फलम्।।**

जलार्जितः इति। जलेन आर्जितं स्वं येन सः। स्वजनस्य बन्धुजनस्य शत्रुःएवं विधःशशाङ्कजे शीतकरर्क्षे जातो भवति।

**विकत्थनः शास्त्रकलाविदग्धः प्रियंवदः सौख्यरतस्तृतीये ।**

**जलार्जित स्वः स्वजनस्य शत्रुः शशाङ्कजे शीतकरर्क्षयुक्ते ।। ९।।**

**कठिणपदार्थः**= विकत्थनः वाचालः=असत्यवादी, शास्त्रकलाविदग्धः =शास्त्रे कलासु च गीतवाद्यनृत्यखेलचित्रकर्मसु, विदग्धः शिक्षितः, प्रियं वदो=अभिमतो वक्ता सौख्यरतः =सुखासक्तः, एवं विधः शशाङ्कजे बुधे तृतीये =मिथुनस्थे जातो भवति। जलार्जितः इति। जलेन=उदकेन आर्जितं स्वं=धनं येन सः। स्वजनस्य =आत्मीयजनस्य च बन्धुजनस्य शत्रुः=रिपुः एवं विधःशशाङ्कजे=बुधे शीतकरर्क्षे = चन्द्रकर्कटयुक्ते जातो भवति।

**अवबोधप्रश्नः**

9. चन्द्रकर्कटयुक्ते जातो कीदृशो भवति?

---

**।।सिंहस्थे बुधे जातस्य निसर्गः।।**

स्त्रीणां द्वेष्यः स्त्रीद्वेष्यः विधनसुखात्मजः, विधनः धनरहितः विसुखः विगतसुखः, विगतात्मजः पुत्ररहितः अटनः परिभ्रमणशीलः अज्ञः मूर्खः स्त्रीलोलः वनिताभिलाषी, स्वपरिभवः स्वेमेषामात्मीयानां सकाशात् परिभवो यस्य एवं विधो ज्ञे बुधे अर्कराशिगे सिंहस्थे जातो भवति।

**स्त्री द्वेष्यो विधनसुखात्मजोऽटनोऽज्ञः स्त्रीलोलः स्वपरिभवोऽर्कराशिगे ज्ञे ।**

**त्यागीज्ञः प्रचुरगुणः सुखीक्षमावान् युक्ति ज्ञो विगतभयश्च षष्ठराशौ ।। १०।।**

**कठिणपदार्थः=** स्त्रीणां द्वेष्यः = स्त्रीद्वेष्यः , विधनसुखात्मजः, विधनः= धनरहितः, विसुखः=विगतसुखः, विगतात्मजः= पुत्ररहितः, अटनः= परिभ्रमणशीलः, अज्ञः=मूर्खः, स्त्रीलोलः= वनिताभिलाषी, स्वपरिभवः= स्वेमेषामात्मीयानां सकाशात् परिभवो यस्य एवं विधो ज्ञे =बुधे अर्कराशिगे= सिंहस्थे जातो भवति।

---

**।।मकरकुंभस्थे बुधे जातस्य स्वरूपम्।।**

परकर्मकृत् अस्वः शिल्पबुद्धः शिल्पकर्मसु अनुरतमतिः ऋणवान् परस्वग्रहणशीलः, विष्टकरः आज्ञाकरः एवं विधः अर्कजर्कर्क्षे मकरकुंभस्थे बुधे जातो भवति। नृपसत्कृतः राजपूजितः नृपसम्मतो, पण्डितः, आप्तवाक्यः, व्यवहार अर्थवेत्ता आप्तमनुकूलं वाक्यं यस्य एवं विधो नवमे धन्विस्थिते बुधे जातो भवति। जितसेवकः जिताः सेवका येन परागधनदक्षः पराभिप्रायज्ञः अन्त्यशिल्पः नीचशिल्पः एवं विधो अन्त्ये मीनस्थे बुधे जातो भवति। इति बुधराशिस्वभावः ।

**परकर्मकृद् अस्वशिल्पबुद्धी ऋणवान् विष्टिकरो बुधे अर्कजऋक्षे ।**

**नृपसत्कृतपण्डिताप्तवाक्यो नवमे अन्त्ये जितसेवकान्त्य शिल्पः ।। ११।।**

**कठिणपदार्थः** परकर्मकृत् =परप्रेष्यकरः, अस्वः= दरिद्रः, शिल्पबुद्धः= शिल्पकर्मसु अनुरतमतिः = ऋणवान् परस्वग्रहणशीलः , विष्टकरः आज्ञाकरः एवं विधः अर्कजर्कर्क्षे= मकरकुंभस्थे बुधे जातो भवति। नृपसत्कृतः = राजपूजितः नृपसम्मतो वा राजवल्लभः , पण्डितः =विद्वान् , आप्तवाक्यः =व्यवहार अर्थवेत्ता आप्तमनुकूलं वाक्यं यस्य एवं विधो नवमे धन्विस्थिते बुधे जातो भवति। जितसेवकः=जिताः सेवका येन परागधनदक्षः पराभिप्रायज्ञः अन्त्यशिल्पः =नीचशिल्पः एवं विधो अन्त्ये =मीनस्थे बुधे जातो भवति। इति बुधराशिस्वभावः।

**अवबोधप्रश्नः**

10. मीनस्थे बुधे कीदृशो जायते?

**।।मिथुनकन्यास्थे जीवे जातस्य निसर्गः।।**

सेनानीः, बहुवित्तः,बहुदारः, बहुतनयः, दानशीलः सुभृत्य शोभनभृत्यः, क्षमवान्, तेजसा, कान्त्या दारागुणैः कलत्र सौख्यै अन्वितो युक्तः ख्यातः प्रख्यात कीर्तिः एवं विधः सुरगुरौ जीवे कौजे जातो भवति। कल्पाङ्गःस्वस्थदेहः सधनार्थः सधनः समित्रः सतनयः सुखधनमित्रपुत्रयुक्तः त्यागी दाता प्रिय सर्वजनवल्लभः एवं विधो बुधक्षेत्रे मिथुनकन्यास्थे जीवे जातो भवति।

**सेनानिर्बहुवित्तदारतनयो दाता सुभृत्यः क्षमी ।**

**तेजो दार गुणान्वितः सुर गुरौ ख्यातः पुमान् कौज भे ।**

**कल्पाङ्गः सधनार्थ मित्र तनयस्त्यागी प्रियः शौक्र भे**

**बौधे भूरि परिच्छदात्मजसुहृत् साचिव्ययुक्तः सुखी ।। १२।।**

**अवबोधप्रश्नः**

11. मीनगते गुरौ जातः कीदृशो भवति?

---

रत्नानि, सुताः, धनं, दाराः, विभव एश्वर्यं, प्रज्ञा,सुखभावः, एतैः अन्वितैः संयुक्तः एवं विधः चान्द्रे, कर्कटस्थे सुरगुरौ जीवे जातो भवति। बलनायकः सेनाप्रधानः अन्यच्च यच्चन्द्रभे कर्कटस्थे उक्तं रत्नसुतस्वदारविभवप्रज्ञा सुखै अन्वितैः एवं विधः सिंहस्थे जीवे स्याद् भवेत्। माण्डलिकः सेनानाथो वा अथवा धनी वित्तवान् एवं स्वर्क्षे स्वराशौ धन्विमीनस्थे जातो भवति। योनि कर्कटस्थे जीवे फलान्यभिहितानि रत्नसुतस्वदारवुभवप्रज्ञासुखै अन्वितैः कुम्भस्थे गुरौ भवन्ति। अत्रान्येन मतभेदाः भवन्ति। नीचः कुम्भे जनयति कर्मणि तोयाश्रये सक्तम्। नीचा कुलानुचिताधर्मकर्मकृचत्, अल्पवित्तः, असुखीदुःखितः एवं विधः मकरस्थे जीवे जातो भवति।

**चान्द्रे रत्नसुतस्वदारविभवप्रज्ञासुखैरन्वितः ।**

**सिंहे स्याद् बल नायकः सुर गुरौ प्रोक्तं च यच्चन्त्र भे ।**

**स्वऋक्षे माण्डलिको नरेन्द्र सचिवः सेनापतिर्वाधनी**

**कुम्भे कर्कटवत् फलानि मकरे नीचोऽल्प वित्तोऽसुखी ।। १३।।**

**कठिणपदार्थः=** रत्नानि मणयः, सुताः= पुत्राः, स्वं= धनं, दाराः= कलत्रं, विभव= एश्वर्यं, प्रज्ञा=मेधा,सुखं= सुखभावः, एतैः अन्वितैः संयुक्तः एवं विधः चान्द्रे, चन्द्रक्षेत्रे, कर्कटस्थे= सुरगुरौ जीवे जातो भवति। बलनायकः= सेनाप्रधानः अन्यच्च, यच्चन्द्रभे= कर्कटस्थे, उक्तं रत्नसुतस्वदारविभवप्रज्ञा= सुखै अन्वितैः एवं विधः सिंहस्थे जीवे स्याद् भवेत्। माण्डलिकः= मण्डलाधिपतिः सेनानाथो वा अथवा धनी= वित्तवान् एवं स्वर्क्षे =स्वराशौ धन्विमीनस्थे जातो भवति। नीचा= कुलानुचिताधर्मकर्मकृचत्, अल्पवित्तः= स्तोकार्थः, असुखीदुःखितः एवं विधः मकरस्थे जीवे जातो भवति।

**अवबोधप्रश्नः**

12. मकरस्थे जीवे जातो कीदृशो भवति?

**।।मेषवृश्चिकस्थे शुक्रे जातस्य निसर्गः।।**

परयुवतिरतः परस्त्रीणाम् अर्थवादैः अपराधनुवचनैः हतविभवो, कुलपांसनः कुलकलङ्कभूतः एवं विधः सिते भौमक्षेत्रे मेषवृश्चिकस्थे जातो भवति।

**।।वृषातुलास्थे शुक्रे जातस्य निसर्गः।।**

स्वबलेत्यादि । स्वबलेनात्मीयवीर्येण स्वमत्या आत्मीयबुद्ध्या च धनं यस्यासौ स्वबलमतिधनः नरेन्द्रपूज्यः स्वजनविभुः बन्धुप्रधानः प्रथितः अभयः एवं विधः वृषातुलास्थे सिते जातो भवति।

**परयुवति रतस्तदर्थवादैर्हृत विभवः कुलपांसनः कुजर्क्षे ।**

**स्व बल मति धनो नरेन्द्र पूज्यः स्व जन विभुः प्रथितोऽभयः सिते स्वे ।। १४।।**

**कठिणपदार्थः=** परयुवतिरतः =परस्त्रीषु सक्तः तदर्थवादस्तासां परस्त्रीणाम् अर्थवादैः अपराधनुवचनैः हतविभवो= अपहृतार्थः, कुलपांसनः= कुलकलङ्कभूतः एवं विधः सिते = शुक्रे, कुजर्क्षे=भौमक्षेत्रे, मेषवृश्चिकस्थे जातो भवति। स्वबलेत्यादि । स्वबलेनात्मीयवीर्येण= स्वमत्या आत्मीयबुद्ध्या च, धनं यस्यासौ स्वबलमतिधनः नरेन्द्रपूज्यः =राजवल्लभः, स्वजनविभुः=बन्धुप्रधानः प्रथितः विख्यातः, अभयः=निर्भयः एवं विधः स्व स्वक्षेत्रे =वृषातुलास्थे सिते= शुक्रे जातो भवति।

**अवबोधप्रश्नः**

13. वृषतुलास्थे शुक्रे जातो कीदृशो जायते?

**।।शुक्रे मिथुनस्थे जातस्य निसर्गः।।**

नृपकृत्यकरः अर्थवान्, कलावित्, कलाज्ञः, गीतवाद्यादिकवेत्ता एवं विधः अमरारिपूज्ये शुक्रे मिथुनस्थे जातो भवति।

**।।शनिक्षेत्रगते शुक्रे जातस्य निसर्गः।।**

सुभगः स्त्रीविजितः प्रमदावशगः कुनार्यां कुत्सितस्त्रियां रतः सक्तः एवं विधः शुक्रे रविजर्क्षगते मकरकुम्भस्थे जातो भवति।

**नृपकृत्यकरोऽर्थवान् कलाविन् मिथुने षष्ठगते अतिनीचकर्मा**

**रविजर्क्षगते अमरारिपूज्ये सुभगः स्त्रीविजितो रतः कुनार्य्याम्**।। १५।।

**कठिणपदार्थः=** नृपकृत्यकरः= राजकर्मकर्ता, अर्थवान्=धनी, कलावित्= कलाज्ञः, गीतवाद्यादिकवेत्ता एवं विधः अमरारिपूज्ये= दैत्यगुरौ शुक्रे मिथुनस्थे जातो भवति। सुभगः =सर्वजनप्रियः, स्त्रीविजितः= प्रमदावशगः, कुनार्यां =कुत्सितस्त्रियां, रतः =सक्तः एवं विधः शुक्रे रविजर्क्षगते= मकरकुम्भस्थे जातो भवति।

**।।शुक्रे कर्कटस्थे जातस्य फलम्।।**

द्विभार्यः अर्थी याञ्चापरः भीरुः सभयःप्रबलमदो अतिदृप्तः प्रबलशोको अति दुःखितःएवं विधो शुक्रे कर्कटस्थे जातो भवति।

**।।सिंहस्थे शुक्रे जातस्य प्रकृतिः।।**

स्त्रीप्राप्तधनः प्रधानस्त्रीकः मन्दतनयः अल्पापत्यः एवं विधौ हरौ सिंहस्थे शुक्रे जातो भवति।शुक्रराशिस्वभावः।

**द्विभार्योऽर्थीभीरुः प्रबलमदशोकश्च शशिभेहरौ योषाप्तार्थः प्रवरयुवतिर्मन्दतनयः ।**

**गुणैः पूज्यः सस्वस्तुरगसहिते दानवगुरौझषे विद्वान् आढ्यो नृपजनितपूजोऽतिसुभगः।१६।**

**कठिणपदार्थः**=द्विभार्यः=द्विस्त्रीकः, अर्थी= याञ्चापरः, भीरुः= सभयः,प्रबलमदो=अतिदृप्तः, प्रबलशोको= अतिदुःखितः,एवं विधो दानवगुरौ=दैत्यपूज्ये शुक्रे, शशिभे =कर्कटस्थे जातो भवति। येषाप्तार्थः =स्त्रीप्राप्तधनः प्रवरयुवति =प्रधानस्त्रीकः, मन्दतनयः= अल्पापत्यः एवं विधौ हरौ =सिंहस्थे शुक्रे जातो भवति।शुक्रराशिस्वभावः।

**अवबोधप्रश्नः**

14. सिंहस्थे शुक्रे जातो कीदृशो भवति?

---

**।।अजे मेषस्थे जातस्य फलम्।।**

मूर्खोऽज्ञानोपेतः अटनः कपटवान् मित्ररहितः एवं विधो यमे सौरे अजे मेषस्थे जातो भवति। बन्धवधभाक् बन्धनं, बधस्ताडनं भजते चपलः क्रियास्वनवस्थितः, निर्दयः एवं विधः वृश्चिकस्थे जातो भवति। निर्ह्रीसुखार्थतनयः निर्गता ह्री लज्जा यस्या सा निर्लज्जः निःसुखो दरिद्रः निस्तनयः पुत्ररहितः लेख्ये आलेख्यकर्मणि स्खलितः अज्ञः रक्षापतिः भवत्यारक्षकः प्रधाननाथः एवं विधो बुधक्षेत्रे सौरे जातो भवति।

**मूर्खोऽटनः कपटवान् विसुहृद् यमे अजे कीटे तु बन्ध वध भाक् चपलोऽघृणश्च**

**निह्रीर्सुखार्थ तनयः स्खलितश्च लेख्ये रक्षा पतिर्भवति मुख्य पतिश्च बौधे।** १७।

**कठिणपदार्थः=** मूर्खः=अज्ञानोपेतः, अटनः=परिभ्रमणशीलः, कपटवान्=दांभिकः विसुहृत्=मित्ररहितः एवं विधो यमे सौरे=अजे मेषस्थे जातो भवति। बन्धवधभाक्= बन्धं=बन्धनं,बधस्ताडनं बन्धबधौ भजते चपलः= क्रियास्वनवस्थितः, अघृणः=निर्दयः एवं विधः कीटे वृश्चिकस्थे जातो भवति। निर्ह्रीसुखार्थतनयः= निर्गता ह्री लज्जा यस्या सा निर्लज्जः, निःसुखो =दुःखितः, निरर्थो=दरिद्रः, निस्तनयः=पुत्ररहितः, लेख्ये=आलेख्यकर्मणि स्खलितः अज्ञः=रक्षापतिः भवत्यारक्षकः मुख्यपतिः= प्रधाननाथः एवं विधो बौधे बुधक्षेत्रे मिथुनकन्यास्थे= सौरे जातो भवति।

**अवबोधप्रश्नः**

15. **मिथुनस्थे सौरे जातस्य स्वरूपम् किम्?**

---

।।वृषस्थे शनैश्चरे जातस्य फलम्।।

वर्ज्यस्त्रीषु इष्टः, न बहुविभवः न प्रभूतैः, अल्पैश्वर्युक्तः, भूरिभार्यः एवं विधो वृषस्थे शनैश्चरे जातो भवति।

**।।कर्कटके शनौ जातस्य फलम्।।**

ख्यातः विदितकीर्तिः समूहानां पुराणां  बलानां सैन्यानां ग्रामाणां च पूज्ये मान्यः, अर्थवान् एवं विधः स्वोच्चराशौ तुलास्थे सौरे जननीवियुक्तः पुत्ररहितः मूर्खः एवं विधः कर्कटस्थे सौरे जातो भवति।

सिंहेनार्य इति। अनार्यः विसुखो दुःखितः पुत्ररहितः विष्टिकृद्भारवाहकः एवं विधः सिंहस्थे शनैश्चरे जातो भवति।

**वर्ज्यस्त्रीष्टो न बहु विभवो भूरिभार्यो वृषस्थे**

**ख्यातः स्वोच्चे गणपुरबलग्रामपूज्योऽर्थवांश्च ।**

**कर्किण्यस्वो विकलदशनो मातृहीनोऽसुतोऽज्ञः**

**सिंहे अनार्यो विसुखतनयो विष्टिकृत् सूर्यपुत्रे।१८।**

**कठिणपदार्थः=** वर्ज्यसु= अगम्यसु, स्त्रीषु=योषित्सु,  इष्टः =वल्लभः, न बहुविभवः =न प्रभूतैः=ऐश्वर्ययुक्तैः अल्पैश्वर्युक्तः, भूरिभार्यः=प्रभूतदारःएवं विधो वृषस्थे सूर्यपुत्रे=शनैश्चरे जातो भवति। ख्यातः=विदितकीर्तिः, गणनां समूहानां पुराणां नगराणां  बलानां=सैन्यानां ग्रामाणां च पूज्ये मान्यः, अर्थवान् =सधनः एवं विधः स्वोच्चराशौ =तुलास्थे  सौरे  जननीवियुक्तः असुतः=पुत्ररहितः, अज्ञः मूर्खः एवं विधः कर्कटस्थे सौरे जातो भवति।  सिंहेनार्य इति। अनार्यः=मूर्खः, विसुखो=  दुःखितः,  वितनयः= पुत्ररहितः विष्टिकृद्भारवाहकः एवं विधः सिंहस्थे सूर्यपुत्रे= शनैश्चरे जातो भवति।

**बोधप्रश्नः**

16. वृषस्थे शनैश्चरे जातो कीदृशो भवति?

---

**।।सौरे जीवक्षेत्रे जातस्य निसर्गः।।**

स्वान्तः  शुभेन कर्मणा तस्य मृत्युर्भवति। अथवान्ते शोभनं सुखादिकं यस्य।  राजगृहे सञ्जातप्रत्ययः शोभनापत्यः सज्जाय सद्धनः पुरबलग्रामाग्रनेता पुराणां नगराणां बलस्य ग्रामाणां च अग्रनेता प्रधानो नायकः  एवं विधोर्कजे सौरे जीवक्षेत्रे धन्विमीनस्थे जातो भवति।

**।।मकरकुम्भस्थे सौरे जातस्य निसर्गः।।**

अन्यस्त्रीधनसंवृतः परयोषिद्भिः परधनैश्च संवृतः संयुक्तः पुरबलग्रामग्रणीः पुराणां बलानां ग्रामाणां च अग्रणीः प्रधाननायकः मन्ददृगल्पचक्षुः मलिनः स्नानालसः स्थिरार्थः स्थिरैश्वर्यः भोक्ता एवं विधः पुमान् पुरुषः स्वक्षेत्रे मकरकुम्भस्थे सौरे जातो भवति। इति शनैश्चरराशिस्वभावः ।

एतेषु सर्वेषु ग्रहराशिस्वभावेषु बलवति राशौ तदधिपतौ च तस्मिंश्च ग्रहे बलवति जातस्य यथोक्तं राशिस्वरूपं भवति। द्वेकयोश्च बलवतोर्मध्ये समानमिति। न कस्मिंश्चिद्बलवति न किञ्चिदिति।

**स्वन्तः प्रत्ययितो नरेन्द्रभवने सत् पुत्र जायाधनो।जीवक्षेत्रगते अर्कजे पुरबलग्रामाग्रनेताथ वा।।**

**अन्यस्त्रीधनसंवृतः पुरबलग्रामाग्रणीर्मन्ददृक्। स्वक्षेत्रे मलिनः स्थिरार्थविभवो भोक्ता च जातः पुमान्।। १९।।**

**कठिणपदार्थः=** स्वान्तः=शोभनोऽन्तः पर्यन्तो यस्य स स्वान्तः शुभेन कर्मणा तस्य मृत्युर्भवति। अथवान्ते शोभनं सुखादिकं यस्य। नरेन्द्रभवने =राजगृहे प्रत्ययितः सञ्जातप्रत्ययः सत्पुत्रः= शोभनापत्यः सजाय=शोभनभार्यः सद्धनः= सद्वित्तः पुरबलग्रामाग्रनेता = पुराणां नगराणां बलस्य ग्रामाणां च अग्रनेता प्रधानो नायकः एवं विधोर्कजे =सौरे जीवक्षेत्रे=धन्विमीनस्थे जातो भवति। अन्यस्त्रीधनसंवृतः परयोषिद्भिः=परधनैश्च संवृतः= संयुक्तः पुरबलग्रामग्रणीः = पुराणां बलानां ग्रामाणां च अग्रणीः, प्रधाननायकःमन्ददृगल्पचक्षुः, मलिनः= मलोपेतः स्नानालसः, स्थिरार्थः = स्थिरवित्तः, स्थिरविभवः= स्थिरैश्वर्यः भोक्ता= असञ्चयशीलः एवं विधः पुमान् =पुरुषः स्वक्षेत्रे मकरकुम्भस्थे सौरे जातो भवति। इति शनैश्चरराशिस्वभावः। एतेषु सर्वेषु ग्रहराशिस्वभावेषु बलवति राशौ तदधिपतौ च तस्मिंश्च ग्रहे बलवति जातस्य यथोक्तं राशिस्वरूपं भवति। द्वेकयोश्च बलवतोर्मध्ये समानमिति। न कस्मिंश्चिद्बलवति न किञ्चिदिति।

**अवबोधप्रश्नः**

17. **कुम्भराशिप्राप्ते सौरे कीदृशो नरो जायते?**

---

**।।लग्नफलम्।।**

शशिरकरश्चन्द्रमास्तस्य राशिभिः सह समागमेयत्स्वरूपमुक्तं वृत्ताताम्रदृगित्यादिकं तन्मेषालग्नजातस्यापि वक्तव्यम्। एवमन्येष्वपि राशिषु वृषादिषु स्थिते चन्द्रमसि यदुक्तं तल्लग्नजातस्यापि वक्तव्यम्। यतो मुनयः सदृशं फलं वदन्ति कथयन्ति स्वरूपभेदाभावात्।

**शिशिरकरसमागमेक्षणानां सदृशफलं प्रवदन्ति लग्नजातम्।**

**फलम् अधिकम् इदं यद् अत्र भावाद् भवनभनाथ गुणैर्विचिन्तनीयम्।। २०।।**

एवं शिशिरकरसमागमसदृशं लग्नजातं फलम्। तथा च – शिशिरकराश्रतराशेरीक्षणं दृष्टिफलं वक्ष्यमाणं तथा तदेव तल्लग्नजातस्यापि वक्तव्यम्। चन्द्रे भूपबुधावित्यादि। किन्तु लग्ने फलमपि किमिदम्। यदत्र भाव इति चन्द्रराशित इदमत्र लग्नादिषु भावेष्वधिकं फलं यद्भावस्तन्वादयः। भवनगुणैः राशिगुणैः भावनाथगुणैः तत्स्वामिगुणैः विचिन्तनीयाः विचार्याः। भवनभनाथयोः गुणः सबलत्वम्। एतदुक्तं भवति। लग्ने बलवति लग्नपतौ च बलवति जातस्य शरीरपुष्टिः वक्तव्या। लग्नात् द्वितीयराशौ बलवति तदधिपतौ च बलवति जातस्य धनसमृद्धिः वक्तव्या। एवं शेषराशिबले तदधिपबले च जातस्य भ्रात्रादीनां वृद्धिः वक्तव्या। तथापि किञ्चिद् विशेषः कथयति। विपरीतं रिःफषष्ठामेषु इत्यादि। एवं तन्वादिस्थेषु राशिषुबलवत्सु तदधिपेष्वबलवत्सु च भावहानिः वक्तव्या। भवनभनाथयोः यद्येको बलवान् भवति तदा मध्यमा तदा मध्यस्था भाववृद्धिः वाच्येति। तथा च यवनेश्वरः-

**भावेशभावस्थखगस्वभावप्रधानमध्याधदर्शनाद्यैः।**

**तद्भावसम्पत्तिविपत्युपायैर्नैयाणिकं पाकमुपैति पुंसाम्।।**

---

**उत्तराणि-**

1. प्रथितः, अटनः, अल्पवित्तः, आयुधभृत् एवं विधः क्रियगे भानौ जातो भवति।
2. विद्याज्योतिषविद्यावान्, मिथुनस्थे भानौ जातो भवति।
3. तीक्ष्णः, अस्वः, परकार्यकृद्, श्रमपथक्लेशैः, दुःखैश्च सर्वकालं संयुज्यते, एवं विधः कुलीरस्थे कर्कटगते भानौ जातो भवति।
4. वनितादृतः, स्त्रीपूज्यः एवं विधः अन्त्ये मीनस्थे अर्के जातो भवति।

5. नरपतिः सत्कृतः, अटनः, चमूपः, वणिक्, सधनाः, क्षततनुः, चौरतस्करः भूरिविषयः विप्रकीर्णेन्द्रियः एवं विधान् स्वगृहे मेषवृश्चिकस्थः कुजः भौमः जनयेत्।

6. असहः तेजस्वी, तनयवान् पुत्रयुक्तः, विसुहृतः मित्ररहितः, कृतज्ञः, परोपकारशीलः गान्धर्वयुद्धकुशलः गान्धर्वे गीते युद्धे च सङ्ग्रामे प्रवेशनिर्गमव्यूहरचनादिषु च कुशलः तज्ज्ञः, कृपणः अदाता, अभयः निर्भयः, अर्थी याञ्चापरः एवं विधो बौधे मिथुनगते भौमे जातो भवति।

7. अनेकरिपुः, नरेन्द्रसचिवः, ख्यातः, विदितकीर्तिः, अभयः, अल्पापत्यः, एवं विधो धन्विमीनस्थे भौमे जातो भवति।

8. आचार्यः उपदेशकर्ता, भूरिसुतः प्रसूतापत्यः, भूरिदारो बहुकलत्र, धनार्जनमिष्टम् अस्य अर्थार्जन नित्यमुद्यतः वदान्यः दाता, गरुभक्तरताः मातृपितृगुरूणां भक्ताः एवं विधाः पुरुषाः शौक्रे वृषतुलास्थे बुधे जाता भवन्ति।

9. जलेन आर्जितं स्वं येन सः। स्वजनस्य बन्धुजनस्य शत्रुः एवं विधः शशाङ्कजे शीतकरर्क्षे जातो भवति।

10. जितसेवकः जिताः सेवका येन परागधनदक्षः पराभिप्रायज्ञः अन्त्यशिल्पः नीचशिल्पः एवं विधो अन्त्ये मीनस्थे बुधे जातो भवति।

11. सेनानीः, बहुवित्तः, बहुदारः, बहुतनयः, दानशीलः सुभृत्य शोभनभृत्यः, क्षमवान्, तेजसा, कान्त्या दारागुणैः कलत्र सौख्यै अन्वितो युक्तः ख्यातः प्रख्यात कीर्तिः एवं विधः सुरगुरौ जीवे कौजे जातो भवति।

12. नीचा कुलानुचिताधर्मकर्मकृचत्, अल्पवित्तः, असुखीदुःखितः एवं विधः मकरस्थे जीवे जातो भवति। स्वबलेनात्मीयवीर्येण स्वमत्या आत्मीयबुद्ध्या च धनं यस्यासौ स्वबलमतिधनः नरेन्द्रपूज्यः स्वजनविभुः बन्धुप्रधानः प्रथितः अभयः एवं विधः वृषातुलास्थे सिते जातो भवति।

13. स्त्रीप्राप्तधनः प्रधानस्त्रीकः मन्दतनयः अल्पापत्यः एवं विधौ हरौ सिंहस्थे शुक्रे जातो भवति।

14. निर्ह्रीसुखार्थतनयः निर्गता ह्री लज्जा यस्या सा निर्लज्जः निःसुखो दरिद्रः निस्तनयः पुत्ररहितः लेख्ये आलेख्यकर्मणि स्खलितः अज्ञः रक्षापतिः भवत्यारक्षकः प्रधाननाथः एवं विधो मिथुनगते सौरे जातो भवति।

15. ख्यातः विदितकीर्तिः समूहानां पुराणां बलानां सैन्यानां ग्रामाणां च पूज्ये मान्यः, अर्थवान् एवं विधः स्वोच्चराशौ तुलास्थे सौरे जातो भवति।

16. वर्ज्यस्त्रीषु इष्टः, न बहुविभवः न प्रभूतैः, अल्पैश्वर्युक्तः, भूरिभार्यः एवं विधो वृषस्थे शनैश्चरे जातो भवति।

17. अन्यस्त्रीधनसंवृतः परयोषिद्भिः परधनैश्च संवृतः संयुक्तः पुरबलग्रामग्रणीः पुराणां बलानां ग्रामाणां च अग्रणीः प्रधाननायकः मन्ददृगल्पचक्षुः मलिनः स्नानालसः स्थिरार्थः स्थिरैश्वर्यः भोक्ता एवं विधः पुमान् पुरुषः स्वक्षेत्रे कुम्भस्थे सौरे जातो भवति।

## ।।दृष्टिफलाध्यायः।।

### उद्देश्यम्-

- ☞ मेषवृषमिथुनकर्कटस्थे चन्द्रे भौमाद्यैः ग्रहैः दृश्यमाने जातस्य स्वरूपम्।
- ☞ सिंहकन्यातुलावश्चिकस्थे चन्द्रे बुधादिदृष्टे जातस्य स्वरूपम्।
- ☞ धन्विमकरकुम्भमीनस्थे चन्द्रमसि बुधादिदृष्टे जातस्य स्वरूपम्।
- ☞ होराद्रेष्काणव्यवस्थितस्य चन्द्रस्य ग्रहदृष्टिफलम्।
- ☞ मेषवृश्चिकवृषतुलांशकस्ते चन्द्रमसि सूर्यादिदृष्टे फलम्।
- ☞ मिथुनकन्याकर्कांशस्थे चन्द्रे फलम्।–
- ☞ सिंहधन्विमीननवांशस्थे चन्द्रे सूर्यादिदृष्टे फलम्।
- ☞ मकरनवांशकस्थे कुम्भनवांशकस्थे चन्द्रे सूर्यादिदृष्टे जातस्य फलम्।
- ☞ नवांशकदृष्टिफलस्य विशेषम्।

मेषस्थे चन्द्रमसि भौमदृष्टे जातो भूपो राजा भवति। बुधदृष्टे पण्डितः, जीवदृष्टे नृपोपमः, शुक्रदृष्टे गुणी भवति। केचिद्वणिदगिति। शनैश्चरदृष्टे स्तेनश्चौरः, सूर्यदृष्टे दरिद्र इति। एवमपि मेषलग्ने भौमादिदृष्टे फलं वाच्यम्। गविस्थेति। गवि वृषस्थे चन्द्रमसि भौमदृष्टे जातो निःस्वः दरिद्रः भवति। बुधदृष्टे स्तेनश्चौरः जीवदृष्टे नृमान्यः नृणां मान्यः पूज्यः केचिन्नृपाढ्य इति भवन्ति। नृपाढ्यः राजा धनाढ्यः ईश्वरः शुक्रदृष्टे भूपः राजा सौरदृष्टे प्रेष्यः दासः। एवं वृषलग्नेऽपि। नृस्थे मिथुनस्थे चन्द्रमसि भौमदृष्टे यो व्यवहारी शस्त्रविक्रयकःबुधदृष्टे पार्थिवः राजा, जीवदृष्टे बुधः पण्डितः, शुक्रदृष्टेऽभीः निर्भयः धीरः भयरहितः, सौरदृष्टे तन्तुवायः, रविदृष्टे अधनः दरिद्रः। एवं मिथुनलग्नेऽपि। स्वर्क्षे कर्कटस्थे चन्द्रमसि भौमदृष्टे योद्धा भवति युद्धकुशलः, बुधदृष्टे कविः, काव्यकर्ता, जीवदृष्टे ज्ञः पण्डितः, शुक्रदृष्टे भूमिपतिः राजा, सौरदृष्टे यो जीवि आयुधजीवि, शास्त्रोपजीवि, सूर्यदृष्टे दृग्रोगो चक्षुर्व्याध्यार्दितः। एवं कर्कटलग्नेऽपि।

**चन्द्रे भूपबुधौ नृपोपमगुणी स्तेनोऽधनश्चाजगेनिःस्वः स्तेननृमान्यभूपधनिनः प्रेष्यः कुजाद्यैर्गवि।**

**नृस्थे अयो व्यवहारि पार्थिवबुधाभिस्तन्तुवायोऽधनो**

**स्वर्क्षे योद्धृ कविज्ञभूमिपतयोऽयो जीविदृग् रोगिणौ ।। १।।**

**कठिणपदार्थः**=कुजाद्याः= भौमादयः, तत्राजगे=मेषस्थे चन्द्रमसि, भौमदृष्टे जातो भूपो= राजा भवति। बुधदृष्टे बुधः=पण्डितः, जीवदृष्टेनृपोपमः =राजतुल्यः, शुक्रदृष्टे गुणी =गुणवान् भवति। केचिद्वणिदगिति। शनैश्चरदृष्टे स्तेनश्चैरः सूर्यदृष्टे दरिद्र इति। एवमपि मेषलग्ने भौमादिदृष्टे फलं वाच्यम्। गविस्थेति। गवि=वृषस्थे, चन्द्रमसि= भौमदृष्टे, जातो निःस्वः =दरिद्रः भवति। बुधदृष्टे स्तेनश्चौरः जीवदृष्टे नृमान्यः= नृणां मान्यः पूज्यः केचिन्नृपाढ्य इति भवन्ति। नृपाढ्यः=राजा, धनाढ्यः=ईश्वरः, शुक्रदृष्टेभूपः= राजा सौरदृष्टे, प्रेष्यः =दासः। एवं वृषलग्नेऽपि। नृस्थे =मिथुनस्थे, चन्द्रमसि भौमदृष्टे यो व्यवहारी शस्त्रविक्रयकःबुधदृष्टे पार्थिवः=राजा, जीवदृष्टे बुधः=पण्डितः, शुक्रदृष्टेऽभीः=निर्भयः धीरः =भयरहितः, सौरदृष्टे तन्तुवायः, रविदृष्टे अधनः=दरिद्रः। एवं नियुनलग्नेऽपि। स्वर्क्षे कर्कटस्थे चन्द्रमसि भौमदृष्टे योद्धा=युद्धकुशलः, बुधदृष्टे कविः=काव्यकर्ता, जीवदृष्टे ज्ञः= पण्डितः, शुक्रदृष्टे भूमिपतिः=राजा, सौरदृष्टे यो जीवि=आयुधजीवि, शास्त्रोपजीवि, सूर्यदृष्टे दृग्रोगो चक्षुर्व्याध्यार्दितः। एवं कर्कटलग्नेऽपि।

**अवबोधप्रश्नः**

1. मेषस्थे चन्द्रमसि भौमदृष्टे जातो कीदृशो भवति?

बुधादयः बुधगुरुशुक्रशनिसूर्यभौमाः हरिः सिंहस्ततस्मिन् हरौ सिंहस्थे चन्द्रे बुधदृष्टे ज्योतिर्ज्ञः ज्योतिश्शास्त्रार्थवेत्ता जीवदृष्टे आढ्यः ईश्वरः, शुक्रदृष्टे नरेन्द्रो राजा सौरदृष्टे नापितः रविदृष्टे नृपः राजा, भौमदृष्टे क्ष्मेशः, भूपतिः।

एवं सिंहलग्नेऽपि। तद्विदित्यादि। तद्वद् बुधादिभि दृष्टे इत्यनुवर्तते सर्वत्र। षष्ठे कन्यागते चन्द्रे बुधदृष्टे भूपः राजा, जीवदृष्टे चमूपः, सेनापतिः, शुक्रदृष्टे नैपुणयुतः, सर्वकार्येषु सौम्यदृष्टिः, अशुभैः सौररविभौमैः दृष्टे स्त्र्याश्रयो भवति। स्त्रियमाश्रित इत्यर्थः। एवं कन्यालग्नेऽपि।

जूके चन्द्रमसि भूपदृष्टे युग्मपिता युग्मस्य जनकः द्वयो पिता जातो भवति, जात एव युग्मपिता। द्विपितृक इति पठन्ति। जीवे दृष्टे नतः प्रह्वः, शुक्रदृष्टे रजकः, वस्त्ररागकृत्, सौरदृष्टे व्यङ्गो अङ्गहीनः। सूर्यदृष्टे अधनः दरिद्रः भौमदृष्टे भूपतिः राजा। एवमेतैरेव दृष्टे वृश्चिकोऽपि।

**ज्योतिर्ज्ञाढ्यनरेन्द्रनापितनृपक्ष्मेशा बुधाद्यैर्हरौ।**

**तद्वद् भूप चमूप नैपुणयुताः षष्ठे अशुभैः स्त्र्याश्रयः।।**

**जूके भूप सुवर्ण कार वणिजः शेषेक्षिते नैकृती कीटे ।।**

**युग्म पिता नतश्चरजको व्यङ्गोऽधनो भूपतिः ।। २।।**

बुधादयः=बुधगुरुशुक्रशनिसूर्यभौमाः, हरिः=सिंहस्ततस्मिन् हरौ=सिंहस्थे,चन्द्रे बुधदृष्टे ज्योतिर्ज्ञः=ज्योतिश्शास्त्रार्थवेत्ता, जीवदृष्टे आढ्यः=ईश्वरः, शुक्रदृष्टे नरेन्द्रो=राजा सौरदृष्टे=नापितः, रविदृष्टे नृपः=राजा, भौमदृष्टे=क्ष्मेशः, भूपतिः। एवं सिंहलग्नेऽपि। तद्विदित्यादि। तद्वद् बुधादिभि दृष्टे इत्यनुवर्तते सर्वत्र। षष्ठे =कन्यागते चन्द्रे बुधदृष्टे भूपः =राजा, जीवदृष्टे चमूपः=सेनापतिः, शुक्रदृष्टे नैपुणयुतः, सर्वकार्येषु सौम्यदृष्टिः, अशुभैः सौररविभौमैः दृष्टे स्त्र्याश्रयो भवति। स्त्रियमाश्रित इत्यर्थः। एवं कन्यालग्नेऽपि। जूके चन्द्रमसि भूपदृष्टे युग्मपिता =युग्मस्य जनकः द्वयो पिता जातो भवति, जात एव युग्मपिता। द्विपितृक इति पठन्ति। जीवे दृष्टे नतः= प्रह्वः, शुक्रदृष्टे रजकः=वस्त्ररागकृत्, सौरदृष्टे व्यङ्गो=अङ्गहीनः। सूर्यदृष्टे अधनः=दरिद्रः भौमदृष्टे भूपतिः=राजा। एवमेतैरेव दृष्टे वृश्चिकोऽपि।

**अवबोधप्रश्नः**

2. कन्यागते चन्द्रे बुधाद्यैः दृष्टे किं फलम्?

---

धनुराशौ चन्द्रे ज्ञातीशः, जीवदृष्टे राजा शुक्रदृष्टे जनाश्रयः, पापैः सदम्भः, मिथ्या, शठः। एवं धन्विलग्नेऽपि। मृगो तत्रस्थे बुधदृष्टे राजाधिराजो भवति। जीवदृष्टे नरेन्द्रो शुक्रदृष्टे पण्डितः शनिदृष्टे वित्तवान्, सूर्यदृष्टे द्रव्योनः, भौमदृष्टो भूपो, एवं मकरलग्नेऽपि।

कुम्भस्थे चन्द्रमसि बुधदृष्टे भूपः भवति। जीवदृष्टे राजसमः, शुक्रदृष्टे अन्यदारनिरतः भवति। च शब्दप्रयुक्तवशात् शनिसूर्यभौमैस्त्रिभिरप्यन्यदारनिरत एव। एवं कुम्भलग्नेऽपि। झषगे चन्द्रमसि बुधदृष्टे हास्यज्ञः। जीवदृष्टे नृपतिः, शुक्रदृष्टे बुधः, पापाः अर्थात् शनिसूर्यभौमाः एतैः दृष्टे च पापाः एव भवति। एवं मीनलग्नेपि। लग्नदृष्टिफलं चन्द्रफलातिदेशोनोऽक्तम्।

शशिरकरसमागमेक्षणानां सदृशफलं प्रवदन्ति लग्नजातम्। इति। तत्र चन्द्रसमा दृष्टे लग्ने फलम् नोक्तम्। तस्मात् तत्रोच्यते उक्तमेव यस्मादुक्तम्।

"होरास्वामि गुरुज्ञवीक्षितयुता नान्यैश्च वीर्योत्कटा।" तत्र कर्कटवर्ज्यमन्यल्लग्नम्। चन्द्रदृष्टं हीनबलं भवति। हीनबलवत्वाद् अशोभनम्। उक्तं च-

"मुक्त्वा तु चन्द्रभवनं लग्नगतं शशिरकिरणसंदृष्टम्।

अशुभफलं निर्दिष्टं पृच्छायां जन्मसमये वा।"

**ज्ञात्युर्वीश जनाश्रयश्च तुरगे पापैः सद् अम्भः शठः।**

**चात्युर्वीशनरेन्द्रपण्डितधनी द्रव्योन भूपो मृगे।।**

**भूपो भूपसमोऽन्यदारनिरतः शेषैश्च कुम्भस्थिते।**

**हास्यज्ञो नृपतिर्बुधश्च झषगे पापश्च पापेक्षिते।। ३।।**

तुरगो= धन्वी तत्रस्थे चन्द्रे ज्ञातीशः=स्वजनभर्ता, जीवदृष्टे ऊर्वीशो =राजा शुक्रदृष्टे जनाश्रयः =जनामाश्रयस्थानं, पापैः शनिरविभौमदृष्टे सदम्भः, मिथ्याधर्मध्वजी, शठः परकार्यविमुखश्च भवति। एवं धन्विलग्नेऽपि। मृगो =मकरः तत्रस्थेबुधदृष्टे अत्युर्वीशो। राजाधिराजो भवति। जीवदृष्टे नरेन्द्रो=राजा शुक्रदृष्टे पण्डितः शनिदृष्टे वित्तवान्, सूर्यदृष्टे द्रव्योनः=दरिद्रः, भौमदृष्टो भूपो =राजा, एवं मकरलग्नेऽपि।

कुम्भस्थे चन्द्रमसि बुधदृष्टे भूपः=राजा भवति। जीवदृष्टे राजसमः, शुक्रदृष्टे अन्यदारनिरतः भवति। च शब्दप्रयुक्तवशात् शनिसूर्यभौमैस्त्रिभिरप्यन्यदारनिरत एव। एवं कुम्भलग्नेऽपि। झषगे मीनस्थे चन्द्रमसि बुधदृष्टे हास्यज्ञः=उपहासं कर्तुं जानाति। जीवदृष्टे नृपतिः, शुक्रदृष्टे बुधः, पापाः अर्थात् शनिसूर्यभौमाः एतैः दृष्टे च पापाः एव भवति। एवं मीनलग्नेपि। लग्नदृष्टिफलं चन्द्रफलातिदेशोनोऽक्तम्।

**अवबोधप्रश्नः**

3. कुम्भस्थे चन्द्रे बुधदृष्टे कीदृशो नरः जायते?

होरेति लग्नं भवनस्य चार्धम्। होराशब्देन राश्यर्धमुच्यते। होरेति लग्नं भवनस्य चार्धम्। इति वचनात्। होरायाः ईशः होरेशः। तस्य ऋक्ष दलं होरेशार्क्षदलं तत्राश्रिता होरेशार्क्षितादलाश्रितैः शशी चन्द्रः, तद्गतः होरास्थः दृष्टो शुभकरो भवति।एतदुक्तं भवति। यत्र तत्र राशौ यस्यां होरायां चन्द्रमाः स्थितः तदा होरास्थैः सर्वग्रहैः यदि दृश्यते तदा जन्मनिशुभकरो भवति। तेन अर्कहोरास्थः चन्द्रः यत्र तत्र राश्यश्रितैः अर्कहोराश्रितैः दृष्टश्च शुभकरो भवति। अर्थादेव अर्कहोरास्थैः ग्रहैः यत्र तत्रावस्थैः दृष्टः शुभकरो भवति। एवं लग्नेऽपि होरेशेन फलं वाच्यम्। त्र्यंशे तत्पतिभिरिति। यत्र तत्र राशौ यस्मिन् द्रेष्काणे स्थितः चन्द्रः तस्य यः पतिस्तेन द्रेष्काणपतिना दृष्टश्चन्द्रः स्तूयते। पतिभिरिति। बहुवचननिर्देशात् नवांशद्वादशांशत्रिंशाशकाधिपतयो गृह्यन्ते। तैरपि दृष्टः चन्द्रः शुभकरो भवति। एवं लग्नेऽपि। यद्यपि सामान्येन उक्तम्। तथापि शुभग्रहैः द्रेष्काणपतिभिः दृष्टः शस्यते।

पापग्रहैः मध्यमः । यस्माद् अनेनैव स्वल्पजातके उक्तम्। क्षेत्राधिपसंदृष्टे शशिनि नृपस्तत्सुहृद्भिरपि धनवान्। द्रेष्काणांशकपैः वा प्रायः सौम्यैः शुभं नान्यैः।

सुहृद्भवनगैः इत्यादि। मित्रक्षेत्रस्थैः ग्रहैः वीक्षितैः दृष्टः चन्द्रः शस्यते। अर्थादेव स्वभवनगकैः दृष्टः शस्यते। अरिभवनगतैः दृष्टः न शस्यते। अशुभफलो भवति। एवं लग्नेऽपि योज्यम्। यत्प्रोक्तं प्रतिराशिवीक्षणफलं तद्वद् द्वादशांशे स्मृतम् इति। प्रतिराशिराशौ राशौ मेषादिस्थे चन्द्रमसि, यद्वीक्षणफलं प्रोक्तं कथितं तदेव मेषादिद्वादशांशकस्थे चन्द्रमसि स्मृतमुक्तम्। तदेव वाच्यम् इति। चन्द्रे भूपबुधौ इत्यादि यद् उक्तम्। एवं लग्नेऽपि। तत्रापि कर्काटद्वादशांश विना चन्द्रदृष्टिरशोभना सूर्याद्यैः इति। अतः अस्मात् परं शशिनि चन्द्रे सूर्याद्यैः अर्कादिभिः अवलोकिते दृष्टे नवांशेषु फलं ज्ञेयम्।

**होरेशर्क्षदलाश्रितैः शुभकरो दृष्टः शशी।।**

**तद्गतस्त्र्यंशे तत् पतिभिः सुहृद् भवनगैर्वा वीक्षितः शस्यते ।**

**यत् प्रोक्तं प्रतिराशिवीक्षणफलं तद्वादशांशे स्मृतम्।।**

**सूर्योद्यैरवलोकिते अपि शशिनि ज्ञेयं नवांशेष्वतः ।। ४।।**

**।।भौमनवांशकस्थे चन्द्रमसि सूर्यादिग्रहाणाम् फलम्।।**

**आरक्षिको वधरुचिः कुशलो नियुद्धे भूपोऽर्थवान् कलहकृत् क्षितिजांशसंस्थे ।**

**मूर्खोऽन्यदारनिरतः सुकविः सितांशे सत् काव्यकृत् सुखपरोऽन्यकलत्रगश्च ।। ५।।**

क्षितिजो भौमः तन्नवांशकस्थे चन्द्रमसि सूर्यदृष्टे आरक्षिको भवति। आरक्षिकः नगररक्षाधिकृतः। भौमदृष्टे वधरुचिः प्राणिघातकः, बुधदृष्टे नियुद्धे बाहुयुद्धे, कुशलः प्रवीणः, जीवदृष्टे राजा, शुक्रदृष्टे अवनीश्वरः, सौरदृष्टे कलहकृद् इति। मूर्ख इति। सितांशके शुक्रनवांशके वृषनवांशके तुलानवांशके वा स्थिते चन्द्रमसि रविदृष्टे मूर्खो भवति। भौमदृष्टे अन्यदारनिरतः परदारासक्तः बुधदृष्टे काव्यकृत् काव्यज्ञः, केचिद्यवदिति पठन्ति। जीवदृष्टे सत्काव्यकृत् शोभनकाव्यकर्ता, शुक्रदृष्टे सुखपरः सुखासक्तः, सौरदृष्टे अन्यकलत्रगः परदारभिगामि।

4. भौमः तन्नवांशकस्थे चन्द्रमसि केन दृष्टे आरक्षिको भवति?

---

**बौधे हि रङ्गचरचौरकवीन्द्रमन्त्रीगेयज्ञशिल्पनिपुणः शशिनि स्थिते अंशे ।**

**स्वांशे अल्पगात्रधनलुब्धतपस्विमुख्यः स्त्रीपोऽप्यकृत्य निरतश्च निरीक्ष्यमाणम्।। ६।।**

शशिनि चन्द्रे बौधे बुधनवांशकस्थे मिथुननवांशकस्थे कन्यानवांशकस्थे वा निरीक्ष्यमाणे दृष्टे रङ्गचरः मल्लादिको भवेत्। भौमदृष्टे चौरः= तस्करः, बुधदृष्टे कवीन्द्रः =कविराजः, जीवदृष्टे मन्त्री =सचिवः, शुक्रदृष्टे शिल्पनिपुणः।स्वांशेति। स्वांशकस्थे=आत्मीयननवांशकस्थे कर्काटनवांशकस्थे शशिनि=चन्द्रेसूर्यदृष्टे अल्पगात्रः=कृशदेहो भवति। भौमदृष्टे धनलुब्धः=कृपणः अल्पधनो वा, बुधदृष्टे तपस्वी, जीवदृष्टे मुख्य =प्रधानः, सितदृष्टे स्त्रीवोध्यः= स्त्रीभिः अभिवर्धनीयः, सौरदृष्टे कृत्यनिरतः= कार्यासक्तः।

---

**सक्रोधो नरपतिसंमतो निधीशः सिंहांशे प्रभुरसुतोऽतिहिंस्रकर्मा ।**

**जीवांशे प्रथितबलो रणोपदेष्टाहास्यज्ञः सचिवविकामवृद्धशीलः ।। ७।।**

सितांशकस्थे चन्द्रमस्य अर्कदृष्टे सक्रोधः क्रोधयुक्तः भवति। भौमदृष्टे राजवल्लभः, बुधदृष्टे निधीशः, गुरुदृष्टे प्रभुरप्रतिहताज्ञः, शुक्रदृष्टे असुतः पुत्ररहितः, सौरदृष्टे हिंस्रकर्मा, जीवांशे चन्द्रमसि दृष्टे सूर्यदृष्टे

प्रथितबलः प्राख्यातवीर्यो भवति। भौमदृष्टे रणोपदेष्टा सङ्ग्रामदेशकालव्यूहरचनाभिज्ञः, बुधदृष्टे हास्यज्ञः, उपहासवेत्ता, जीवदृष्टे सचिवः मन्त्री, शुक्रदृष्टे विकामः, सौरदृष्टे धर्ममतिः भवति।

आर्किः अर्कस्य अपत्यम् आर्किः, तस्य भागे शनैश्चरनवांशके मकरनवांशकस्थे, कुम्भनवांशकस्थे वा चन्द्रे सूर्यदृष्टे अल्पाप्तयो अल्पप्रसवो भवति। भौमदृष्टे सत्यपि स्वे दुःखितः सत्यपि विद्यमानेपि स्वे धने दुःखितो भवति। बुधदृष्टे मानासक्तः गर्वितः, जीवदृष्टे स्वे आत्मीयकर्मणि अनुरक्तः कुलानुकर्मकृत् शुक्रदृष्टे दृष्टस्त्रीषु इष्टः वल्लभः सौरदृष्टे कृपणः, आदाता। एवं तत्कालनवांशकवशात् ग्रहदृष्ट्या लग्नेऽपि वक्तव्यम्। किन्तु कर्काटकनवांशकं विना चन्द्रदृष्टिः अशुभेऽति।भानौ तद्वद् इन्द्वादिदृष्टे तद्वत् दृष्टिफलम् उक्तम्। एतदुक्तं नवांशकव्यवस्थितस्य चन्द्रस्य ताराग्रहदृष्टिफलं तुल्यम्। किन्तु यदा आदित्य दृष्ट्या चन्द्रस्याक्तं तत् चन्द्रदृष्ट्या सूर्यस्य वक्तव्यम्। तद्यथा मेषनवांशकस्थे अर्के चन्द्रदृष्टे आरक्षितो भवति। वृषतुलानवांशकस्थे मूर्खः, मिथुनकन्यानवांशकस्थे रङ्गचरः, सिंहनवांशकस्थे सक्रोधः, धन्विमीननवांशकस्थे प्रथितबलः, मकरकुम्भनवांशकस्थे अल्पापत्यः, कर्कटनवांशकस्थे अल्पगात्रः। एवमादित्यस्य नवांशकावस्थितस्य ग्रहदृष्ट्या चन्द्रेण फलं समानमिति।

**अल्पापत्यो दुःखितः सत्यपि स्वे मानासक्तः कर्मणि स्वे अनुरक्तः ।**

**दुष्ट स्त्रीष्तः कृपणश्चार्कि भागे चन्द्रे भानौ तद्वद् इन्द्वादि दृष्टे ।। ८।।**

---

**।।नवांशकव्यवस्थिते चन्द्रे फलम्।।**

नवांशकव्यवस्थिते चन्द्रे द्विप्रकारकं शुभाशुभम् उक्तम्। यथा आरक्षितम् इति शुभं, वधरुचिः इति अशुभम्। तत्र वर्गोत्तमाशकगते चन्द्रे यद् ग्रहदृष्टिजं फलं शुभम् उक्तम्। स्वांशकस्थे तु यत् शुभम् उक्तम् तत् मध्यमम्। परमपुष्टता मध्यता लघुता च। अशुभमुत्क्रमेण अशुभमनिष्टं यत्फलं यदुक्तं तदतीवशुभं भवति। स्वनवांशस्थस्य मध्यमम्। वर्गोत्तमांशस्थस्य लघुता। एवं लग्नदित्ययोरपि दृष्टिफलं योज्यम्। जातके सर्वाण्येव फलानि भवन्तीति प्राप्तम्। अतः सदैव राशिदृष्टिनवांशकदृष्टिफलयोरपि सदैव पक्तिं प्राप्नोति। तव नवांशकपतौ बलवति राशिः दर्शनफलबाधानर्थमाह।

यस्मिन्नवांशके व्यवस्थितचन्द्रो लग्नं वा भवति, तस्य नवांशकस्य यो अधिपतिः। स चेद् वीर्यान्वितो बलवान् भवति तदा निरुणद्धि पूर्वं प्रथमं निवारयति। किं सर्वमेव नहि। राशीक्षणस्य फलं न होराद्रेष्काणद्वादशभागेक्षणस्य तद्धित्वांशेक्षणफलमेव ददाति। अथांशके पतिर्बलवान् न भवति, तदा राशीक्षणांशकेक्षणफले उभे अपि वाच्ये। एवं चन्द्रलग्नयोः उभयोरपि।आदित्यस्य तु नवांशकेक्षणफलमेवं वक्तव्यम्। यस्मात् तस्य राशिलक्षणफलमिह नोक्तमिति।

**वर्गोत्तमस्वपरगेषु शुभं यद् उक्तं तत् पुष्टमध्यलघुता शुभम् उत्क्रमेण ।**

**वीर्यान्वितोंऽशकपतिर्निरुणद्धिपूर्वं राशीक्षणस्य फलम् अंशफलं ददाति ।। ९।।**

**उत्तराणि-**

1. मेषस्थे चन्द्रमसि भौमदृष्टे जातो भूपो राजा भवति।
2. कन्यागते चन्द्रे बुधदृष्टे भूपः राजा, जीवदृष्टे चमूपः, सेनापतिः, शुक्रदृष्टे नैपुणयुतः, सर्वकार्येषु सौम्यदृष्टिः, अशुभैः सौररविभौमैः दृष्टे स्त्र्याश्रयो भवति।
3. कुम्भस्थे चन्द्रमसि बुधदृष्टे भूपः भवति।
4. क्षितिजो भौमः तन्नवांशकस्थे चन्द्रमसि सूर्यदृष्टे आरक्षिको भवति।

## ।।भावाध्यायः।।

**उद्देश्यम् -**

- आदित्यस्य लग्नगतस्य द्वितीयस्थस्य च फलम्।
- लग्नात् तृतीयचतुर्थपंचमषष्ठस्थानस्थार्कफलम्।
- लग्नात् सप्तमाष्टमनवमदशमैकादशद्वादशस्थे अर्के जातस्य स्वरूपम्।
- चन्द्रे लग्नात् द्वितीयतृतीयचतुर्थपञ्चमषष्ठस्थे जातस्य स्वरूपम्।
- लग्नात् सप्तमाष्टमनवमदशमैकादशद्वादशस्थे चन्द्रे जातस्य स्वरूपम्।
- लग्नादिस्थयोः भौमबुधयोः जातस्य स्वरूपम्।
- लग्नादिस्थस्य जीवस्य फलम्।
- लग्नादिस्थस्य शुक्रस्य फलम्।
- लग्नादिस्थस्य सौरस्य फलम्।
- लग्नात् आरभ्य तन्वादयो भावाः तेषु भावेषु व्यवस्थितानां सर्वेषाम् एव ग्रहाणां फलम्।

### आदित्यस्य लग्नगतस्य फलम्।

शूरः, स्तब्धः, विकलनयनः, निघृणः, एवं विधो अर्के रवौ तनुस्थे लग्नस्थे जातो भवति। अथ मेषसिंहतुलाकर्कटानाम् अन्यतमे लग्नगते अर्के तदा पूर्वोक्तं फलं न भवति। तद्यथा मेषे स्वस्व इति। मेषलग्ने तत्रस्थे चार्के सस्वः सार्थः तिमिरनयनः भवति। तिमिरः चक्षुरोगी प्रसिद्धः इति। सिंहलग्ने तत्रस्थे चार्के निशान्धः भवति। आदित्यस्य नीचः तुला तस्मिंल्लग्ने तत्रस्थे चार्के निशान्धः भवति। आदित्यस्य नीचः तुला, तस्मिल्लग्ने तत्रस्थे चार्के सूर्येऽन्धो नेत्रहीनः स्वः दरिद्रश्च भवति। शशिगृहे कर्कटलग्ने तत्रस्थे पतङ्गे चार्के बुद्बुदेक्षणः पुष्पिताक्षो भवति।

### आदित्यस्य द्वितीयस्थस्य च फलम्।

भूरिद्रव्य इति। लग्नात् द्वितीयेऽर्के भूरिद्रव्यः प्रभूतार्थः, नृपहृतधनः राज्ञा हृतस्वो, वक्ररोगी मुखपीडितश्च भवति।

**शूरः स्तब्धो विकलनयनो निर्घृणोऽर्के तनुस्थे मेषे सस्वस्तिमिरनयनः सिंहसंस्थे निशाधः ।**

**नीचे अन्धोऽस्वः शशिगृहगते बुद्बुदाक्षः पतङ्गे भूरिद्रव्यो नृपहृतधनो वक्ररोगी द्वितीये।। १।।**

**कठिणपदार्थः**=शूरः=सङ्ग्रामप्रियः, स्तब्धः=चिरकार्यकृत्, विकलनयनः=हीनदृष्टिः, निघृणः=निर्दयः, एवं विधो अर्के=रवौ, तनुस्थे=लग्नस्थे जातो भवति। अथ मेषसिंहतुलाकर्कटानाम् अन्यतमे लग्नगते अर्के तदा पूर्वोक्तं फलं न भवति। तद्यथा मेषे= स्वस्व इति। मेषलग्ने तत्रस्थे चार्के सस्वः = सार्थः तिमिरनयनः =चक्षुरोगी भवति। तिमिरः= चक्षुरोगी प्रसिद्धः इति। सिंहलग्ने तत्रस्थे चार्के निशान्धः= रात्र्यन्धो भवति। आदित्यस्य नीचः= तुला तस्मिंल्लग्ने तत्रस्थे चार्के निशान्धः= रात्र्यन्धः भवति। आदित्यस्य नीचः तुला, तस्मिल्लग्ने तत्रस्थे चार्के सूर्येऽन्धो =नेत्रहीनः स्वः= दरिद्रश्च भवति। शशिगृहे कर्कटलग्ने तत्रस्थे पतङ्गे चार्के बुद्बुदेक्षणः=पुष्पिताक्षो भवति। भूरिद्रव्य इति। लग्नात् द्वितीयेऽर्केभूरिद्रव्यः=प्रभूतार्थः, नृपहृतधनः=राज्ञा हृतस्वो, वक्ररोगी =मुखपीडितश्च भवति।

**अवबोधप्रश्नः**

1. रवौ तनुस्थे लग्नस्थे जातो कीदृशो भवति?

---

**।।तृतीयगे अर्के फलम्।।**

मतिः, विक्रमः एतौ विद्यते यस्य स तथाविधः तृतीयगे अर्के रवौ भवति। विसुखो दुःखितः पीडितमानसः, एवं विधः चतुर्थगे अर्के जातो भवति। असुतः, धनवर्जितः, एवं विधो त्रिकोणे रवौ जातो भवति। केचित् बलवान् नष्टरिपुः च शत्रुयात इति**पठन्ति**। तथा च सत्यः "षष्ठे रिपुरोगशोकघ्नः" आचार्येणात्र यवनेश्वरमतमङ्गीकृतं यतः षष्ठस्थानस्थितानां पापानां यवनेश्वराणाम् अनिष्टं फलमभिहितम्।

तथा च स्फुजिर्ध्वजः।

"षष्ठाश्रितोऽर्को विषशस्त्रदाहक्षुद्रोगशत्रव्यसनोपतप्तान्

काष्ठाश्मपाताच्च विशीर्णदन्तानि अनेटवीं दंष्ट्रनखिक्षतांश्च।।

कुजो गतस्तत्र परिक्षितांगंदृग्व्याधितं धिक्कृतिकर्शितं च।

सौरः शिरोऽश्माशनिपातवातद्विमुष्टिघातोपहतं च। कुर्यात्।।"

मतिः, बुद्धिः विक्रमः पराक्रमः एतौ विद्यते यस्य स तथाविधः तृतीयगे अर्के रवौ भवति। विसुखो दुःखितः पीडितमानसः नित्योद्विग्नचितः, एवं विधः चतुर्थगे अर्के जातो भवति। असुतः विपुत्रः धनवर्जितः दरिद्रः एवं विधो त्रिकोणे पञ्चमस्थे रवौ जातो भवति। केचित् बलवान् नष्टरिपुः च शत्रुयात इति पठन्ति।

**श्लोकः**

**मतिविक्रमांस्तृतीयगे अर्के विसुखः पीडितमानसश्चतुर्थे।**

**असुतो धनवर्जितस्त्रिकोणे बलवाञ्छत्रु जितश्च शत्रुयाते ।। २।।**

**कठिणपदार्थः**=मतिः= बुद्धिः, विक्रमः =पराक्रमः एतौ विद्यते यस्य स तथाविधः तृतीयगे अर्के =रवौ भवति। विसुखो= दुःखितः, पीडितमानसः= नित्योद्विग्नचितः, एवं विधः चतुर्थगे अर्के जातो भवति। असुतः =विपुत्रः, धनवर्जितः =दरिद्रः एवं विधो त्रिकोणे =पञ्चमस्थे रवौ जातो भवति। केचित् बलवान् =नष्टरिपुः च शत्रुयात इति पठन्ति।

**अवबोधप्रश्नः -**

2. **तृतीयगे रवौ जातः कीदृशः भवति?**

---

**।।सप्तमाष्टमनवमदशमद्वादशस्थानस्थेरवौ जातस्य फलम्।।**

**स्त्रीभिर्गतः परिभवं मदगे पतङ्गे स्वल्पात्मजो निधनगे विकलेक्षणश्च।**

**धर्मे सुतार्थसुखभाक् सुखशौर्यभाक् खे लाभे प्रभूतधनवान् पतितस्तु रिःफे ।। ३।।**

पतङ्गे आदित्ये मदगे सप्तमस्थानस्थे जातः स्त्रीभिः परिभवं गतः प्राप्तः भवति। अष्टमस्थे सूर्ये योषिद्भिः परिभवं गतः भवति। स्वल्पात्मजः विकलेक्षणः, अल्पापत्यः, च भवति। नवमस्थे सुताः धनं सुखम् एषां भागी भवति। खे दशमे सुखशौर्यभाक् भवति। द्वादशे स्वकर्मपरिभ्रष्टो भवति।

---

।।उदयगे चन्द्रमसि फलम्।।

मूको उन्मत्तः, जडः, अन्धः नेत्रहीनः बधिरः, प्रेष्यो एषामन्यतमो जातः, शशाङ्कोदये जातो भवति। एतवन्मेषवृषकर्कटवर्ज्यम्। तेषां विशेषमाह।स्वर्क्षोजोच्चगत इति। स्वर्क्षः तस्मिन् लग्ने तत्स्थे चन्द्रमसि धनी वित्तवान् भवति। अजे तस्थे चन्द्रमसि बहुसुतः भवति। चन्द्रस्योच्चो तस्मिंल्लग्ने चन्द्रे सस्वः अर्थवान् भवति।

।।लग्नात् द्वितीये पञ्चमे च चन्द्रे फलम्।।

धने लग्नात् द्वितीये चन्द्रे कुटुम्बी सुखे सतनये पञ्चमेन स्थानेन युक्ते तत्प्रोक्त भावान्वितो युक्तो भवति। तेन सुखे सुखितस्तनये पुत्रान्वित इति।

।।षष्ठगते चन्द्रे जातस्य फलम्।।

नैकारित्यनेकारिः, मृदुकायः मृदुवह्निना अति प्रदीप्ताग्निः मृदुमदनः, तीक्ष्णः उग्रस्वभावः अलसःएवं विधो अरिगो लग्नात् षष्ठस्थे चन्द्रे जातो भवति।

**मूकोन्मत्तजडान्धहीनबधिरप्रेष्याः शशाङ्कोदये**

**स्वऋक्षजोच्च गते धनी बहुसुतः सस्वः कुटुम्बी धने।**

**हिंस्रो भ्रातृ गते सुखे सतनये तत्-प्रोक्तभावान्वितो**

**नैकारिर्मृदुकायवह्नि मदनस्तीक्ष्णोऽलसश्चारिगे।। ४।।**

**कठिणपदार्थः**= मूको= वाग्घीनः, उन्मत्तः= धातुवैषम्याद्यतेष्टकारी जडः, अप्रतिपन्नः, अन्धः =नेत्रहीनः, अनुचितकर्मकृत्, बधिरः=श्रोत्रेन्द्रियहीनः, प्रेष्यो= दासः, एषामन्यतमो जातः, शशाङ्कोदये =शशाङ्के चन्द्रे उदयगे लग्नस्थे जातो भवति। एतवन्मेषवृषकर्कटवर्ज्यम्। तेषां विशेषमाह।स्वर्क्षोजोच्चगत इति। स्वर्क्षः =कर्कटकः तस्मिन् लग्ने तत्स्थे चन्द्रमसि, धनी =वित्तवान् भवति। अजे =मेषलग्ने तस्थे, चन्द्रमसि बहुसुतः= प्रभूतपुत्रः भवति। चन्द्रस्योच्चो =वृषः तस्मिंल्लग्ने चन्द्रे =सस्वः अर्थवान् भवति। धने लग्नात् द्वितीये= चन्द्रे कुटुम्बी =बहुकुटुम्बी, सुखे =चतुर्थे, सतनये= तनयेन पञ्चमेन स्थानेन युक्ते तत्प्रोक्त भावान्वितो युक्तो भवति। तेन सुखे सुखितस्तनये पुत्रान्वित इति। नैकारि इति=अनेकारिः बहुशत्रुः, मृदुकायः

=सुकुमानरशरीरः, मृदुवह्निना =अति प्रदीप्ताग्निः , मृदुमदनः= मैथुनशीघ्रगः, तीक्ष्णः =उग्रस्वभावः, अलसः क्रियास्वपटुः एवं विधो अरिगो लग्नात् षष्ठस्थे चन्द्रे जातो भवति।

---

**।।सप्तमस्थे चन्द्रे जातस्य निसर्गः।।**

ईर्ष्युः, तीव्रमदः एवं विधो मदे सप्तमस्थे चन्द्रे जातो भवति। बहुमतिः चपलबुद्धिरित्यर्थः।

**अष्टमस्थे चन्द्रे जातस्य फलम्।**

व्याध्यार्दितः एवं विधो अष्टमस्थे चन्द्रे जातो भवति।

**चन्द्रे नवमस्थानस्थे जाते फलम्।**

सौभाग्यं, आत्मजाः पुत्राः मित्राणि सुहृदः बान्धवाः स्वजनाः धनं एषां भागी भवति। शीतगौ चन्द्रे धर्मस्थे नवमस्थानश्रिते जातो भवति।

**।।दशमस्थानस्थे चन्द्रे जातस्य फलम्।।**

निष्पत्तिः निष्पादनं सर्वं कर्म समुपैति, गच्छति। धर्मधनधीशौर्ययुतः धर्मेण धनेन धिया शौर्येण युतः एवं विधः कर्मगे दशमस्थानस्थे चन्द्रे जातो भवति।

ख्यातः सर्वत्र प्रसिद्धः, भावगुणान्वितः भाव एकादशो लाभस्थानं तेनान्वितः सलाभः इत्यर्थः।

एवं विधो भगवते एकादशस्थे चन्द्रे जातो भवति। क्षुद्रो हिंस्रस्वभावः अङ्गहीनः द्वादशस्थे चन्द्रे जातो भवति। इति चन्द्रचारः।

**ईर्ष्युस्तीव्रमदो मदे बहुमतिर्व्याध्यर्दितश्चाष्टमेसौभाग्यात्मजमित्रबन्धुधनभाग् धर्मस्थिते शीतगौ।**

**निष्पत्तिं समुपैति धर्मधनधी शौर्यैर्युतः कर्मगेख्यातो भावगुणान्वितो भवगते क्षुद्रोऽङ्गहीनो व्यये ।। ५।।**

**कठिणपदार्थः**=ईर्ष्युः= परार्द्धिमत्सरी, तीव्रमदः= अतिमदनः एवं विधो मदे सप्तमस्थे चन्द्रे जातो भवति। बहुमतिः=बहुप्राज्ञः चपलबुद्धिरित्यर्थः। व्याध्यार्दितः=रोगपीडितः एवं विधो अष्टमस्थे चन्द्रे जातो भवति। सौभाग्यं =सर्वजनवाल्लभ्यम्, आत्मजाः= पुत्राः मित्राणि सुहृदः= बान्धवाः स्वजनाः धनं= वित्तम् एषां भागी

भवति। शीतगौ चन्द्रे धर्मस्थे= नवमस्थानश्रिते जातो भवति। निष्पत्तिः= निष्पादनं सर्वं कर्म समुपैति, गच्छति। धर्मधनधीशौर्ययुतः धर्मेण धनेन= वित्तेन धिया= बुद्ध्या शौर्येण=बलेन युतः एवं विधः कर्मगे दशमस्थानस्थे चन्द्रे जातो भवति। ख्यातः=सर्वत्र प्रसिद्धः, भावगुणान्वितः भाव =एकादशो लाभस्थानं तेनान्वितः सलाभः इत्यर्थः। एवं विधो भवगते =एकादशस्थे चन्द्रे जातो भवति। क्षुद्रो =हिंस्रस्वभावः अङ्गहीनः= अवयवरहितः द्वादशस्थे चन्द्रे जातो भवति। इति चन्द्रचारः।

**अवबोधप्रश्नः**

3. **सप्तमगते भानौ जातः कीदृग् भवति?**

---

**।।लग्नादिद्वादशभवनगते कुजे जातस्य फलम्।।**

लग्नस्थे कुजे प्रहारादिना क्षततनुः, धनगे द्वितीयस्थे कदन्नः, धर्मे अघवान् पापरतो भवति। अन्यसंस्थोदिनकरप्रतिमः स्थितो दिनकरप्रतिमो तृतीयचतुर्थपञ्चमषष्ठसप्तमाष्टमदशमैकादशद्वादशेषु यान्येवादित्यस्य फलान्यभिहितानि तान्येव भौमस्य वाच्यानि। तद्यथा तृतीये मतिविक्रमवान् चतुर्थे विसुखः पीडितमानसः पञ्चमे सुतधनवर्जितः,षष्ठे बलवान् शत्रुजितश्च सप्तमे स्त्रीभिः, परिभवं गतः अष्टमे स्वल्पात्मजः विकलेक्षणश्च नवमे सुतशौर्यभाक्, दशमे सुखशौर्यवान् एकादशे प्रभूतधनवान् द्वादशे पतितः। इति भौमचारः।

**।।बुधस्य लग्नादिद्वादशभावेषु जातस्य फलम्।।**

अथ बुधचारः। विद्वान् धनी इत्यादि। ज्ञे लग्नगते विद्वान् भवति, द्वितीये धनवान् भवति, तृतीये प्रखलः प्रकर्षेण खलो दुर्जनः चतुर्थे पण्डितः पञ्चमे मन्त्री षष्ठे शत्रुः विगतरिपुः सप्तमे धर्मज्ञः. विश्रुतगुणः, परतो अनन्तरान्यस्थाने अर्कवत् सूर्यवत्। नवमदशमैकादशद्वादशेषु यान्यर्कस्य फलानि अभिहितानि तान्येव बुधस्य वाच्यानि। तद्यथा नवमे सुतार्थसुखभाक् , दशमे सुखशौर्यभाक्, एकादशे प्रभूतधनवान् द्वादशे पतितः इति।

**लग्ने कुजे क्षततनुर्धनगे कदन्नो धर्मे अघवान् दिनकरप्रतिमोऽन्यसंस्थः ।**

**विद्वान् धनी प्रखलपण्डितमन्त्र्यशत्रुर्धर्मज्ञविश्रुतगुणः परतोऽर्कवज्ज्ञे ।। ६।।**

**कठिणपदार्थः** लग्नस्थे कुजे प्रहारादिना क्षततनुः=विक्षतशरीरः, धनगे=द्वितीयस्थे कदन्नः =कुत्सितान्नाशी भवति। धर्मे=नवमे अघवान्= पापरतो भवति। अन्यसंस्थो दिनकरप्रतिमः= अन्येषु परिशिष्टस्थानेषु स्थितो दिनकरप्रतिमो अर्कतुल्यफलः। तृतीयचतुर्थपञ्चमषष्ठसप्तमाष्टमदशमैकादशद्वादशेषु यान्येवादित्यस्य फलान्यभिहितानि तान्येव भौमस्य वाच्यानि। तद्यथा तृतीये मतिविक्रमवान्, चतुर्थेविसुखः=पीडितमानसः, ज्ञे =बुधे लग्नगते, विद्वान्= पण्डितो भवति, द्वितीये धनवान् भवति, तृतीये प्रखलः= प्रकर्षेण, खलो =दुर्जनः, चतुर्थे पण्डितः=पञ्चमे, मन्त्री षष्ठे शत्रुः=विगतरिपुः सप्तमे धर्मज्ञः विश्रुतगुणः=प्रख्यातगुणः, परतो अनन्तरान्यस्थाने अर्कवत् सूर्यवत्।

**अवबोधप्रश्नः**

4. **दशमगते कुजे जातो कीदृशो भवति?**

---

**।।जीवे लग्नादिद्वादशभावानां फलम्।।**

जीवे गुरौ विलग्नात् प्रभृति स्थितेषु द्वादशेषु स्थानेषु क्रमशः परिपाट्यैतानि फलानि। तद्यथा लग्नस्थे गुरौ विद्वान् पण्डितो भवति। द्वितीये सुवाच्यः शोभनवचनः, तृतीये कृपणः अदाता, चतुर्थे सुखी, पञ्चमे धीमान्, बुद्धिमान्, षष्ठे शत्रुः, विगतरिपुः सप्तमे पितृतो अधिकः पितुः सकाशाद् गुणाधिकः, अष्टमे नीचः, स्वकुलानुचित कर्मकृत्, नवमे विद्यमान तपाः, दशमे सधनः सवित्तः, एकादशे सलाभः लाभयुक्तः, द्वादशे खलः क्रूरचेष्टः इति बृहस्पतिचारः।

**विद्वान् सुवाक्यः कृपणः सुखी च धीमानशत्रुः पितृतोऽधिकश्च।**

**नीचस्तपस्वीसधनः सलाभः खलश्च जीवे क्रमशो विलग्नात्।। ७।।**

**कठिणपदार्थः**= लग्नस्थे गुरौ विद्वान् =पण्डितो भवति। द्वितीये सुवाच्यः= शोभनवचनः, तृतीये कृपणः =अदाता, चतुर्थे सुखी, पञ्चमे धीमान्= बुद्धिमान्, षष्ठे शत्रुः=विगतरिपुः सप्तमे पितृतो =अधिकः, पितुः सकाशाद् गुणाधिकः, अष्टमे नीचः= स्वकुलानुचित कर्मकृत्, नवमे विद्यमान तपाः, दशमे सधनः=सवित्तः, एकादशे सलाभः=लाभयुक्तः, द्वादशे खलः=क्रूरचेष्टः इति बृहस्पतिचारः।

**अवबोधप्रश्नः**

5. **नवमेगते जीवे जातस्य स्वरूपं लिखत।**

---

**।।लग्नादिद्वादशभावगते शुक्रे जातस्य निसर्गः।।**

**स्मरनिपुणः सुखितश्च विलग्ने प्रियकलहोऽस्तगते सुरतेप्सुः ।**

**तनयगते सुखितो भृगुपुत्रे गुरुवदतोऽन्यगृहे सधनोऽन्त्ये ।। ८।।**

स्मरनिपुणःसुखितः एवं विधो विलग्नस्थे शुक्रे जातो भवति। प्रियकलहः सुरताभिलाषी एवं विधोअस्तगते सप्तमस्थे शुक्रे जातो भवति। तनयगते शुक्रे सुखितो भवति। गुरुदेवता अन्यगृहे अतो अस्मात् स्थानत्रयाद् अन्यस्मिन् गृहे स्थाने गुरुवत् जीववत्फलानि वक्तव्यानि। तद्यथा द्वितीये सुवाक्यो भवति। तृतीये कृपणः, चतुर्थे सुखी, षष्ठे शत्रुः, अष्टमे नीचः, नवमे तपस्वी, दशमे सधनः, एकादशे सलाभः, द्वादशे खलः, सधनो अन्त्ये मीने यत्र तत्र भावस्थे सधनः वित्तवान् भवति। स्थानोक्तं तत्फलं न भवति। केचिद् गुरुवदतस्तु झषे स्यादिति पठन्ति। अतो अनन्तरो परिशेष स्थानेषु गुरुवत्। झषे मीने द्रविणी स्यात् भवेदिति। इति शुक्रचारः।

**कठिणपदार्थः**=स्मरनिपुणः =कामकुशलः, सुखितः= सञ्जातसुखः एवं विधो विलग्नस्थे भृगुपुत्रे = शुक्रे जातो भवति। प्रियकलहः =कलहवल्लभः सुरतेप्सुः =सुरताभिलाषी एवं विधो अस्तगते सप्तमस्थे= शुक्रे जातो भवति। तनयगते पञ्चमस्थे शुक्रे सुखितो भवति। गुरुदेवता अन्यगृहे अतो अस्मात् स्थानत्रयाद् अन्यस्मिन् गृहे स्थाने गुरुवत्= जीववत्फलानि वक्तव्यानि। तद्यथा द्वितीये सुवाक्यो भवति। तृतीये कृपणः, चतुर्थे सुखी, षष्ठे शत्रुः, अष्टमे नीचः, नवमे तपस्वी, दशमे सधनः, एकादशे सलाभः, द्वादशे खलः, सधनो अन्त्ये = मीने यत्र तत्र भावस्थे सधनः= वित्तवान् भवति। स्थानोक्तं तत्फलं न भवति। केचिद् गुरुवदतस्तु झषे द्विणी स्यादिति पठन्ति। अतो अनन्तरो परिशेष स्थानेषु गुरुवत्। झषे=मीने द्रविणी स्यात् भवेदिति।

**अवबोधप्रश्नः**

6. **सप्तमे शुक्रे जातो कीदृशो भवति?**

---

अदृष्टार्थः रोगी मदनवशगः, अत्यन्तमलिनः शशित्वे पीडार्तो असलवाक् एवं विधः सवितृसुते लग्नस्थिते जातो भवति। यदि तुलाधन्विमकरकुम्भमीनानाम् अन्यतमो राशिः लग्नगतो न भवति तदा तदेव फलं भवति। एषामन्यतमे लग्नगे तस्य सौरस्य फलमाह। गुरुस्वर्क्षोच्चस्थ इति। गुरुक्षेत्रे धन्विमीनौ शनैश्चरस्य स्वर्क्षे मकरकुम्भौ तस्यैवोच्चस्तुला एषामन्यतमो राशिः यदि लग्नगतो भवति तत्र स्थिते च सौरे नृपतिसदृशः भवति। ग्रामाणां पुराणां वा अधिपतिः, सुविद्वान् पण्डितः, चार्वाङ्गः शोभनावयवश्च भवति। केचित् सुहृत् स्वर्क्षोच्चस्थ इति पठन्ति। तदयुक्तम्। यस्मात् सारावल्याम् उक्तम्। यस्मात् सारावल्याम् उक्तम्।

**"स्वोच्चे स्वजीवभवने क्षितिपालतुल्यो लग्ने अर्कजे भवति देशनराधिनाथः।**

**शेषेषु दुःखगदपीडित एव बाल्ये दारिद्र्यकामवशगे मलिनो अलसश्च।"**

दिनकरसमो अन्यत्र कथित इति। अन्यत्र द्वितीयादिषु स्थानेषु दिनकरसम अर्कतुल्यः कथित उक्तो यान्यादित्यस्यफलानि अभिहितानि। तान्यैव सौरस्य वाच्यानि। तद्यथा

भूरिद्रव्यो नृपहृतधनो वक्ररोगी च भवति। तृतीये मतिविक्रमवान्, चतुर्थे विसुखः पीडितमानसः, पञ्चमे असुतो धनवर्जितः, षष्ठे बलवान् शत्रुनिर्जितः, सप्तमे स्त्रीभिः परिभवं गतः, अष्टमे स्वल्पात्मजो विकलेक्षणश्च, नवमे सुतार्थसुखभाक्, दशमे सुखशौर्यभाक्, एकादशे प्रभूतधनवान् द्वादशे पतित इति शनैश्चरचारः।

**अदृष्टार्थो रोगी मदनवशगोऽत्यन्तमलिनः शिशुत्वे पीडार्तः सवितृसुत लग्नेत्यलसवाक्।**

**गुरु स्वत्र्क्षोच्चस्थे नृपति सदृशो ग्रामपुरपः सुविद्वांश्चार्वङ्गो दिनकरसमोऽन्यत्रकथितः।** ९।

**कठिणपदार्थः=** अदृष्टार्थः=नित्यं दरिद्रः, रोगी=व्याधितः, मदनवशगः= कामाधीनः, अत्यन्तमलिनः=अतीवमलोपेतः, शशित्वे =बाल्ये, पीडार्तो =व्याध्यार्दितः असलवाक् =अव्यक्तभाषी एवं विधः सवितृसुते=सौरे लग्नस्थिते जातो भवति। यदि तुलाधन्विमकरकुम्भमीनानाम् अन्यतमो राशिः लग्नगतो न भवति तदा तदेव फलं भवति। एषामन्यतमे लग्नगे तस्य सौरस्य फलमाह। गुरुस्वर्क्षोच्चस्थ इति। गुरुक्षेत्रे=धन्विमीनौ शनैश्चरस्य स्वर्क्षे =स्वक्षेत्रे मकरकुम्भौ तस्यैवोच्चस्तुला एषामन्यतमो राशिः यदि

लग्नगतो भवति तत्र स्थिते च सौरे नृपतिसदृशः राजतुल्यः भवति। ग्रामाणां पुराणां वा अधिपतिः, सुविद्वान्=पण्डितः, चार्वाङ्गः= शोभनावयवश्च भवति। केचित् सुहृत्= स्वर्क्षोच्चस्थ इति पठन्ति। तदयुक्तम्।

**अवबोधप्रश्नः**

7. तुला लग्नगते शनौ जातः कीदृशो भवति?

---

**सुहृद् अरिपरकीयस्वऋक्षतुङ्गस्थितानां फलम् अनुपरिचिन्त्यं लग्नदेहादि भावैः ।**

**समुपचय विपत्ती सौम्यपापेषु सत्यः कथयति विपरीतं रिःफषष्ठाष्टमेषु ।। १०।।**

यदेतत्प्रतिगृहं लग्नात्प्रभृति द्वादशेषु स्थानेषु फलमनुपरिचिन्त्यम्। भावा तनुकुटुम्बसहोत्थादयः। लग्नदेहादिभावैरित। लग्नं देहः शरीरं परिकल्प्यम्। लग्नादारभ्य तनुकुटुम्बसहोत्थादयो भावाः परिकल्प्याः। अत्र का भ्रान्तिः? तत्रोच्यते, अस्त्येव। शशिभान्न परिकल्प्या लग्नात् परिकल्प्याः, तेषु शरीरादिभावेषु यो ग्रहो व्यवस्थितः स तस्य भावस्य पुष्टिं कृशतां वा करोति। कथमित्याह? सुहृद्परकीयस्वर्क्षतुङ्गस्थितानां फलमनुपरिचिन्त्यं परिकल्प्यम्। भावस्थो ग्रहो यादृशे क्षेत्रे भवति तादृशं फलं प्रयच्छति। नन्वत्र सुहृदादिक्षेत्राणां परिगणना कृता तत्र न शुभाशुभफलविभागः उक्तः। उच्यते। अर्थाद् एवैतद् गम्यते। यथा मित्रक्षेत्रस्थो भाववृद्धिं करोति। शत्रिक्षेत्रस्थो तद् हानिं करोति। तत्र च ये शुभाशुभक्षेत्रे, नोक्ते त्रिकोणनीचभे ते अपि ग्राह्ये। मित्रादिक्षेत्रान्यक्षेत्रोपलक्षणानि ज्ञेयानि। कः पुनरपि अरिपरकीयविशेष उच्यते। उदासीनो अत्र परो अभिप्रेतः। अरिः शत्रुः। परः उदासीनः । तत्र एतदुक्तं भवति। पापः सौम्यो वा नीचस्थः शत्रुक्षेत्रस्थो वा यस्मिन् भावे व्यवस्थितः तस्य भावस्य हानिं करोति।

उदासीनक्षेत्रस्थे न हानिं च वृद्धिम्। मित्रक्षेत्रे स्वक्षेत्रे मूलत्रिकोणे स्वोच्चे व्यवस्थितो भावस्य वृद्धिमिति। एतत् केषाञ्चिन्मते। तथा च भगवान् गार्गिः। नीचार्क्षरिपुगृहस्थो ग्रहो भावविनाशकृत्। उदासीनगृहे मध्यो मित्रर्क्षस्वत्रिकोणगः। स्वोच्चगश्च ग्रहो अवश्यं भाववृद्धिकरः स्मृतः। इति। सत्याचार्यस्तु पुनः समुपचयविपत्ती सौम्यपापेषु कथयति यस्मिन् भावे सौम्याः स्थितास्तस्य भावस्य विपत्तिं हानिं कुर्वन्ति। किन्तु रिःफषष्ठामेष्वातद् विपरीतं कथयन्ति। रिःफे द्वादशे स्थाने भावहानिं कुर्वन्ति। पापाः वृद्धिं , तेन रिःफे सौम्या व्ययहानिं कुर्वन्ति पापाः व्ययवृद्धिम्। षष्ठे सौम्याः शत्रुहानिं कुर्वन्ति पापाः शत्रुवृद्धिम्।

अष्टमे सौम्याः मृत्युहानिं कुर्वन्ति पापाः मृत्युवृद्धिमिति। तथा च सत्यः सौम्याः पुष्टिं पापस्तद्धानिं संश्रिता ग्रहाः कुर्युः। मर्त्यादिषु निधने अन्त्ये षष्ठे च विपर्ययात् फलदाः। " ननु पूर्वं सौम्यानां पापानां चोपचयस्थानावस्थितानां शुभं फलं व्याख्यातं तत्कथं षष्ठस्थाः पापाःशत्रुवृद्धिं कुर्वन्ति। अत्रोच्यते पूर्वं । सामान्येनोक्तम्। यत्र च वाचनिकी बाधा भवति, तत्र सामान्यं भावफलं त्यक्त्वा यथोक्तफलं वक्तव्यम्। यद्येवं कथं स्वल्पजातके उक्तम्- पुष्णन्ति शुभा भावान् मूर्त्यादीनघ्नन्ति संस्थिताः पापाः। सौम्याः षष्ठे अरिघ्नाः सर्वे नेष्टा व्ययाष्टमगाः। इति। अत्रोच्यते।बृहज्जातके आचार्येणोक्तं स्वल्पजातके अन्याचार्यमतेन प्रतिज्ञातम् आचार्येण ज्यौतिषागमशास्त्रं विप्रतिपत्तौ न योग्यम् अस्माकम्। स्वयममेव विकल्पयितुं किन्तु बहूनां मतं वक्ष्ये। यत्राचार्याणां समसङ्ख्यानां मतभेदसमत्वं भवति तत्र वराहमिहिरो मतद्वयमपि दर्शयति।

**उच्चत्रिकोणस्वसुहृत् शत्रुनीचगृहार्कगैः।शुभं सम्पूर्णपादोनदलपादाल्पनिष्फलम्।। ११।।**

ग्रहकुण्डलिकायां फलं द्विविधमुक्तं शुभमशुभं च। तत्र यत् शुभं फलं तदुच्चत्रिकोणस्वसुहृत् शत्रुनीचगृहार्कगैः ग्रहर्दत्तं यथाक्रमं पादोन दल पाद अल्प निष्पलं भवति। तेनोच्चस्थ ग्रहः सम्पूर्ण प्रयच्छति। मूलत्रिकोणस्थः पादोनं स्वक्षेत्रस्थो अर्द्धम्, मित्रक्षेत्रस्थः पादफलम्, शत्रुक्षेत्रस्थः पादोनं, मित्रक्षेत्रस्थो अर्द्धं, स्वक्षेत्रस्थो पादं, त्रिकोणस्थः पादाद् अत्यल्पम्, उच्चस्थौ न किञ्चिदपि। एवं जातककाले ग्रहस्य अवस्थानात् फलं वाच्यम्।दशाष्टकवर्गाद् फलपक्तिकाले शुभाशुभं वा पुष्टफलं बलवानेव प्रयच्छिति। एतच्च पूर्वमेव व्याख्यातम्। उक्तं च।

**"तत्कालं बलयुक्तो भवति यदि दशाधिपस्तस्य।शुभमशुभं वापि फलं वक्तव्यम् नित्यमेव परिपूर्णम्।"**

**उत्तराणि-**

1. शूरः, स्तब्धः, विकलनयनः, निघृणः, एवं विधो अर्के रवौ तनुस्थे लग्नस्थे जातो भवति।
2. मतिः, बुद्धिः विक्रमः पराक्रमः एतौ विद्यते यस्य स तथाविधः तृतीयगे अर्के रवौ भवति।
3. ईर्ष्युः, तीव्रमदः एवं विधो मदे सप्तमस्थे चन्द्रे जातो भवति।
4. दशमगते कुजे जातो सुखशौर्यवान् भवति।
5. नवमे विद्यमान तपाः एवं विधः नवमे जीवे जातो भवति।
6. प्रियकलहः सुरताभिलाषी एवं विधो अस्तगते सप्तमस्थे शुक्रे जातो भवति।
7. तुला लग्नगते शनौ जातः नृपति सदृशो भवति।

## ।।आश्रययोगाध्यायः।।

**उद्देश्यम्**

- मित्रक्षेत्रगतानां फलम्।
- मित्रदृष्टस्य फलम्।
- कुम्भलग्नजातस्य फलम्।
- होरास्थानां ग्रहाणां फलम्।
- होरागतफलम्।
- द्रेष्काणवस्थानात् चन्द्रस्य फलम्।
- मेषादिनवांशकजातस्य स्वरूपम्।
- भौमसौरयोः स्वत्रिंशांशकस्थयोः फलम्।
- जीवबुधयोः स्वत्रिंशांशकस्थयोः जातस्य स्वरूपम्।
- शुक्रस्य स्वत्रिंशांशकस्थयोः भौमादित्रिंशांशकस्थयोः चन्द्रार्कयोः च जातस्य स्वरूपम्।

### ।।मित्रक्षेत्रगतानां फलम्।।

**कुलसमकुलमुख्यबन्धुपूज्याधनि सुखिभोगि नृपाः स्वभैकवृद्ध्या ।**
**परविभवसुहृत् स्वबन्धुपोष्या गणपबलेशनृपाश्च मित्रभेषु ।। १।।**

स्वभेषु स्वराशिषु एकवृद्ध्या स्थितैः ग्रहैर्जाताः कुलसमकुलमुख्यबन्धुपूज्या धनिसुखभोगिनृपाः पुरुषा भवन्ति। यस्मिन् तस्मिन् ग्रहे स्वक्षेत्रगतजातः कुलसमः स्वकुलतुल्यो भवति। एवं द्वयोः स्वक्षेत्रस्थयोः कुलमुख्यः स्वकुलप्रधानः स्वकुलाधिकः त्रिषु बन्धूनां पूज्यः, चतुर्षु धनी वित्तवान्, पञ्चसु सुखी, षट्सु भोगी नृपतुल्यः केचिद्भूत इति पठन्ति। स चोपमानाद् भूपस्तत्समत्वमेवमुक्तम्। स्वल्पजातके अपि युक्तम्।

'कुलतुल्यकुलाधिकबन्धुमान्यधनिभोगिनृपसमनरेन्द्राः'।एवं षट्सु नृपसमः सप्तसु नृपो राजा, एवं गुणः एकोत्तरवृद्ध्या स्वक्षेत्रगेषु जातो भवति। परविभवेत्यादि। एकवृद्ध्या इत्यनुवर्तते। मित्रभेष्वेकवृद्ध्या स्थितेषु परविभवेत्यादि। एकवृद्ध्या इत्यानुवर्तते। मित्रभेष्वेकवृद्ध्या स्थितेषु परविभवपोष्यो भवति। पराजीवीत्यर्थः।

द्वयोः सुहृत्पोष्यः त्रिषु स्वपोष्यो ज्ञातिपोष्यो भवति। चतुर्षु बन्धुपोष्यः भ्रातृपोष्य इत्यर्थः। पञ्चसु गणपः गणस्वामी,षड्षु बलेशो सेनापतिः, सप्तसु नृपो राजा।

**अवबोधप्रश्नः**

1. **चत्वारो ग्रहाः स्वक्षेत्रे जातो कीदृशो भवति?**

---

**।।मित्रदृष्टस्य फलम्।।**

**जनयति नृपमेकोऽप्युच्चगो नित्रदृष्टः प्रचुरधनसमेतं मित्रयोगाच्चसिद्धम्।**

**विधन विसुख मूढ व्याधितो बन्धतप्तो वधदुरित समेतः शत्रुनीचर्क्षगेषु।२।**

एकोऽप्युच्चगतो ग्रहो मित्रदृष्टः सुहृदवलोकितः नृपं राजानां जनयति उत्पादयति एवमेकोप्युच्चगतो मित्रयोगान्मित्रयुक्तत्वात्प्रचुरधनसमेतं सिद्धं च जनयति । प्रचुरधनसमेतं पर्याप्तवित्तयुक्तं सिद्धं च सर्वत्रावाप्तपूज्यं च जनयति। विधनविसुखविमूढेत्यादि। एकवृघ्या शत्रुनीचर्क्षगेषु शत्रुक्षेत्रस्थेषु नीचगेषु वा ग्रहेषु विधनविसुखविमूढव्याधिता बन्धतप्ता वधदुरितसमेता जाताः भवन्ति। तेन यस्य जन्मन्येको ग्रहः शत्रुक्षेत्रगो नीचगो वा भवति। स विधनः विगतधनो भवति दरिद्रः। यस्य द्वौ स विसुखो दुःखितः। यस्य त्रयः समूढः विचित्तः। यस्य चत्वारः स व्याधितः पीडितः। यस्य षट् सतप्तो भवति बहुदुःखसंतप्तः। यस्य सप्त सवधदुरितसमेतो भवति। वधवध्यो दुरितं दुष्कृत्यं वध एव दुरितं तेन समेतो वा। नीचे यद्यपि सप्त न सम्भवन्ति तथापि वज्रादिवत्पूर्वाशास्त्रानुसारेण तत्फलोपदेशः।

**कुम्भलग्नजातस्य फलम्।**

**नकुम्भलग्नं शुभमाहसत्यो नभागभेदाद्-यवनावदन्ति ।**

**कस्यांशभेदो न तथास्ति राशेरतिप्रसङ्गस्त्विति विष्णुगुप्तः ।। ३।।**

सत्याचार्यः कुम्भलग्नं जन्मनि स शुभमाह न शोभनमुक्तवान्। तथा च सत्यः –जन्मनि चन्द्रः श्रेष्ठः प्रवदेद् होरारिनिधनवर्जः स्यात्। होरा च भवेदिष्टा द्विपदेष्विह कुम्भवर्ज्यं हि।इति। न भागभेदादिति।

पुराणयवना भागभेदाद् द्वादशभागभेदाज्जन्मनि कुम्भलग्नमशुभमिति यस्य तस्य लग्नस्य कुम्भद्वादशभागे जन्म न शुभमिति तेषां मतं न कुम्भलग्ने।तथा चतन्मतानुसारिमा श्रुतकीर्तिना "सर्वस्मिंल्लग्नगते कुंभद्विरसांशको यदा भवति।राशौ न तदा सुखितः परान्नभोजी भवत्पुरुषः। इति। "

अत्र विष्णुगुप्तचामाक्यावहतुः। कस्यांश भेद इति। यदुक्तम्। भागभेदात् कुंभलग्नं जन्मनि न शुभम्। तत्कस्यराशे लग्नगतस्य। कुंभद्वादशभागो नास्त्यपि तु सर्वस्यैवास्ति विद्यते। तस्माद्यदि कुंभस्य द्वादशभागे न सशुभस्तदा सर्वाण्येव लग्नोक्तानि फलानि निरर्थकानि भवन्ति। तस्मादितिप्रसङ्गः। तेन कुम्भलग्नमेवाशुभम्। न तत्तद्भागभेद इति। तथा च तद्वाक्याम्।–

**कुम्भद्वादशभागो लग्नगतो न प्रशस्यते यवनैः।**

**यद्येवं सर्वेषां लग्नगतानाम् अनिष्टफलता स्यात्।।**

**घटयोगद्राशीनां न मतं तत्सर्वशास्त्रकाराणाम्।**

**तस्मात् कुम्भविलग्नो जन्मन्यशुभो न तद्भागः।** इति। 3

**अवबोधप्रश्नः**

2. किं लग्नम् अशुभमिति कथयति?

---

**होरास्थानां ग्रहाणां फलम्।**

आदित्यहोरां प्राप्तेषु पापाः प्रथमारुद्धस्था यदा भवन्ति तदा जातः महोद्यमबलार्थयुतः महत्सु कार्येषूद्यमरतो, बलवान् अर्थयुतो अतितेजो होरां यातेषु समराशिषु प्रथमार्द्धस्थाः सौम्या भवन्ति, तदा जातो मार्दवयुतो, कान्तियुतो, सौख्ययुतः, सौभाग्ययुतः, धीयुतः, मधुरवाक्ययुतः प्रियंवदः एतैः गुणैः युतः जातो भवति।

**यातेष्वसत्स्वसमभेषु दिनेशहोरां ख्यातो महोद्यमबलार्थयुतोऽतितेजाः।**

**चान्द्रीं शुभेषु युजि मार्दवकान्तिसौख्यसौभाग्यधीमधुरवाक्ययुतः प्रजातः।। ४।।**

असद्ग्रहाः=पापाः, तेष्वसत्सु पापेषु=असमभेषु, विषमराश्यवस्थितेषु न केवलं यावद्दिनेशहोरामादित्यहोरां यातेषु =प्राप्तेषु विषमराशिषु पापाः प्रथमारद्धस्था यदा भवन्ति तदा जातः ख्यातः सर्वत्र प्रसिद्धः महोद्यमबलार्थयुतःमहत्सु कार्येषूद्यमरतो, बलवान् =वीर्यवान्, अर्थयुतो=धनवान्, अतितेजो =अतितेजस्वी होरां यातेषु समराशिषु प्रथमार्द्धस्थाः सौम्या भवन्ति, तदा जातो मार्दवयुतो मृदुस्वभावः, कान्तियुतो=द्युतिमान्, सौख्ययुतः=सुखान्वितः, सौभाग्ययुतः =सर्वजनप्रियः, धीयुतः=मतिमान्, मधुरवाक्ययुतः= प्रियंवदः एतैः गुणैः युतः जातो भवति।

**अवबोधप्रश्नः**

3. आदित्यहोरां प्राप्तेषु पापाः प्रथमारद्धस्था यदा भवन्ति तदा जातः कीदृशो भवति?

---

## होरागतफलम्।

तास्वेव पूर्वोक्तासु होरास्वपरर्क्षगेषु अन्त्यराशि आश्रितेषु जाता नराः सर्वेषु पूर्वोक्तगणेषु मध्याः भवन्ति। एतदुक्तं भवति। समराशिषु रविहोरायां पापग्रहाणाम् अवस्थानां भवति तदा जातानां पूर्वोक्तगुणा मध्या भवन्ति। एवं विषमराशिषु चन्द्रहोरायां सौम्याग्रहाणाम् अवस्थानां तदा जातानां पूर्वोक्तगुणा भवन्ति। व्यत्यस्तहोराभवनस्थितेषु इति।

व्यत्यस्तासु विपरीतस्थासु होरासु व्यत्यस्तेषु च भवनेषु राशिषु ग्रहेषु जाताः मर्त्याः मनुष्या उक्तगुणैः, प्रागुद्दिष्टैः गुणैः विहीना वर्जिता भवन्ति। एतदुक्तं भवति समराशिषु चन्द्रहोरायां पापानामवस्थानां भवति, तदा जाता महोद्यमबलार्थहीना भवन्ति वितेजसश्च। एवं विषमराशिषु आदित्यहोरायां सौम्यानाम् अवस्थानां भवति तदा जाता मार्दवकान्तिसौभाग्यधी मधुरवाक्य विहीनाः भवन्ति। अत्र च दर्शिते ग्रहावस्थाने यथा यथाग्रहबहुत्वमं भवति तता गुणबहुत्वं वक्तव्यम्।

**तास्वेवहोरास्वपरऋक्षगेषु ज्ञेया नराः पूर्वगणेषु मध्याः।**

**व्यत्यस्तहोराभवनस्थितेषु मर्त्या भवन्त्युक्तगुणैर्विहीनाः ।। ५।।**

**अन्वयार्थः** तास्वेव =पूर्वोक्तासु होरास्वपरर्क्षगेषु =अन्त्यराशि आश्रितेषु जाता नराः सर्वेषु= पूर्वोक्तगणेषु मध्याः भवन्ति।

---

## द्रेष्काणस्थानात् चन्द्रस्य फलम्।

आत्मीयद्रेष्काणे यदा चन्द्रः स्थितो भवति अथवा सुहृद् द्रेष्काणे स्थितः तदा जातः कल्याणरूपगुणः प्रशस्तरूपः प्रशस्तगुणश्च भवति। आत्मीयद्रेष्काणे मित्रद्रेष्काणावस्थानां विनान्याद् द्रेष्काणावस्थिते चन्द्रमसि विचारः। यस्माद् उक्तान्यागस्त्योअधिपतिः स यदि चन्द्रस्य तत्कालमध्यस्थस्तदा जातस्य मध्यमौ रूपगुणौ भवतः। अथ द्रेष्काणाधिपति चन्द्रमसि तत्कालमरिस्तदा जातो रूपगुणान्वितो भवति।

---

## मेषादिनवांशकजातस्य स्वरूपम्।

व्यालोद्यतायुधेति। व्यालद्रेष्काणः सर्पद्रेष्काणः,तत्रस्थे चन्द्रे जातः तीक्ष्णो उग्रो भवति। उद्यतायुधद्रेष्काणः सायुधस्तत्स्थे चन्द्रे जातो हिंस्रो मारणात्मको भवति। प्राणिघातररतः इत्यर्थः। चतुश्चरणः तत्रस्थे चन्द्रगुरुतल्परतो गुरुदाराभिगामी भवति। अण्डजद्रेष्काणः पक्षिद्रेष्काणः तत्रस्थे चन्द्रे अटनः परिभ्रमणशीलो भवति। आत्मीयादिद्रेष्काणस्थे चन्द्रमसि व्यालद्रेष्काणस्थे चन्द्रे संभवतः फलद्वयमपि वक्तव्यम्। अत्र व्यालद्रेष्काणाः कर्कटद्वितीयः कर्कटतृतीयः वृश्चिकाद्यः वृश्चिकद्वितीयः मीनतृतीयः उद्यतायुधद्रेष्काणाः।

**कल्याणरूपगुणम् आत्मसुहृद् दृकोणे चन्द्रोऽन्यगस्तदधिनाथगुणं करोति ।**

**व्यालोद्ययायुधचतुश्चरणाण्डजेषु तीक्ष्णोऽतिहिंस्रगुरुतल्परतोऽटनश्च ।। ६।।**

**अन्वयार्थः=** कल्याणरूपगुणः=प्रशस्तरूपः प्रशस्तगुणश्च भवति। आत्मीयद्रेष्काणे मित्रद्रेष्काणावस्थानां=विनान्याद् द्रेष्काणावस्थिते चन्द्रमसि विचारः। व्यालद्रेष्काणः=सर्पद्रेष्काणः, तत्रस्थे चन्द्रेजातः तीक्ष्णो उग्रो भवति। उद्यत=आयुधद्रेष्काणः सायुधस्तत्स्थे चन्द्रे जातो हिंस्रो मारणात्मको भवति। अण्डजद्रेष्काणः=पक्षिद्रेष्काणः तत्रस्थे चन्द्रे अटनः परिभ्रमणशीलो भवति। व्यालद्रेष्काणाः=कर्कटद्वितीयः कर्कटतृतीयः वृश्चिकाद्यः वृश्चिकद्वितीयः मीनतृतीयः उद्यतायुधद्रेष्काणाः।

**अवबोधप्रश्नः**

4. पक्षिद्रेष्काणः तत्रस्थे चन्द्रे जातः कीदृशः भवति?

**भौमसौरयोः स्वत्रिंशांशकस्थयोः फलम्।**

**स्तेनो भोक्ता पण्डिताढ्यो नरेन्द्रः क्लीबः शूरो विष्टिकृद् दासवृत्तिः ।**
**पापो हिंस्रोऽभीश्च वर्गोत्तमांशेष्वेषाम् ईषाराशिवद् द्वादशांशैः ।। ७।।**

जायान्वितः बलं विभूषणानि, सत्वम् एतैः युक्तः, तथातितेजाः, एवं विधः कुजे भौमे स्वभागे, स्वत्रिंशांशकस्थे, जातो भवति। रोगी मतस्वयुवतिः, मृता स्वा आत्मीया युवतिः भार्या यस्य। विषमः अन्यदारोन्यसम्बन्धिनी दारा यस्य परादारासक्तः। दुःखी परिच्छदयुतो गुहवस्त्रपरिवारोपेतः, मलिनः एवं विधो अर्कपुत्रे सौरे स्वत्रिंशांशकस्थे जातो फलं भवति। नन्वत्र विंशांशकग्रहणं नास्ति, तत्कथं ज्ञायते त्रिंशांशकफलमेतत्। उच्यते शुभफलाभिधाने त्रिंशांशकग्रहाणं भविष्यति।

**जीवबुधयोः स्वत्रिंशांशकस्थयोः जातस्य स्वरूपम्।।**

**जायान्वितो बलविभूषणसत्वयुक्तोस्तेजोऽतिसाहसयुतश्च कुजे स्वभागे।**

**रोगी मृतस्वयुवतिर्विषमोऽन्यदारो दुःखी परिच्छदयुतो मलिनोऽर्कपुत्रे।। ८।।**

जायान्वितः=भार्ययुक्तः, बलं=वीर्यम्, विभूषणानि=अलङ्करणानि, सत्वम्= औदार्यम् एतैः युक्तः, तथातितेजाः= अतिसाहसेन समीक्षितकार्यकरणेन च युक्तः, एवं विधः कुजे भौमे स्वभागे, स्वत्रिंशांशकस्थे, जातो भवति। रोगी= व्याधितः, मतस्वयुवतिः=मृता स्वा आत्मीया युवतिः भार्या यस्य। विषमः=क्रूरः अन्यदारोन्यसम्बन्धिनी दारा यस्य परादारासक्तः। दुःखी= निःसुखपरिच्छदयुतो गुहवस्त्रपरिवारोपेतः, मलिनः=मलिनोपेतः, एवं विधो अर्कपुत्रे=सौरे स्वत्रिंशांशकस्थे जातो फलं भवति। नन्वत्र विंशांशकग्रहणं नास्ति, तत्कथं ज्ञायते त्रिंशांशकफलमेतत्। उच्यते शुभफलाभिधाने त्रिंशांशकग्रहाणं भविष्यति।

स्वांशे गुरौ धनयशः सुखबुद्धि युक्तास्तेजस्विपूज्यनिरुगुद्यमभोगवन्तः ।।
मेधाकलाक पटकाव्यविवादशिल्पशास्त्रार्थसाहसयुताः शशिजे अतिमान्याः।।९।।

**अवबोधप्रश्नः**

5. कुजे भौमे स्वभागे, स्वत्रिंशांशकस्थे, जातो कीदृशो भवति?

**शुक्रस्य स्वत्रिंशांशकस्थयोः भौमादित्रिंशांशकस्थयोः चन्द्रार्कयोः च जातस्य स्वरूपम्।**

**स्वे त्रिंशांशे बहुसुतसुखारोग्यभाग्यार्थरूपः।।**

**शुक्रे तीक्ष्णः सुललितवपुः सुप्रकीर्णेन्द्रियश्च।।**

**शूरस्तब्धौ विषमवधकौ सद् गुणाढ्यौ सुखिजौ चार्वङ्गे।।**

**अष्टौ रविशशियुतेष्वारपूर्वांशकेषु ।। १०।।**

बहुसुतः, बहुसुखः, निरोगेण, जनप्रियत्वेन, धनेन सुचारुतया संयुक्तः भार्यया कलत्रेण तथा तीक्ष्णः क्रूरः शोभनशरीरः सुप्रकीर्णेन्द्रियः विक्षिप्तेन्द्रियार्थः । बहुस्त्रीगमनशीलः एवंविधः शुक्रे स्वत्रिंशांशकस्थे जातो भवति। आरपूर्वांशकेषु भौमप्रथमेषु रविशशियुक्तेषु अर्कचन्द्रसंयुक्तेषु यथासंख्यं फलानि।भौमत्रिंशांशकस्थे अर्के शूरः, सङ्ग्रामप्रियः चन्द्रे स्तब्धश्चिरकारी, सौरत्रिंशांशकस्थे अर्के विषमः क्रूरो भवति। चन्द्रमसि वधकः, जीवत्रिंशांशकस्थे अर्के सद्गुणो भवति। चन्द्रमस्याढ्यः ईश्वरः, बुधत्रिंशांशकस्थेऽर्के सुखी भवति।चन्द्रे पण्डितः. शुक्रत्रिंशांशकस्थे शोभनशरीरः, चन्द्रे सर्वजनप्रियः, एवमारपूर्वेषु अंशेषु आरः अङ्गारकः पूर्वः प्रथमः येषाम् अंशकानां त्रिंशद्भागानां तेषु इति।

**अवबोधप्रश्नोत्तराणि-**

1. चतुर्षु ग्रहेषु स्वक्षेत्रे जातो बन्धुपोष्यः भवति।
2. कुम्भलग्नम् अशुभमिति कथयति।
3. आदित्यहोरां प्राप्तेषु पापाः प्रथमारब्धस्था यदा भवन्ति तदा जातः महोद्यमबलार्थयुतः महत्सु कार्येषूद्यमरतो, बलवान् अर्थयुतो अति तेजो भवन्ति।
4. पक्षिद्रेष्काणः तत्रस्थे चन्द्रे अटनः परिभ्रमणशीलो भवति।
5. जायान्वितः बलं विभूषणानि, सत्वम् एतैः युक्तः, तथातितेजाः, एवं विधः कुजे भौमे स्वभागे, स्वत्रिंशांशकस्थे, जातो भवति।

## ।।प्रकीर्णकाध्यायः।।

उद्देश्यम्।-

- ग्रहाणां परस्परं कारकम्।
- अन्यत् कारकलक्षणम्।
- कारकसंज्ञाप्रयोजनम्।
- दशापतिफलपाकम्।
- अष्टकवर्गस्य फलम्।

### ग्रहाणां परस्परं कारकम्।

स्वर्क्षे यो ग्रहः स्थितः यश्च स्वोच्चे स्थितः, यश्च मूलत्रिकोणे स्थितः, स च यदि लग्नकण्टकेषु केन्द्रस्वाश्रितः स्थितो भवति, एवं विधस्य ग्रहस्य अन्येऽपि एवं विधः, केन्द्रगो यदि भवति तदा तौ ग्रहौ अन्योन्यं कारकाख्यौ भवतः। अनेन प्रकारेण यः कर्मगः। यो यस्मात् ग्रहात् दशमस्थानस्थः स विशेषतः तेषां ग्रहाणां मध्यात् कारकसंज्ञा लभते। अत उक्तम्। कर्मगस्तु तेषां विशेषत इति।

**स्वर्क्षतुङ्गमूलत्रिकोणगाः कण्टकेषु यावन्ताश्रिताः ।**

**सर्वैव ते अन्योन्यकारकाः कर्मगस्तु तेषां विशेषतः ।। १।।**

स्वर्क्षे=स्वक्षेत्रस्थे यो ग्रहः स्थितः, यश्च तुङ्गे=स्वोच्चे स्थितः, यश्च मूलत्रिकोणे स्थितः, स च यदि लग्नकण्टकेषु=केन्द्रस्वाश्रितः स्थितो भवति, एवं विधस्य ग्रहस्य अन्येऽपि एवं विधः, केन्द्रगो यदि भवति तदा तौ ग्रहौ अन्योन्यं=परस्परं कारकाख्यौ भवतः। अनेन प्रकारेण यः कर्मगः। यो यस्मात् ग्रहात् दशमस्थानस्थः स विशेषतः विशेषेण तेषां ग्रहाणां मध्यात् कारकसंज्ञा लभते। अत उक्तम्। कर्मगस्तु तेषां विशेषत इति।

अवबोधप्रश्नः

1. कौ अन्योन्य कारकौ भवतः?

### अन्यत् कारकलक्षणम्।

अथ कर्कटोदये तस्थे चन्द्रे कुजो, सौरः, अर्कः, बृहस्पतिः, एते कुजयमारार्कसूरयः स्वोच्चगाः, आत्मीयतुङ्गस्था भवन्ति, कुजो मकरे यमस्तुलायाम् अर्को मेषे, सूरिः कर्काटके, तदा ते परस्परम् अन्योन्यकारकाः निगदिताः । अनेन प्रकारेण यावन्तो भवन्ति तावन्तः परस्परं काराकाख्याः अनेन उदाहरणेन प्रतिपादितं भवति। यथा पुरुषस्य जन्मलग्नात् केन्द्रं विना स्वक्षेत्रे उच्चत्रिकोणगाः अपि, परस्परं कण्टकगाः तदा, कारकसंज्ञामपि लभन्ते। लग्नगस्येति। ग्रहस्य प्राक् लग्ने समवस्थितस्य सकलः सर्वे ग्रहो अम्बरगाः, दशमस्थानश्चाम्बुगश्च चतुर्थस्थानश्च कारकसंज्ञो भवति। अनेन एतदुक्तं भवति, लग्नगो ग्रहः स्वक्षेत्रस्वोच्चत्रिकोणेषु, यद्यपि भवति, तस्माद्यो यो दशमस्थः चतुर्थो वा सोऽपि उच्चत्रिकोणस्वक्षेत्राणाम् अन्यतमस्थो भवति, लग्नगस्य सकलो अम्बराम्बुग इति।

**कर्कटोदय गते यथोडुपे स्वोच्चगाः कुजयमार्क सूरयः ।**

**कारका निगदिताः परस्परं लग्नगस्य सकलोऽम्बराम्बुगः ।। २।।**

कर्कटोदये= कुलीरलग्ने तस्थे चोडुपे =चन्द्रे कुजो= अङ्गारकः यमः =सौरः, अर्कः=आदित्यः, सूरिः=बृहस्पतिः, स्वोच्चगाः=आत्मीयतुङ्गस्था परस्परम्= अन्योन्यकारकाः निगदिताः ।

**अवबोधप्रश्नः**

2. ग्रन्थकर्त्रा उक्त उदाहरणं प्रतिपादयत।

---

### ग्रहाणां परस्परं कारकम्।

स्वत्रिकोणोच्चगो ग्रहः कारकत्वे हेतुः कारणं न केन्द्रस्थः तथा अन्योन्यस्य ग्रह लग्नकेन्द्रं विनाप्यवस्थितस्य यदि कश्चिद् ग्रहः, दशमस्थानस्थो भवति, स च स्वक्षेत्रोच्चमूलत्रिकोणानाम् अन्योन्यतमे भवति। यस्माच्च दशमस्तस्य यदि सुहृन्मित्रं निसर्गतो न केवलं यावत् तद्गुणसम्पन्नस्तेन मित्रगुणेन संयुक्ततात्कालिके मित्रामित्रविधिनाधिमित्रतां प्राप्तस्थाविधः सर्वग्रहः कारकाख्यो भवति। यस्य च दशमः स तस्य कारकाख्यो न भवति। कारकसंज्ञा यात्रायाम् उपयुज्यते। युक्तोपहतदशायां जन्मोदयनाथशत्रुपाके च

स्वदशेशकारकदशासंश्रयणीयो नरेन्द्रपतिः। इति। ससखिवेशिगृहयुक्तः कारकर्क्षेऽपि चन्द्रः जयसुखधनदाता तत्प्रहर्तनाथा इति।

**स्वत्रिकोणोच्चगो हेतुरन्योन्यं यदि चर्मगः।**

**सुहृत् तद्गुणसम्पन्नः कारकश्चापि सस्मृतः ।। ३।।**

---

**॥ कारकसंज्ञाप्रयोजनम्।।**

यस्य लग्नवांशी वर्गोत्तमाख्ये जन्म भवति, चन्द्रोऽपि वा वर्गोत्तमांशगता भवति तस्य शुभं जन्म। यस्मिन् राशौ पुरुषस्य जन्मसमये अर्कः स्थितः तस्माद् राशेः यो द्वितीयराशिः स वेशिसंज्ञः। चास्य प्रागुक्ते वेशिस्थाने सद्ग्रहः सौम्यग्रहो ज्ञसितगुरुसितानाम् अन्यतमो भवति तस्यापि शुभं जन्म। यस्य जन्मलग्नं केन्द्रचतुष्टयात् एकमपि अशून्यं केन्द्रं भवति तस्यापि शुभं जन्म। अत्र सौम्यग्रहाधिष्ठिते केन्द्रे विशेषेण शुभं जन्म। तस्मादुक्तमानेनैव। एकस्मिन्नपि केन्द्रे यदि सौम्ये न ग्रहोस्ति, यात्रायाम्। जन्मन्यथवा कर्मणि न तच्छुभं प्राहुः आचार्याः। यस्य जन्मनि कारकाख्याः कारसंज्ञो ग्रहा भवन्ति, तस्यापि शुभं जन्म। अत्र यथा गुणाधिक्यं तथा शुभतरमेव जन्म।

**शुभं वर्गोत्तमे जन्मवेशि स्थाने च सद्-गृहे।**

**अशून्येषु च केन्द्रेषु कारकाख्य ग्रहेषु च ।। ४।।**

**अवबोधप्रश्नः**

3. कस्य जन्म शुभं भवति?
4. कस्य राशिः वेशिसंज्ञा भवति?

---

**॥ दशापतिफलपाकम् ।।**

**मध्ये वयसः सुखप्रदाः केन्द्रस्थागुरुजन्मलग्नपाः।**

**पृष्ठोभयकोदयर्क्षगास्त्वन्ते अन्तः प्रथमेषु पाकदाः ।। ५।।**

गुरुः जन्मनि यत्र राशौ चन्द्रमा स्थितः तदधिपतिः जन्मपः यस्मिल्लग्ने जातः तदधिपः लग्नपः एषामन्यतमो यस्य लग्नकेन्द्रे भवति, तस्य वयोमध्ये सुखप्रदो भवति। यौवने सुखी भवति इत्यर्थः।अत्र च यवनेश्वरः।

जन्माधिपो लग्नपतिश्च येषां चतुष्टये स्याद्बलावन् गुरुर्वा ।

चतुर्षु होरादिषु सङ्गतः स्याद् चतुर्वयः कालफलप्रदः स्यात्।"

पृष्टोभये इत्यादि।दशापतिः दशाप्रवेशकाले पृष्टोदराशिगोमेषवृषकर्कधन्विमकराणामन्यतमस्थितो यदा भवति तदा स्वदशान्ते फलप्रदो भवति। अथोभयोदये मीने भवति, तदा अन्तदशामध्ये फलप्रदो भवति। अथार्कोदये शीर्षोदये मिथुनसिंहकन्यातुलावृश्चिककुम्भानाम् अन्यतमे फलप्रदो भवति। अथार्कोदये शीर्षोदये मिथुनसिंहकन्यातुलावृश्चिककुम्भानाम् अन्यतमे यदा भवति तदा प्रथमदशाप्रवेशसमये फलप्रदो भवति। एवं शुभस्य अपि अशुभस्य पक्ति वाच्या। दशाकालं त्रिधा परिकल्प्य यस्मिन् काले तस्य फलपक्ति ज्ञायते आद्ये मध्ये अन्त्ये वा तत्र चन्द्रः सत्फलबोधनानि कुरुते पापानि चातोऽन्यथेति। एतत् त्रिधा विभक्ते दशाकाले ज्ञेयम्। पूर्वोक्तं सर्वं दशाफलं योज्यम्। दशापतिः प्रवेशकाले तिष्ठन्नेव तत्फलं ददाति इति एतत् कथं गम्यते। यवनेश्वरादिभिः सामान्येन चोक्तम्। उच्यते। भगवतो गर्गवचनात्। तथा च भगवान् गार्गिः।

***आद्यन्तमध्यफलदः शिरः पृष्ठोभयोदये। दशाप्रवेशसमये तिष्ठन् वाच्यो दशापतिः।।***

**॥ अष्टकवर्गस्य फलम् ॥**

चारवशात् पंक्तिकाले यस्मिन् राशौ शुभाशुभं वाष्टकवर्गफलं दिनकर आदित्यः प्रयच्छति। एवमेव रुधिरो भौमः। गुरुः, भौमः, भृगुजः, एतौ गुरुभृगुजौ भवनस्य राशेः मध्ययातौ मध्यत्रिभागगतौ फलप्रदौ भवतः। सौरः, चन्द्रः, एतौ रविसुतशशिनौ विनिर्गमस्थौ फलप्रदौ भवतः। बुधः सर्वकालं फलदः सर्वभागस्थ। फलप्रदो भवति।सर्वस्मिन्नेव राशौ यावत्तिष्ठति तावत्फलं शुभमशुभं वा यथाप्राप्तं ददातीति।

**दिनकररुधिरौ प्रवेषकालेगुरुभृगुजौ भवनस्य मध्ययातौ ।**

**रविसुतशशिनौ विनिर्गमस्थौ शशितनयः फलदस्तु सर्वकालम् ।। ६।।**

**अवबोधप्रश्नः**

5. मध्ययातौ फलप्रदौ कौ?

---

**उत्तराणि**

1. स्वर्क्षे यो ग्रहः स्थितः यश्च स्वोच्चे स्थितः, यश्च मूलत्रिकोणे स्थितः, स च यदि लग्नकण्टकेषु केन्द्रस्वाश्रितः स्थितो भवति, एवं विधस्य ग्रहस्य अन्येऽपि एवं विधः, केन्द्रगो यदि भवति तदा तौ ग्रहौ अन्योन्यं कारकाख्यौ भवतः।
2. कर्कटोदये तस्थे चन्द्रे कुजो, सौरः, अर्कः, बृहस्पतिः, एते कुजयमारार्कसूरयः स्वोच्चगाः, आत्मीयतुङ्गस्था भवन्ति, कुजो मकरे यमस्तुलायाम् अर्को मेषे, सूरिः कर्काटके, तदा ते परस्परम् अन्योन्यकारकाः निगदिताः ।
3. यस्य लग्नवांशी वर्गोत्तमाख्ये जन्म भवति, चन्द्रोऽपि वा वर्गोत्तमांशगता भवति तस्य शुभं जन्म।
4. द्वितीयराशिः स वेशिसंज्ञः।
5. गुरुः, भौमः, भृगुजः, एतौ गुरुभृगुजौ भवनस्य राशेः मध्ययातौ मध्यत्रिभागगतौ फलप्रदौ भवतः।

## ॥ अनिष्टाध्यायः ॥

उद्देश्यम्।

- दारसुतहीनजन्मज्ञानम्।
- भार्यामरणयोगत्रयम्।
- कलत्रवन्ध्यपतिजन्मज्ञानम्।
- परयुवतिजन्मज्ञानम्।
- परस्त्रीगमनयोगम्।
- अनिष्टयोगानि।

---

### ॥ दारसुतहीनजन्मज्ञानम्।।

यस्य जन्मनि लग्नात् पञ्चमस्थानं शुभग्रहेण स्वपतिना च प्राप्तं भवत्यथवा दृष्टं भवति तस्यापि पुत्रसम्पत् अस्तीति वक्तव्यम्। चन्द्राद्वा पञ्चमस्थानं यस्य शुभग्रहेण स्वपतिना वा युतदृष्टं न भवति तस्यापि पुत्रसम्पदस्ति। यस्य लग्नचन्द्रयोः उभयोरपि पञ्चमस्थानं शुभग्रहेण स्वपतिना वा युतदृष्टं न भवति तस्य पुत्रासम्भवः। अपुत्रत्वं वक्तव्यम्। अत्र केचित् द्वादशप्रकारं पुत्रं वर्णयन्ति। औरसः क्षेत्रजः दत्तः कृत्रिमः अधमप्रभवः गूढोत्पन्नः अपविद्धः पौनर्भवः कानीनः सहोढः क्रीतकः दासीप्रभव इति।

**लग्नात् पुत्रकलत्रभे शुभपति प्राप्ते अथवालोकिते।**
**चन्द्राद्वा यदि सम्पदस्ति हि तयोर्ज्ञेयोऽन्यथा संभवः ।।**

**पाथोनोदयगे रवौ रविसुतो मीनस्थितो दारहा।**
**पुत्रस्थानगतश्च पुत्रमरणं पुत्रोऽवनेर्यच्छति ।। १।।**

**कठिणपदार्थः**= पुत्रभं =पञ्चमस्थानं शुभग्रहेण= स्वपतिना, प्राप्तं=संयुक्तम्, आलोकितं =दृष्टं

**अवबोधप्रश्नाः**

1. **जन्मकुण्डल्यां पुत्रसम्पत् चिन्तनं कथम् ज्ञेयम्?**

## ॥ भार्यामरणयोगत्रयम् ॥

उग्रग्रहाः आदित्यभौमसौराः तैः सितात् यथा सम्भवं चतुर्थाष्टमगतैः यस्य भवति तस्य जायावधो भार्यविपत्तिः दहनेनाग्निना भवति। तस्य जीवत एव भार्य अग्निना आत्मनं व्यपदयति। अथवोग्रयोः पापयोः द्वयोर्मध्ये शुक्रादेको द्वादशेऽन्यो द्वितीये, भृगुतनये शुक्रे स्थिते जातस्य निपातेनच्छ्रित पतननात् जायावधो भवति। तस्य जातस्य जीवत एव पतनात् म्रियत इति। अथवा एकस्मिन् राशौ एकेन भुक्तं स्थानमतिक्रम्यान्येन भुज्यमानम् अप्राप्य यदि शुक्रस्य अवस्थानं तदपि पापद्वयमध्यस्थो भवति। अथ यस्य जन्मनि सौम्यग्रहयोः अन्यतमेन सहितः संयुक्तः शुक्रो न भवति न चापि तन्निरीक्षितो दृष्टस्तस्य पाशजो जायवधो भवति। जीवत एव भार्योद्वन्धनेनात्मानं व्यापदयति। कैश्चित् योगद्वयम् एतत् व्याख्यातम्। उग्रग्रहैः सितचतुरस्रसंस्थितैः एकः मध्यमस्थिते भृगुतनये अथवोग्रयोः द्वितीयः सौम्यग्रहैः सहितः सन्निरीक्षित इति। योगद्वयवेशेषीभूतजायावधो दहननिपातपाशजः इति योगद्वयेऽपि विकल्पः। तच्चायुक्तं यस्माद्भगवान् गार्गिः-

चतुर्थाष्टमगैः शुक्रात् सौर आर अर्कैः हुताशनात्। तेषां द्वयोस्तु मध्यस्थे तथा शुक्रे निपातजः।।

शुक्रे सद्योगदृग्धीने पाशाद्भार्यवधो भवेत्।

**उग्रग्रहैः सितचतुरस्रसंस्थितैर्मध्यस्थिते भृगुतनये अथ वा उग्रयोः ।**

**सौम्य ग्रहैरसहित संनिरीक्षिते जाया वधो दहननिपातपाशजः ।। २।।**

**कठिणपदार्थः** उग्रग्रहाः=आदित्यभौमसौराः तैः सितात्=शुक्रात्, चतुरस्रसंस्थितैः= चतुर्थाष्टमगतैः, जायावधो=भार्यविपत्तिः दहनेनाग्निना भवति। अथवोग्रयोः पापयोः =द्वयोर्मध्ये शुक्रादेको द्वादशेऽन्यो द्वितीये, भृगुतनये =शुक्रे स्थिते जातस्य, निपातेनच्छ्रित= पतननात् जायावधो भवति। एकस्मिन् राशौ= एकेन भुक्तं स्थानमतिक्रम्यान्येन भुज्यमानम् अप्राप्य यदि शुक्रस्य अवस्थानं तदपि पापद्वयमध्यस्थो भवति।

**अवबोधप्रश्नः**

2. **भार्यामरणं कथं चिन्त्यते?**

शशी चन्द्रः, तिग्मरश्मिः सूर्यः, एतयोः लग्नात् व्ययारिगतयो एका व्यये द्वादशे स्थाने द्वितीयो अरिस्थाने षष्ठे पत्न्या सहैकनयनस्य एकाक्षस्य जन्म वदन्ति। जाता न केवलं काणो भवति यावत् तत् भार्या

काणी भवति। द्युस्थानयोरिति। शुक्रस्थानयोः द्यूनस्थयोः लग्नात् द्वयोरपि सप्तमस्थयोः नवमयोः पञ्चमयोः वा जातं विकलदारम् उशन्ति। कथयन्ति। भार्या हीनाङ्गी भवति इत्यर्थः। अत्र द्यूनस्थयोः नवमपञ्चमसंस्थयोः वा शुक्रार्कयोः वा केचिद्यथासम्भवमेव योगो व्याख्यातः। तच्चायुक्तम्। यस्माद् भगवान् गार्गिः।

पञ्चमे नवमे द्यूने समेतौ सितभास्करौ। यस्य स्यातां भवेद्भार्या तस्यैकाङ्गताविवर्जिता।।

**लग्नाद्व्ययारि गतयोः शशितिग्मरश्म्योः पत्न्या सहैकनयनस्य वदन्ति जन्म।**

**द्यूनस्थयोर्नवम पञ्चमसंस्थयोर्वा शुक्रार्कयोर्विकलदारमुशन्ति जातम्।। ३।।**

शशी तिग्मरश्मिः, एतयोः लग्नात् व्ययारिगतयो पत्न्या एकाक्षस्य जन्म वदन्ति। जाता न केवलं काणो भवति यावत् तत् भार्या काणी भवति। द्युस्थानयोरिति। शुक्रस्थानयोः लग्नात् द्वयोरपि सप्तमस्थयोः नवमयोः पञ्चमयोः वा जातं विकलदारम् उशन्ति।

**अवबोधप्रश्नः**

3. एकाक्षस्य जन्म योगः लिखत।

## ॥ कलत्रवन्ध्यपतिजन्मज्ञानम्।।

कोणः शनैश्चरतस्मिन्नुदये लग्नगते भृगुतनये शुक्रे असस्तचक्रसन्धौ वृश्चिककर्कायकमीनानाम् अन्यनवांशकस्थे न केवलं यावद् अस्ते लग्नात् सप्तमस्थानस्थे एवमस्तश्चक्रसन्धौ यदि भवति तदा जातो वन्ध्यापतिर्भवति। वन्ध्यानिष्पलार्तवा। एतन्मकरवृषकन्यालग्नेषु सम्भवति। अपुत्र इति वक्तव्ये ग्रहणैनैतज्ज्ञापायति। यथा कौमारेभ्यो दारेभ्यः पुत्रोत्पत्तिर्भवति विरुद्धकामेभ्यो भवति। पापग्रहैरिति। पापग्रहैः व्ययस्थानं द्वादशं मदस्थानं सप्तमं लग्नराशिरुदयः एतेषु द्वयोः एकस्मिन् वा पापग्रहैः यथासम्भवं स्थितैः शशिनि चन्द्रे क्षीणे धीस्थे लग्नपञ्चमगे असुतस्य अपुत्रस्थ अकलत्रस्थ च स्त्रीवर्जितस्य पुत्रभार्यावर्जितस्य जन्म भवति। जातस्य न भार्या न पुत्रो भवतीत्यर्थः।

**कोणोदये भृगुतनये अस्तचक्र संधौ वन्ध्यापतिर्यदि नसुतत्र्क्षमिष्टयुक्तम्।**

**पापग्रहैर्व्ययमदलग्नराशिसंस्थैः क्षीणे शशिन्यसुतकलत्रजन्मधीस्थे।। ४।।**

**कठिणपदार्थः**= कोणः=शनैश्चरतस्मिन्नुदये लग्नगते भृगुतनये =शुक्रे असस्तचक्रसन्धौ =वृश्चिककर्कायकमीनानाम्, अन्यनवांशकस्थे सप्तमस्थानस्थे=एवमस्तश्चक्रसन्धौ ।

## परयुवतिजन्मज्ञानम्।

असितकुजयोः सौरभौमयोः अन्यतमस्य वर्गे सिते शुक्रे स्थिते तस्मिन् चास्तस्थे लग्नात् सप्तमगते तदेवेक्षिते तयोरेव सौरारयोः अन्यतरेणावेक्षिते दृष्टेः जाता परयुवतिगः परदारगामी भवति। तौ चेदित्यादि। तौ सौरारावस्ते सप्तमे स्थाने एकराशिस्थितौ सेन्दु चन्द्रसहितौ भवतः असितकुजयोः वर्गयोः तत्स्थः सितः तदवेक्षितः तदा जातः स्त्रिया सह पुंश्चलो भवति। स पुरुषः परदारेषु गच्छति तद्भार्या पुरुषेषु गच्छति। भृगुजशशिशिनो इत्यादि। भृगुजः शुक्रः शशी चन्द्रः तयोः भृगुजशशिनोः एकराशिगतयोः यत्र तत्रावस्थितयोः तावेव सितकुजावस्ते सप्तमे स्थाने भवतः तदा जातो नरः अभार्यो भवति विसुतो वा। वा शब्दो अत्र चार्थे। न विकल्पने। अभार्यो भवति अपुत्रश्च। परिणतन इति। ना च स्त्री नृस्त्रियौ नरस्त्रीग्रहयोः एकराशिगयोः अस्ते सप्तमे तावेवसितकुजौ भवतः। तौ शुभदृष्टौ सौम्यग्रहेण केनचिद् दृश्यते परिणततनू प्रमदापती भवतः परिणते तनू ययोः। एतदुक्तं भवति। तस्य वृद्धत्वे वृद्धा भार्योपतिष्ठत इति।

**असितकुजयोर्वर्गे अस्तस्थे सिते तदवेक्षिते परयुवतिगस्तौ चेत् सेन्दुस्त्रिया सह पुंश्चलः ।**

**भृगुजशशिनोरस्ते अभार्यो नरो विसुतोऽपि वा परिणततनूनृस्त्र्योर्दृष्टौ शुभैः प्रमदा पती।।५।।**

**कठिणपदार्थः**= असितकुजयोः=सौरभौमयोः अन्यतमस्य वर्गे सिते=शुक्रे स्थिते तस्मिन् चास्तस्थे परयुवतिगः =परदारगामी भवति। तौ सौरारावस्ते सप्तमे स्थाने एकराशिस्थितौ सेन्दु, परदारेषु गच्छति तद्भार्या पुरुषेषु गच्छति। भृगुजशशिशिनो इत्यादि। भृगुजः= शुक्रः शशी =चन्द्रः, भृगुजशशिनोः= सितकुजावस्ते। अभार्यो स्त्री नृस्त्रियौ=नरस्त्रीग्रहयोः अस्ते =सप्तमे तावेवसितकुजौ भवतः।

**अवबोधप्रश्नः**

4. परदाररति योगः लिखत।

## परस्त्रीगमनयोगम्।

चन्द्रः, दैत्येज्यः, पापाः आदित्यभौमसौराः, एतैः खमदसुखगैः खसंज्ञं, मदस्थानं सप्तमं, सुखसंज्ञं एतेषु स्थानेषु चन्द्रदैत्येज्य पापैः गतैः, समवस्थितैः जातो वंशच्छेता भवति। एतदुक्तं भवति। यस्य जन्मनि चन्द्रमा दशमः शुक्रः सप्तमः पापाः चतुर्थस्थाः। स वंशच्छेता। तत्कृतो वंश उच्छिद्यते। कुलविच्छित्तिर्भवति। दुर्योधनप्रायः। शिल्पी त्र्यंशो इति। शशिसुतेन बुधेन युक्तोः यः त्र्यंशो द्रेष्काणः स यस्य राशेः सम्बन्धी तस्मिन् स राशिः लग्नकेन्द्रस्थेन आर्किणा सौरेण दृष्टे जातः शिल्पी भवति। चित्रकर्मादिकर्मणा जीवती इत्यर्थः। अत्र बुधयुक्तराशेः शनैश्चरदृष्टिः वर्णयन्ति। यथा राशौ दृष्टे द्रेष्काणोऽपि दृष्टः स्यात्। यद्येष पक्ष आचार्याभिप्रेतः स्यात् तदा बुधे केन्द्रस्थेन सौरेण दृष्टे जातः शिल्पी भवति।

**वंशच्छेत्ताखमदसुखगैश्चन्द्रदैत्येज्यपापैः शिल्पी त्र्यंशे शशिसुतयुते केन्द्रसंस्थार्किदृष्टे ।**

**दास्यां जातो दितिसुतगुरौ रिःफगे सौरभागे नीचोऽर्केन्द्वोर्मदनगतयोर्दृष्टयोः सूर्यजेन ।६।**

चन्द्रः= शशी, दैत्येज्यः =शुक्रः, पापाः= क्रूरग्रहाः आदित्यभौमसौराः, एतैः खमदसुखगैः खसंज्ञं= दशमं, मदस्थानं =सप्तमं, सुखसंज्ञं =चतुर्थम् ।

**अवबोधप्रश्नः**

5. शिल्पी योगः कथं जायते?

## अनिष्टयोगानि।

**पापालोकितयोः सितावनिजयोरस्तस्थयोर्वाध्यरुक्।**

**चन्द्रे कर्कटवृश्चिकांशकगते पापैर्युतेगुह्यरुक् ।।**

**श्वित्री रिःफधनस्थयोरशुभयोश्चन्द्रोदये अस्ते रवौ चन्द्रे।**

**खे अवनिजे अस्तगे च विकलो यद्यर्कजो वेशिगः ।। ७।।**

चन्द्रः, दैत्येज्यः, आदित्यभौमसौराः, एतैः दशमं, सप्तमं, चतुर्थम् एतेषु स्थानेषु चन्द्रदैत्येज्य पापैः गतैः, समवस्थितैः जातो वंशच्छेता भवति। एतदुक्तं भवति। यस्य जन्मनि चन्द्रमा दशमः शुक्रः सप्तमः पापाः चतुर्थस्थाः। स वंशच्छेता। तत्कृतो वंश उच्छिद्यते। कुलविच्छित्तिर्भवति। दुर्योधनप्रायः। शिल्पी त्र्यंशो इति। शशिसुतेन बुधेन युक्तोः यः त्र्यंशो द्रेष्काणः स यस्य राशेः सम्बन्धी तस्मिन् स राशिः लग्नकेन्द्रस्थेन आर्किणा सौरेण दृष्टे जातः शिल्पी भवति। चित्रकर्मादिकर्मणा जीवती इत्यर्थः। अत्र बुधयुक्तराशेः शनैश्चरदृष्टिः वर्णयन्ति। यथा राशौ दृष्टे द्रेष्काणोऽपि दृष्टः स्यात्। यद्येष पक्ष आचार्याभिप्रेतः स्यात् तदा बुधे केन्द्रस्थेन सौरेण दृष्टेजातः शिल्पी भवति।

**कठिणपदार्थः** चन्द्रः= शशी, दैत्येज्यः =शुक्रः, पापाः= क्रूरग्रहाः आदित्यभौमसौराः, एतैः खमदसुखगैः खसंज्ञं=दशमं, मदस्थानं=सप्तमं, सुखसंज्ञं=चतुर्थम् । स वंशच्छेता= तत्कृतो वंश उच्छिद्यते। कुलविच्छित्तिर्भवति। दुर्योधनप्रायः। शशिसुतेन= बुधेन युक्त, आर्किणा= सौरेण ।

**अन्तः शशिन्यशुभयोर्मृगगे पतङ्गे श्वासक्षयप्लिहकविद्रधि गुल्मभाजः ।**

**शोषी परस्परगृहांशगयोर्रवीन्द्वोः क्षेत्रे अथवा युगपद् एकगयोः कृशो वा ।। ८।।**

यत्रतत्रस्थेशशिनि चन्द्रे अशुभयोः सौर भौमयोरन्तर्मध्येस्थिते पतङ्गे सूर्ये च मृगगतेमकरस्थेजाताः श्वासक्षयप्लीहकनिद्रधिगुल्मभाजो भवन्ति । श्वासः प्रसिद्धः, क्षयः शरीरक्षयः, प्लीहः प्रसिद्धः वामकुक्षिसंस्थोमांसखण्डः विद्रधिगुल्मौरोगौप्रसिद्धौ एषामन्तमेनरोगेणार्दिता भवन्तीत्यर्थः । केचिदकयचनं पठन्ति–श्वासक्षयप्लीहकविद्रधिगुल्मभावस्यादिति । शोषीति । रवीन्द्वोश्चन्द्रार्कयोः परस्परमन्योन्यगृहांशगयोः आदित्यः कर्कटे, सिहे चन्द्रोऽथवा यत्र तत्रराशौसिहांशके चन्द्रः, कर्कटांशे सूर्यः तदाजातः शोषीभवति ।अत्रकेचित्परस्परगृहांशगयो रविन्द्वोरिति । सिंहेसिंहाशकेस्थिते चन्द्रेकर्कटेकर्कटांशस्थे सूर्ये च जातः शोषी क्षयी भवतीति वर्णयन्ति । तच्चायुक्तम् । यस्माद्भगवान्गार्गिः । ''परस्परगृहे यातौ यदि वापितदंशगौ । भवेतामर्कशीतांशूतदाशोषीप्रज्ञायते ।।" क्षेत्रेऽथवेति । युगपत्तुल्यकालं तयोरेव परस्परक्षेत्रे यदा द्वावपिभवतः सिंहे यदोभावपि अर्कचन्द्रौस्थितौकर्कटेवाभवतस्तदाजातः शोषीभवतिकृशोवा । कृशोदुर्बलः ।।

अश्विमध्ये धन्विपञ्चकनवांशके चन्द्रे स्थिते तत्र च समन्दरुधिरे मन्देन सौरेण रुधिरेण अङ्गारकेण युक्ते यथासम्भवम् अन्यतमेन तदवेक्षिते वा ताभ्यम् अन्तमेन दृष्टे जातः कुष्ठी भवति। अथवा यत्र तत्र राशौ झषकर्किमृगाजभागे झषो मीनः, कर्किः कुलीरः, मगो मकरः अजो मेषः, एषामन्यतमे नवांशकस्थे चन्द्रे तत्र

मन्दरुधिरयोः अन्यतमेन युते दृष्टे वा जातः कुष्ठी भवति। अत्र चन्द्रो यदा शुभग्रहदृष्टो भवति तदा कण्डूविकारी भवति न कुष्ठो।

**चन्द्रे अश्विमध्यझषकर्किमृगाजभागे कुष्ठी समन्दरुधिरे तदवेक्षिते वा ।**

**यातैस्त्रिकोणम् अलि कर्किवृषैर्मृगे च कुष्ठी च पापसहितैरवलोकितैर्वा ।। ९।।**

अश्विमध्ये =धन्विपञ्चकनवांशके चन्द्रे स्थिते तत्र च समन्दरुधिरे मन्देन= सौरेण रुधिरेण= अङ्गारकेण ।

**अवबोधप्रश्नः**

6. कुष्ठी योगः लिखत।

**मीनांशके मेषमृगांशके वा चन्द्रस्थितौऽत्रैव हि पापदृष्टः।**

**किलासकुष्ठादिविनिष्टदेहमिष्टेक्षितः कण्डुविकारिणं च।।**

**यातैस्त्रिकोणमिति। अलिकर्किवृषैः वृश्चिककुलीरवृषभैः।**

**मृगे च ककरे एतैश्च त्रिकोणयातैः प्राप्तैः तथाविधो लग्नो भवति।।**

यस्यैषामन्यतमे पञ्चमे वा स्थाने भवति स च पापानाम् अन्यतमेन युक्तो दृष्टो वा भवति, तदा जातः कुष्ठी भवति।

**निधनारिधनव्ययस्थितारवि चन्द्रारयमा यथा तथा ।**

**बलवद्ग्रहदोषकारणैर्मनुजानां जनयन्त्यनेत्रताम् ।। १०।।**

रविः,चन्द्रः , आरः, सौरः एते रविचन्द्रारयमाः। यथा येन तेन प्रकारेण निधनारिधनव्यवस्थिताः अष्टमषष्ठद्वितीयद्वादशाः तदा जातानां मनुष्याणाम् अनेत्रतां मान्ध्यं जनयन्ति उत्पादयन्ति। यथा तथा इति क्रमनिवारणार्थः। तां चानेत्रतां बलवद्ग्रहदोषकारणैः तेषां चतुर्णां ग्रहाणां मध्याद्यो बलवास्तस्य यो वातपित्तश्लेष्माणां मध्याद् दोष उक्तः तेन दोषकारणेन तत्प्रकोपेन तस्याक्षिविनाशो भवति।

**कठिणपदार्थः** रविः=आदित्यः चन्द्रः= शशी, आरः=अङ्गारकः यमः= सौरः एते रविचन्द्रारयमाः। यथा येन तेन प्रकारेण निधनारिधनव्यवस्थिताः =अष्टमषष्टद्वितीयद्वादशाः ।

**अवबोधप्रश्नः**

7. **मान्ध्यं कथम् उत्पादयन्ति?**

**नवमायतृतीयधी युता न च सौम्यैरशुभा निरीक्षिताः ।**

**नियमाच्छ्रवणोपघातदारदवैकृत्यकराश्च सप्तमे ।। ११।।**

अशुभाः= पापाः, नवमायतृतीयधीयुताः नवमे एकादशे तृतीये, धीस्थाने=पञ्चमे एतेषु यथा सम्भवं युताः समवस्थिताः ते च सौम्यैः=शुभग्रहैः, नियमात्=निश्चयात् श्रवणोपघातदाः श्रोत्रयोः कर्णयोः उपघातदा बधिर्यकराः। अत्र अशुभग्रहणेन= अर्कचन्द्रारसौराः, सौम्यैः अदृष्टा रदानां=दन्तानां ।

उडुपे लग्नगते तस्मिश्चासयरास्यगे राहुग्रस्ते तस्माच्च लग्नादशुभयोः सौरभौमयोः त्रिकोणशयोः नवमपञ्चमस्थयोः जातः सपिशाचो भवति। पिशाचाधिष्टतः भवतीत्यर्थः। एवं रविमण्डले सौपप्लवे असुरास्यगे अर्के राहुग्रस्ते तस्मिश्चोदयस्ते लग्नादशुभयोः सौरभौमयोः त्रिकोणगतयोः जातो नयनापवर्जितो भवति।

**उदयत्युडुपे सुरास्यगे स पिशाचोऽशुभयोस्त्रिकोणयोः ।**

**स उपप्लवमण्डले रवावुदयस्थे नयनापवर्जितः ।। १२।।**

उडुपे=चन्द्रे, तस्मिश्चासयरास्यगे राहुग्रस्तेलग्नादशुभयोः सौरभौमयोः त्रिकोणशयोः =नवमपञ्चमस्थयोः।

**संस्पृष्टः पवनेन मन्दगयुते द्यूने विलग्ने गुरौ**

**सोन्मादोऽवनिजे स्थिते अस्तभवने जीवे विलग्नाश्रिते ।**

**तद्वत् सूर्य सुतोदये अवनि सुते धर्मात्मजद्यूनगे।**

**जातो वाससहस्ररश्मितनये क्षीणे व्यये शीतगौ।। १३।।**

यस्य जन्मनि मन्दगः सौरो द्यूने सप्तमे युतः स्थितो भवति विलग्ने च गुरुः बृहस्पतिः स पवेनन वायुना संस्पृष्टो भवति। वातरोगी भवतीत्यर्थः।अवनि भूः तस्याः जातोऽवनिजः तस्मिन्नस्तभवने सप्तमे स्थाने स्थिते विलग्नाश्रिते प्राग्लग्नगे च जीवे गुरौ जातः सोन्मादो भवति, विचित्त इति। तद्वदिति।सूर्यसुतः सौरः तस्मिन्नुदये लग्ने स्थिते अवनिसुते भौमे धर्मात्मजद्यूनगे नवमपञ्चमसप्तमस्थानानाम् अन्यतमस्थानस्थे जातस्तद्वत्सोन्माद एव भवति। केचित्तदुच्चाहुः। यमोदय इति पठन्ति। अथवा क्षीणे शीतगौ चन्द्रे सहस्त्ररश्मितनयेन शनैश्चरेण संयुक्ते व्ययं द्वादशस्थानं याते प्राप्ते वाग्रहणात् सोन्माद एव भवन्ति।

**अवबोधप्रश्नः**

8. वातरोगीयोगः लिखत?

**राश्यंशपोष्णकरशीतकरामरेज्यैर्नीपचाधिपांशगतैररिभागगैर्वा ।**

**एभ्योऽल्प मध्य बहुभिः क्रमशः प्रसूता ज्ञेयाः स्युरभ्युपगम क्रय गर्भदासाः।। १४।।**

यस्मिन्नवांशके चन्द्रो वर्तते स राश्यंशके तस्य पतिः राश्यंशः उष्णकरः सूर्यः शीतकरः चन्द्रः अमरेज्यो जीवः एतैः राश्यंशपोष्णकरशीतकरामरेज्यैः आत्मीयादुच्चात्सप्तमराश्यधिपोनीचधिपस्तदीये नीचाधिपनवांशके व्यवस्थितैः अरिभागगैः शत्रुनवांशगतैः वा जाता दासा भवति। एभ्यो अल्पमध्यबहुभिः इति। एभ्यो ग्रहेभ्यः एकोऽल्पः द्वौ मध्यमा यत्र चत्वारो वा बहवः एभ्यः प्रसूताः क्रमशो दासा भवन्ति। यस्यैको नीचाधिपांशके शत्रुनवांशके वा भवति सोऽभ्युपगमेनात्मना जीवितार्थी दासत्वमुपपद्यते। यस्य द्वौ सोऽन्यनेन क्रीतो विक्रीतः येन क्रीतस्तस्य दासो भवति। यस्य त्रयश्चत्वारो वा सगर्भदासो दासस्य पुत्रो दास्या वा पुत्रो लोके गृहदास इति प्रसिद्धः।

**विकृतदशनः पापैर्दृष्टे वृषाजहयोदये खलतिरशुभक्षेत्रे लग्ने हये वृषभे अपि वा ।**

**नवमसुतगे पापैर्दृष्टे रवावदृढेक्षणो दिनकरसुते नैकव्याधिः कुजे विकलः पुमान् ।। १५।।**

वृषः अजः धन्वी लग्ने पापे दृष्टे अवलोकिते विकृतदशनो विरूपदन्तो भवति। अशुभक्षेत्राणि पापग्रहराशयः मेषसिंहवृश्चिकमकरकुम्भाः एषामन्यतमे लग्ने हये धन्विनि वा वृषभे अपि वा लग्ने पापदृष्टेः

जातः खलतिः भवति। आदित्ये लग्नात् नवमपञ्चयोः अन्यतरस्थानस्थे पापग्रहदृष्टे जातः अदृढेक्षणो भवत्यसारनयनः। एवं दिनकरसुते सौरे लग्नात् नवमपञ्चमस्थे पापैः दृष्टे नैकव्याधिः जायते। एवमेव कुजे लग्नात् नवमपञ्चमस्थे पापदृष्टे पुमान् जातो विकलो अङ्गहीना भवति।

**व्ययसुतधनधर्मगैरसौम्यैर्भवनसमाननिबन्धनं विकल्प्यम् ।**

**भुजगनिगडपाशभृद् दृकाणैर्बलवद् असौम्यनिरीक्षितैश्च तद्वत् ।। १६।।**

असौम्यैः व्ययसुतधनधर्मगैः द्वादशपञ्चमद्वितीयनवमस्थानानां यथासम्भवम् नवमस्थानस्थैः जातस्य निबन्धनं भवति। तच्च निबन्धन राशिसदृशं स प्राणी येन प्रकारेण स राशिः बध्यते तेन प्रकारेण। तद्यथा । मेषवृषधनुर्धरणामन्यतमे लग्ने निगडैः बध्यते। कर्कटमकरमीनानाम् अन्यतमे लग्न बन्धनं विना दुर्गे स्थिता रक्ष्यते। वृश्चिकलग्ने भूगृहे बध्यते। यस्मिन् द्रेष्काणे पुरुषो जातः स सर्पद्रेष्काणो निगडपाशभृद्वा द्रेष्काणः स च प्रथमपञ्चमनवमानाम् इति अनया गणनया यस्य राशेः सबन्धी भवति, स चेद्राशिः बलवता असौम्येन पापग्रहेणानाम् अन्यतमेन दृश्यते तथा जातस्य तद्भवनसमानं निबन्धनं तद्वतेनैव प्रकारेण विकल्प्यम्। भुजगद्रेष्काणः कर्कटद्वितीयः कर्कटतृतीयः वृश्चिकाद्यः वृश्चिकद्वितीयः मीनन्त्यश्च। निगडद्रेष्काणो मकराद्यः। भुजगनिगडपाशभृद् इति कैश्चिद् व्याख्यातम्। तत्र पाशभृदनेन द्रेष्काणो न पठितः। भुजगपाशभृत् निगडपाशभृद् भुजङ्गादि भागैः बलवद् सौम्यनिरीक्षितैः च तद्वत्।

**पुरुषवचनोऽपस्मारार्तः क्षयी च निशापतौ सरवितनये वक्रालोकं गते परिवेषगे ।**

**रवियमकुजैः सौम्यादृष्टैर्नभः स्थलमाश्रितैर्भृतकमनुजः पूर्वोद्दिष्टैर्वराधममध्यमाः ।१७।।**

निशापतौ चन्द्रे सरवितनये भौमेन दृष्टे परिवेषगे तत्कालं परिवेषयुक्ते जातः पुरुषः सदाऽभिप्रयैभिधायी क्षयी च भवति। अत्र चन्द्रमसस्त्रयः प्रकारा व्याख्याताः त्रयश्च दोषाः। यस्यैकप्रकारश्चन्द्रमा भवति तस्यैको दोषो भवति। यस्य प्रकारद्वयं तेन चन्द्रे सौरेण युक्ते परुषवचनः सदैवाभिप्रधायी भवति। सरवितनये भौमदृष्टे अपस्मार आर्तो अमपस्मारः मृत्युः। सरवितनये भौमदृष्टे तत्कालं परिवेषगे क्षयी भवति। रवियमकुजैरिति। रविरादित्यः यमः सौरः, कुजो अङ्गारकः एतैः नभस्थलमाश्रितैः दशमस्थानस्थैः सौम्यदृष्टैः शुभभग्रहाणां मध्यान्न केनचिद् दृष्टैः अवलोकितैः जातो मनुजो

मनुष्यो भृतको भवति। तेषां ग्रहाणाम् एवं विधेन एकैकेन भृतकोऽपि वरः श्रेष्ठो भवति। अजुगुप्सितां भृतिं करोति। द्वाभ्यां मध्यमो भवति मध्यमां कृतिं करोति। त्रिभिरधमो जुगुप्सितां भृतिं करोति।

**अवबोधप्रश्नः**

9. अपस्मारार्तः योगः लिखत।

---

**-उत्तराणि-**

1. यस्य जन्मनि लग्नात् पञ्चमस्थानं शुभग्रहेण स्वपतिना च प्राप्तं भवत्यथवा दृष्टं भवति तस्यापि पुत्रसम्पत् अस्तीति वक्तव्यम्। चन्द्राद्वा पञ्चमस्थानं यस्य शुभग्रहेण स्वपतिना वा युतदृष्टं न भवति तस्यापि पुत्रसम्पदस्ति। यस्य लग्नचन्द्रयोः उभयोरपि पञ्चमस्थानं शुभग्रहेण स्वपतिना वा युतदृष्टं न भवति तस्य पुत्रासम्भवः।
2. उग्रग्रहाः आदित्यभौमसौराः तैः सितात् यथा सम्भवं चतुर्थाष्टमगतैः यस्य भवति तस्य जायावधो भार्यविपत्तिः दहनेनाग्निना भवति।
3. शशी चन्द्रः, तिग्मरश्मिः सूर्यः, एतयोः लग्नात् व्यारिगतयो एका व्यये द्वादशे स्थाने द्वितीयो अरिस्थाने षष्ठे पत्न्या सहैकनयनस्य एकाक्षस्य जन्म वदन्ति।
4. असितकुजयोः सौरभौमयोः अन्यतमस्य वर्गे सिते शुक्रे स्थिते तस्मिन् चास्तस्थे लग्नात् सप्तमगते तदेवेक्षिते तयोरेव सौरारयोः अन्यतरेणावेक्षिते दृष्टेः जाता परयुवतिगः परदारगामी भवति।
5. शशिसुतेन बुधेन युक्तोः यः त्र्यंशो द्रेष्काणः स यस्य राशेः सम्बन्धी तस्मिन् स राशिः लग्नकेन्द्रस्थेन आर्किणा सौरेण दृष्टे जातः शिल्पी भवति।
6. अश्विमध्ये धन्विपञ्चकनवांशके चन्द्रे स्थिते तत्र च समन्दरुधिरे मन्देन सौरेण रुधिरेण अङ्गारकेण युक्ते यथासम्भवम् अन्यतमेन तदवेक्षिते वा ताभ्यम् अन्तमेन दृष्टे जातः कुष्ठी भवति।
7. रविःआदित्यः चन्द्रः शशी, आरः अङ्गारकः यमः सौरः एते रविचन्द्रारयमाः। यथा यथा येन तेन प्रकारेण निधनारिधनव्यवस्थिताः अष्टमषष्ठद्वितीयद्वादशाः तदा जातानां मनुष्याणाम् अनेत्रतां मान्ध्यं जनयन्ति उत्पादयन्ति।

8. यस्य जन्मनि मन्दगः सौरो द्यूने सप्तमे युतः स्थितो भवति विलग्ने च गुरुः बृहस्पतिः स वातरोगी भवति।

9. निशापतौ चन्द्रे सरवितनये सौरसहिते वक्रालोकगते भौमेन दृष्टे परिवेषगे तत्कालं परिवेषयुक्ते जातः पुरुषः पुरुषवचनः सदाऽभिप्रयैभिधायी अपस्मारार्तः क्षयी च भवति।

## ।। स्त्रीजातकाध्यायः ।।

**उद्देश्यम्-**

- ✓ पुरुषजन्मोक्तफलातिदेशम् ।
- ✓ बुधशुक्रक्षेत्रयोः अन्यतमे लग्नगे चन्द्रगे वा भौमादित्रिंशांशकजातायाः स्वरूपम्।
- ✓ चन्द्रार्कजीवसौरक्षेत्राणाम् अन्यतमे लग्नगेचन्द्रगे वा भौमादि त्रिंशांशकजातायाः स्वरूपम्।
- ✓ मात्रा सह बन्धकी भवति।
- ✓ सप्तमस्थाने शून्यत्वे शन्यैश्वराङ्गरकशुक्रक्षेत्रे तदंशे वा सप्तमे ययादृशी तद्विज्ञानम्।
- ✓ चन्द्रराशौ सप्तमे तन्नवांशके जीवराशौ वादिराशौ च तन्नवांशके वा तद्विज्ञानम्।
- ✓ चन्द्रशुक्रबुधानां द्वौ त्रयो वा लग्नगता यस्या भवन्ति तस्थाः स्वरूपम्।
- ✓ पुरुषिणी ब्रह्मवादिनी च योगाः।
- ✓ प्रवृज्ययोगाः।

---

### ।। पुरुषजन्मोक्तफलस्य आदेशम्।।

पुञ्जन्मनि यद्यत्फलम् स्त्रीणाम् अक्षमसम्भाव्यं तत्पतिषु तद्भर्तृषु वदेत् ब्रूयात्। पुञ्जन्मोक्तं फलं यद् वृत्तातामृदृग् इत्यादि। तत्र यत्स्त्रीणां क्षमं योग्यं तत्तासामेव वक्तव्यं, यच्चाक्षमं सम्भवति, राज्यादि तत्पिषु तज्जातककाले दृष्ट्वा वक्तव्यम्।यच्च सम्भवति सुनफादियोगफलानि सुःखदुःखप्रदर्शकानि उभयोरपि। अथवा सकलं समग्रं स्त्रीणां निधने अष्टमे स्थाने भर्तृमरणं यथावक्तव्यं तथोपरिष्टात् वक्ष्यति। वपुस्तु शरीरं लग्नेन्दुगं लग्नचन्द्रयो अन्तर्गतं तच्चापि तासां यथा वक्तव्यं तथा वक्ष्यति। तासां सुभगता सौभाग्यतां यादृग्भाविपातिर्वा सप्तमस्थानाद्वक्तव्यम्। तदपि वक्ष्यति।

**यद्यत् फलं नरभवे क्षममङ्गनानां तत्-तद्वदेत् पतिषु वा सकलं विधेयम् ।**
**तासां तु भर्तृमरणं निधने वपुस्तु लग्नेन्दुगं सुभगतास्तमये पतिश्च ।। १।।**

**कठिणपदार्थः**=नरभवे =पुञ्जन्मनि यद्यत्फलम् अङ्गनानां= स्त्रीणाम् अक्षम =सम्भाव्यं तत्पतिषु =तद्भर्तुषु वदेत् ब्रूयात्। निधने= अष्टमे स्थाने भर्तृमरणं यथावक्तव्यं तथोपरिष्टात् वक्ष्यति। वपुस्तु =शरीरं, लग्नेन्दुगं= लग्नचन्द्रयो अन्तर्गतं तच्चापि तासां यथा वक्तव्यं तथा वक्ष्यति। तासां सुभगता= सौभाग्यतां यादृग्भाविपातिर्वा= सप्तमस्थानाद्वक्तव्यम्। तदपि वक्ष्यति।

**आवबोधप्रश्नः**

1. यत् स्त्री जातके अक्षमं तत् फलं कथं चिन्तयेत्?

---

।। स्त्री प्रकृतिनिर्धारणम् ।।

लग्नशशिनो अपि यग्मेषु स्थितयोः स्त्री, योषित्प्रकृतिस्थिता स्त्रीस्वभावा भवति। प्रकृतौ स्वभावे तिष्ठति। तयोरेव लग्नेन्द्वोः विषमराशिगतयोः मनुजाकृतिशीलयुक्ता पुरुषाकारा पुरुषशीला च भवति। तयोः लग्नेन्द्वोः पापसंयुतयोः अवलोकितयोः वा पापशीला गुणोना सर्वगुणरहिता च भवति। अर्थाद् एव एकस्मिन् राशिगे अन्यस्मिन् विषमराशिगे पुंस्त्रीयोः मध्यस्वरूपाकारा भवति। एवमेकस्मिन् शुभग्रहयुते अन्यस्मिन् पापयुते सच्छीला भवति, असच्छीला च मिश्रेत्यर्थः। एवमेकस्मिन् शुभग्रहदृष्टे अस्मिन् पापदृष्टेऽपि। एवमुभयोरपि सौम्यासौम्ययुतदृष्टयोः च। अनया दृशा शेषकल्पना कार्या।

**युग्मेषु लग्नशशिनोः प्रकृतिस्थिता स्त्री सच्छीलभूषणयुता शुभदृष्टयोश्च ।**
**ओजस्थयोश्च मनुजाक्त्वि शीलयुक्तापापा च पापयुतेक्षितयोर्गुणोना ।। २।।**

**कठिणपदार्थः**= लग्नशशिनो=उदयचन्द्रयोः,ओजःस्थयो=विषमराशिगतयोः मनुजाकृतिशीलयुक्ता= पुरुषाकारा पुरुषशीला च भवति। तयोः= लग्नेन्द्वोः ,पापसंयुतयोः = अवलोकितयोः वा पापा पापशीला गुणोना सर्वगुणरहिता च भवति।

**अवबोधप्रश्नः**

**2. स्त्री प्रकृति चिन्तनं कीदृशं भवति?**

।।भौमक्षेत्रे जातायाः फलम्।।

भूम्यात्मजर्क्षे भौमक्षेत्रे मेषवृश्चिकयोः अन्यतरे लग्नगते चन्द्रगते वा तत्र च वक्रार्किजीवेन्दुजभार्गवानां कुजयमजीवज्ञसितानाम् अंशकेषु त्रिंशद्भागेषु क्रमेण फलनिर्देशो वक्तव्यः। तद्यथा भौमलग्ने भौमत्रिंशांशके लग्नगते चन्द्रगते वा जाता कन्यैव दुष्टा भवत्यनूढापि सा पुरुषसम्प्रयोगे व्रजति। सौरत्रिंशांशकैः जाता कन्यैव दास्यां भावं व्रजति। इहास्मिन् भौमक्षेत्रे जीनत्रिंशाशके सच्छीला भवति। बुधत्रिंशांशके जाता समाया मायायुक्ता भवति। शुक्रत्रिंशांशके जाता कुचरित्रयुक्ता भवति। एवं त्रिंशांशकफलं सर्वदा गुणतया परीक्षितव्यम्।

कन्यैवदुष्टाव्रजतीहदास्यं साध्वी समाया कुचरित्रयुक्ता।

भूम्यात्मजर्क्षेक्रमशोंऽशकेषु वक्रार्कि जीवेन्दुजभार्गवानम् ।। ३।।

**कठिणपदार्थः** भूम्यात्मजर्क्षे=भौमक्षेत्रे मेषवृश्चिकयोः ,वक्रार्किजीवेन्दुजभार्गवानां =कुजयमजीवज्ञसितानाम्,भौमलग्ने= भौमत्रिंशांशके लग्नगते, दुष्टा= भवत्यनूढापि सा पुरुषसम्प्रयोगे व्रजति। समाया= मायायुक्ता भवति।

---

**।।शुक्रक्षेत्रे जातायाः फलम्।।**

अंशकेषु वक्रार्किजीवन्दुजभार्गवानाम् इति सर्वत्रानुवर्तते। असुरपूजितः शुक्रः तस्य ऋक्षे वृषतुलयोः अन्यतमे लग्नगे चन्द्रगे वा भौम त्रिंशांशके जाता दुष्टा दुष्टशीला च भवति। शनित्रिंशांशके जाता पुनर्भूः पाणिग्रहणाद् अनन्तरम् अन्यतमस्य भार्या भवति। जीवत्रिंशांशके जाता सगुणा गुणवती भवति। बुधत्रिंशांशके जाता कलाज्ञा भवति। गीतवाद्यनृत्यचित्रादिषु कुशला भवति। शुक्रत्रिंशांशके जाता गुणैः शीलादिभिः ख्याता भवति। स्यात् कापटी इत्यादि। बौधे मिथुनकन्ययोः अन्यतरे लग्नगे चन्द्रगे वा भौमत्रिंशांशके जाता कापटी कपटासक्ता भवति। सौरत्रिंशांशके जाता क्लीबसमा

नपुंसकतुल्या भवति। बृहस्पति त्रिंशांशकजाता साध्वी भवति। बुधत्रिंशांशकजाता गुणाढ्या गुणबहुला भवति। शुक्रत्रिंशांशकजाता प्रविकीर्णकामा विक्षिप्तम् अन्यथा सर्वपुरुषगामिनी भवतीति।

**दुष्टा पुनर्भूः सगुणा कलाज्ञा ख्याता गुणैश्चासुरपूजितर्क्षे ।**

**स्यात् कापटी क्लीबसमा सती च बौधे गुणाढ्या प्रविकीर्णकामा ।। ४।।**

**कठिणपदार्थः** असुरपूजितः = शुक्रः तस्य ऋक्षे =वृषतुलयोः, पुनर्भूः= पाणिग्रहणाद् अनन्तरम् अन्यतमस्य भार्या भवति। जीवत्रिंशांशके जाता सगुणा= गुणवती भवति। बुधत्रिंशांशके जाता =कलाज्ञा भवति। गीतवाद्यनृत्यचित्रादिषु कुशला भवति। शुक्रत्रिंशांशके जाता गुणैः शीलादिभिः ख्याता भवति। स्यात् कापटी इत्यादि। बौधे मिथुनकन्ययोः अन्यतरे लग्नगे चन्द्रगे वा भौमत्रिंशांशके जाता कापटी कपटासक्ता भवति। सौरत्रिंशांशके जाता क्लीबसमा नपुंसकतुल्या भवति। बृहस्पति त्रिंशांशकजाता साध्वी भवति। बुधत्रिंशांशकजाता गुणाढ्या गुणबहुला भवति। शुक्रत्रिंशांशकजाता प्रविकीर्णकामा विक्षिप्तम् अन्यथा सर्वपुरुषगामिनी भवतीति।

3. वृषतुलयोः अन्यतमे लग्नगे चन्द्रगे वा जीवत्रिंशांशके जाता कीदृशा भवति?

---

इन्दुभे भौमत्रिंशांशकैः जाता स्वच्छन्दा भवति। सौरत्रिंशांशकैः जाता पतिघातिनी भवति। जीवत्रिंशांशकैः जाता शिल्पिनी भवति। शुक्रत्रिंशांशकैः असाध्वी भवति।न्राचारेति। अर्कभे सिंहे लग्ने तद्गते चन्द्रे भौमत्रिंशांशके जाता पुरुषाचारा भवति। नुरिवाचरो यस्याः। केचिद्वाचाटा इति पठन्ति बुहभाषिणी। सौरत्रिंशांशके जाता कुलटा असध्वी भवति। जीवत्रिंशांशके जाता नृपवधूः राजभार्या भवति। बुधत्रिंशांशके जाता अगम्यऽगम्यापुरषगामिनी भवति। धन्विमीनयोः अन्यतरे लग्नगते तद्गते वा चन्द्रे भौमत्रिंशांशकजाता बहुगुणा भवति। सौरत्रिंशांशकजाता अल्परतिः शीघ्रवेगा भवति। बृहस्पति त्रिंशांशकजाता अतिगुमा बहुगुणवती भवति। बुधत्रिंशांशकजाता विज्ञानयुक्ता भवति। शुक्रत्रिंशांशकैः जाता असाध्वी भवति। दासीति। मकरकुम्भयोः अन्यतरे लग्नगे चन्द्रगे वा भौमत्रिंशांशकजाता दासी

भवति। सौरत्रिंशांशकजाता नीचरता नीचपुरुषासक्ता भवति। जीवत्रिंशांशकजाता पतिरता भर्तृभक्ता भवति। बुधत्रिंशांशके जाता दुष्टा भवति। शुक्रत्रिंशांशके जाता अप्रजा वन्ध्या भवति।

**स्वच्छन्दा पतिघातिनी बहुगुणा शिल्पिन्यसाध्वीन्दुभे ।**

**त्राचारा कुलटार्क भे नृपवधूः पुंश्चेष्टितागम्यगा ।**

**जैवेनैकगुणाल्परत्यतिगुणा विज्ञानयुक्ता सती ।**

**दासी नीचरतार्कि भे पतिरतादुष्टा प्रजा स्वांशकैः ।। ५।।**

इन्दुभे= कर्कटे, स्वच्छन्दा= स्वैरिणी, यथेष्टव्यवहारिणी भवति। जीवत्रिंशांशकैः जाता शिल्पिनी =शिल्पकर्मनिरता भवति। शुक्रत्रिंशांशकैः असाध्वी= दुःश्शीला भवति।त्राचारेति। अर्कभे= सिंहे, वाचाटा =बहुभाषिणी। कुलटा =असध्वी भवति। नृपवधूः= राजभार्या भवति। जीवक्षेत्रे=धन्विमीनयोः ,नैकगुणा= बहुगुणा भवति। अल्परतिः= शीघ्रवेगा भवति। अतिगुणा= बहुगुणवती भवति। विज्ञानयुक्ता =आश्चर्ययुक्ता भवति। असती= असाध्वी भवति। आर्किभे= सौरक्षेत्रे मकरकुम्भयोः। नीचरता= नीचपुरुषासक्ता भवति। जीवत्रिंशांशकजाता पतिरता= भर्तृभक्ता भवति। अप्रजा =वन्ध्या भवति।

**अवबोधप्रश्नः**

4. कर्कटेके बुधत्रिंशांशके जाता कीदृशी भवति?

---

राशिमधिकृत्य यदेतत्त्रिंशांशके उक्तं फलं तच्छशिलग्नसमायुक्तै, चन्द्रलग्नयुक्तैः त्रिंशांशकैः यस्मिन् राशौ यद् ग्रह त्रिंशांशके चन्द्रमा भवति तद्वत् फलं वाच्यम्। यद्वा लग्नं भवति तस्य त्रिंशांशःतद्वशाद्वा। कथमुच्यते। बलाबलविकल्पेनेत्यादि। चन्द्रलग्नयोःयो बलवान् स यत्र राशौ यत्र त्रिंशांशके भवति अन्यस्मिन् राशौ अन्यस्मिन् त्रिंशांशके चन्द्रमा भवति, अन्यस्मिन् राशौ अन्यस्मिन् त्रिंशांशके लग्नं तदा तयोः यो बलवान् स यस्मिन् त्रिंशांशके भवति तस्यैव फलं वदेत्। यो बलरहितस्य फलं न भवतीति।

**शशिलग्नसमायुक्तैः फलं त्रिंशांशकैरिदम्।**

**बलाबलविकल्पेन तयोरुक्तं विचिन्तयेत् ।। ६।।**

**कठिणपदार्थः**= राशिं =राशिमधिकृत्य।

असितः सितःअसितसितौ परस्परांशे सौरः शुक्रःसौरांशगतः तौ च परस्परं दृक्संस्थौ अन्योन्यं पश्यतः एकः योगः। अथवा शौक्रे राशौ वृषतुलयोः अनयतरे लग्नगते तत्कालं यदि घटराशिसम्भवोंशः भवति तदा द्वितीयो योगः। अस्मिन् योगद्वये जाता स्त्री अन्याभिः अपराभिः स्त्रीभिः योषिद्भिः नराकृतिस्थिताभिः मदनविषानलं प्रदीप्तं वामाविषाग्निं प्रज्वलितं शान्तिं नयति शमयति। एतदुक्तं भवति। अन्या स्त्री स्वजघने पुरुषरूपेण चर्ममयं लिङ्गं बध्वा पुंवत् तस्या रतिम् अभिजानाति। यतोऽति कामार्त्तत्वात् पुरुषयोगं गन्तुं न शक्नोति।

**दृक् संस्थावसितसितौ परस्परांशे शौक्रे वा यदि घटराशि संभवोंऽशः ।**

**स्त्रीभिः स्त्री मदनविषानलप्रदीप्तं संशान्तिं नयति नराकृति स्थिताभिः।। ७।।**

**कठिणपदार्थः** असितः=सौरः, सितः=शुक्रः असितसितौ परस्परांशे अन्योन्यांशगतौ सौरः शुक्रांशगतः=शुक्रः,शौक्रे राशौ= वृषतुलयोः , घटराशिसम्भवोंशः= कुम्भनवांशकेदये स्त्रीभिः= योषिद्भिः, नराकृतिस्थिताभिः= पुरुषसंस्थानाभिः पुरुषाकारयुताभिः।

लग्नात् चन्द्रात् वा यः सप्तमो राशिः स यदि शून्यः भवति अबलो तस्मिन् अस्तभवने शून्ये अबले च बलरहिते तथा सौम्यैः शुभग्रहैः अनिरीक्षिते न केनचित् शुभग्रहेण दृश्यमाने न केनचित् सौम्यग्रहेण युते जातायाः भर्ता कापुरुषः कुत्सितपुरुषो भवति। अथवा लग्नात् चन्द्रात् वा यः सप्तमो राशिः तत्र बुधमन्दयोः ज्ञसौरयोः अन्यतरे स्थिते जातयाः भर्ता क्लीबः पुरुषाकारहीनो भवति। यस्याः चरगृहं चरराशिः सप्तमे भवति, तस्याः नित्यं सर्वकालं भर्ता प्रवासान्वितः प्रवासशीलो भवति। अर्थादेवं स्थिरे सप्तमे नित्यं गृहे स्थितो भवति। द्विस्वभावो किञ्चित्प्रवासे किञ्चित् गृहे स्थितो भवति। उत्सृष्टा रविणा कुजेन विधवेति। तरणौ रवौ अवस्थिते सप्तमगे जाता पतिनो उत्सृष्टो भर्ता त्यक्ता

भवति। एवं कुजे सप्तमगते तस्मिंश्चाशुभैः पापैः वीक्षिते बाल्ये विधवा रण्डा विगतभर्तृका भवति। अर्कतनये सौरे द्यूने सप्तमगे तस्मिन् चाशुभैः पापैः वीक्षिते दृष्टे कन्यैव जरामुपगच्छति कुमार्येव वृद्धा भवति वृद्धत्वं प्राप्नोतीति। विवाहं न करोति इत्यर्थः। अत्र चन्द्रलग्नयोः बलवशात् एव एतद् वक्तव्यम्।

**शून्ये कापुरुषो बले अस्तभवने सौम्यग्रहावीक्षिते।**

**क्लीबोऽस्ते बुधमन्दयोश्चरगृहे नित्यं प्रवासान्वितः ।**

**उत्सृष्टारविणा कुजेन विधवा वाल्ये अस्तराशिस्थिते।**

**कन्याइवाशुभवीक्षिते अर्कतनये द्यूने जरां गच्छति ।। ८।।**

**अवबोधप्रश्नः**

5. **भर्तुः प्रवासशीलो योगो लिखत?**

---

एकैकस्मिन् पापग्रहे सप्तमे फलमुक्तम्। यदि बहवः आग्नेयाः क्रूराः सप्तमस्था भवन्ति तदा प्रतिग्रहोक्तफलं त्यक्त्वा तै आग्नेयै अस्तराशिसहितैः विधवा एव भवति। मिश्रैः क्रूरैः सौम्यैः च सप्तमस्थैः पुनर्भूः भवेत्। स्वपाणिग्रहणं त्यक्त्वा अन्यस्य भार्या भवति इत्यर्थः। द्विसंस्कृता। तथा च ग्रन्थान्तरे पुनर्भूः लक्षणं गदितम्। स्वैरिणी स्वपतिं हित्वा सवर्णं कामतः श्रयेत्। अक्षतं च प्रजाद्वारं पुनर्भूसंस्कृता पुनः। क्रूर इति। क्रूर आदित्याङ्गारकशनैश्चराणाम् अन्यतमे अस्तगे लग्नात् सप्तमस्थे तस्मिंश्च हीनबले सर्वबलरहिते तथा भूते सौम्येक्षिते शुभग्रहाणां बुधगुरुसितानाम् अन्यतमेन दृष्टे जाता स्वपतिना आत्मीयेनैव भर्ता प्रोज्झिता त्यक्ता भवति। अन्योन्यांशगयोः इति। सितः शुक्रः अवनिजो अङ्गारकः एतयोः सितावनिजयोः अन्योन्यांशगतयोः परस्परनवांशकस्थितयोः यत्र तत्र राशौ स्थितनवांशके भौमः, भौमनवांशके शुक्रः, तदा साङ्गना, स्त्री अन्यप्रसक्ता परपुरुषरता भवति। अथवा द्यूने लग्नात् सप्तमे स्थाने तावेव यदि अङ्गारकशुक्रौ शीतरश्मिसहितौ चन्द्रसहितौ भवतः तथापि अन्यपुरुषासक्ता भवति। किन्तु भर्तुः अनुज्ञया पत्युः आज्ञयेति न तु स्वातन्त्र्येणेति।

**आग्नेयैर्विधवास्तराशि सहितैर्मिश्रैः पुनर्भूर्भवेत्।**

**क्रूरे हीनबले अस्तगे स्वपतिना सौम्येक्षिते प्रोज्झिता ।**

**अन्योन्यांशगयोः सितावनिजयोरन्य प्रसक्ताङ्गना ।**

**द्यूने वा यदि शीतरश्मिसहितौ भर्तुस्तदानुज्ञया ।। ९।।**

**अवबोधप्रश्नः**

6. विधवा योगः लिखत।

---

सौरः मकरकुम्भौ भौमस्तद्दक्षे मेषवृश्चिकौ एषामन्यतरे लग्नगते तस्मिंश्च सेन्दुशुक्रे इन्दुना, शुक्रेण च संयुक्ते तथा भूते,पापग्रहावलोकिते जाता बन्धकी परपुरुषगामिनी भवति न केवलं यावान्मत्रा सार्द्धं जनन्या सह बन्धकी जाता तन्माताऽपि बन्धकी परपुरुषगामिनी भवति। अस्तांशे लग्नात्सप्तमे स्थाने यो राशिः तत्कालं कौजे भौमनवांशको भवति, तस्मिंश्च कौजे अस्तांशे रविजेन दृष्टे जाता व्याधियोनिः सरोगभाग भवति। यदुक्तं सुभगता अस्तमये तदर्थमाह। चारुश्रेणी वल्लभा सद्ग्रहांश इति। यदा लग्नात् सप्तमे स्थाने शुभग्रहस्य नवांशकोदयो भवति तदा चारुश्रेणी शोभनभगा वल्लभा पत्युः प्रिया च भवति।

**सौरार्क्षे लग्नगे सेन्दुशुक्रे मत्रा सार्द्धं बन्धकी पापदृष्टे।**

**कौजे अस्तांशे सौरिणा व्याधि योनिश्चारुश्रोणी वल्लभा सद्-ग्रहांशे ।। १०।।**

**कठिणपदार्थः**=सौरः =शनैश्चरः, तद्दक्षे= मकरकुम्भौ ,आरो= भौमस्तद्दक्षे मेषवृश्चिकौ, पापदृष्टे= पापग्रहावलोकिते । अस्तांशे= लग्नात्सप्तमे, कौजे =भौमनवांशको, तस्मिंश्च कौजे= अस्तांशे सौरिणा=रविजेन। चारुश्रेणी=शोभनभगा वल्लभा =पत्युः प्रिया च भवति।

यस्या जन्मनि लग्नात् सप्तमे स्थाने मकरकुम्भयोः अन्यतरं तत्सम्बन्धी नवांशको वा सप्तमे भवति। यस्याः आवनेयस्याङ्गारकस्यर्क्षे मेषवृश्चिकयोः अन्यतरतदंशको वा सप्तमे भवति, तस्याः स्त्रीषु

स्पृहयालुः क्रोधशीलश्च भर्ता भवति। एवं वृषतुलयोः  अन्यतरे तदंशके वा सप्तमस्थे कान्तो अतीव दर्शनीयो भर्ता भवति। मिथुनकन्ययोः अन्यतरे तदंशके वा सप्तमस्थे जातायाः भर्ता विद्वान् नैपुणज्ञश्च सर्वत्र सूक्ष्मदृष्टिर्भवति।

**वृद्धो मूर्खः सूर्यजर्क्षे अंशके वा स्त्रीलोलः स्यात् क्रोधनश्चावनेये ।**

**शौक्रे कान्तोऽतीव सौभाग्ययुक्तो विद्वान् भर्तानैपुण ज्ञश्च बौधे ।। ११।।**

सूर्यजस्य= सौरस्यर्क्षम्, यस्याः आवनेयस्याङ्गारकस्यर्क्षे=मेषवृश्चिकयोः, स्त्रीलोलः=स्त्रीषु स्पृहयालुः, क्रोधनः=क्रोधशीलश्च भर्ता। एवं शौक्रे राशौ=वृषतुलयोः, अतीव दर्शनीयो =अतीवसौभाग्ययुक्तो वल्लभश्च भर्ता भवति। बौधे=मिथुनकन्योः, विद्वान्=पण्डितः नैपुणज्ञश्च सर्वत्र सूक्ष्मदृष्टिर्भवति।

**अवबोधप्रश्नः**

7. नैपुणः भर्ता विद्वान् योगः लिखत।

---

यस्याः जातायाः सप्तमे स्थाने चन्द्रो राशिः कर्कटस्तदंशको वा भवति तस्या भर्ता मदनवशगतः मृदुः च भवति। त्रिदशगुरोः धन्विमीनयोः अन्यतरे  सप्तमस्थे तदंशके वा जातायाः भर्ता गुणवान् शौर्यादिभिः  गुणैः युक्तो  जितेन्द्रियश्चदान्तश्च भवति। सौर्ये राशौ  सिंहे तदंशके वा सप्तमस्थे कान्तो अतिमृदु अतीवकठिनः, अतीव व्यापारकृद्भवति। व्यापारकरणशीलः। केचिद् रतिकर्मकृद् कामासक्तो भवति। एवमस्तमयस्थिते सप्तमस्थानस्थेगृहे राशौ अंशके वा फलमभिहतं  यात्रान्यसम्बन्धी राशिः सप्तमे भवति अन्यसम्बन्धी नवांशश्च तत्र राश्यंशपयोः  यो बलवान् तदीयं फलं वाच्यम् इति।

**मदनवशगतो मृदुश्च चान्द्रे त्रिदशगुरौ गुणवान् जितेन्द्रियश्च ।**

**अतिमृदुरतिकर्मकृच्चसौर्ये भवति गृहे अस्तमयस्थिते अंशके वा ।। १२।।**

मदनवशगतः= कामातुरो मृदुः=अकठिनः, जीवस्य राशौ= धन्विमीनयोः। सौर्ये राशौ सिंहे तदंशके वा सप्तमस्थे कान्तो अतिमृदु=अतीवकठिनः, अतिकर्मकृद्= अतीवव्यापारकृद्भवति। व्यापारकरणशीलः। रतिकर्मकृद्=अतिकामातुरः कामासक्तो भवति।

**अवबोधप्रश्नः**

8. भर्तुः व्यापरकरशीलः योगः लिखत।

---

यस्याः जन्मलग्ने चन्द्रसितौ भवतः सा मात्सर्ययुक्ता सुखासक्ता च भवति। ज्ञेन्द्वोः लग्नगतयोः कलासु निपुणो तज्ज्ञा सुखिता सञ्जातसुखा भवति, गुणबहुला च। शुक्रज्ञयोः सितबुधयोः लग्नगतयोः रुचिरा दर्शनीया सुकान्ता सुभगा भर्तृवल्लभा कलाज्ञा च भवति। त्रिष्वपीति। यस्यास्त्रयोपि चन्द्रबुधशुक्रा लग्नगता भवन्ति सा अनेकवसुसौख्यगुणा अनेकवसुभिः धनैः सौख्यैः अनेकबहुभिश्च गुणैः युक्ता भवति। अपिशब्दात् त्रिषु शुभेषु बुधगुरुसितेषु लग्नगतेषु जाता अनेकवसुसौख्यगुणा भवन्ति।

**ईर्ष्यान्विता सुखपराशशिशुक्रलग्ने ज्ञेन्द्वोः कलासु निपुणासुखिता गुणाढ्या।**

**शुक्रज्ञयोस्तु रुचिरा सुभगा कलाज्ञा त्रिष्वप्यनेकवसुसौख्यगुणाशुभेषु** ।। १३।।

शशिशुक्रौ=चन्द्रसितौ, ईर्ष्यान्विता=मात्सर्ययुक्ता, सुखपरा=सुखासक्ता। ज्ञेन्द्वोः= बुधचन्द्रयोः, तज्ज्ञा सुखिता=सञ्जातसुखा, गुणाढ्या =गुणबहुला च। शुक्रज्ञयोः =सितबुधयोः,सुकान्ता =सुभगा, भर्तृवल्लभा=कलाज्ञा च भवति। अनेकवसुसौख्यगुणा= अनेकवसुभिः, धनैः=सौख्यैः, अनेकबहुभिश्च गुणैः युक्ता भवति।

**अवबोधप्रश्नः**

9. मात्सर्ययुक्ता सुखासक्तास्त्री जातकयोगं लिखत।

---

यस्याः क्रूरग्रहो अष्टमे स्थाने भवति तस्या विधवता भवति। कस्मिन् काल इत्याह। निधनेश्वर यस्येति। निधनेश्वरो अष्टमस्थानाधिपतिः यस्य ग्रहस्य नवांशके भवति तस्य यद्वयस्ततस्मिन् वयसि विवाहात् परतः तस्या वैधव्यं वक्तव्यम्। एकं द्वौ नव विंशतिः इत्यादि ग्रहवयः। एवं केचिद्वदन्ति। वयं पुनः दशान्तर्दशाकाले वयः शब्देन ब्रूमः। यत्र निधनेश्वरचन्द्रभौमयोः अन्यतरे अंशे भवति तत्र चन्द्रभौमयोः वयः प्रमाणं वर्षत्रितयम्। तत्र प्रायः कुमारीणांविवाहासंभवस्तस्मादष्टमस्थानाधिपतिः यस्यांशके व्यवस्थितः तस्यान्तर्दशाधिपतिः तस्या विवाहात्परं विधवता प्रदिष्टोक्ता। सत्स्विति। यस्या जन्मनि क्रूरग्रहो अष्टमगो भवति सद्ग्रहः शुभग्रहः। कश्चिद् अर्थगो द्वितीयस्थानगतो भवति।यस्या जन्मनि कन्यायामलिनि वृश्चिके गवि वृषे हरौ सिंहे वा इन्दुः स्तितो भवति तस्या अल्पसुतत्वं स्वल्पपुत्रत्वं वक्तव्यम्। कन्यालिगो हरीणामन्यतमश्चन्द्रराशिः यस्या तस्या अल्पाः पुत्राः भवन्तीति।

**क्रूरेऽष्टमे विधवता निधनेश्वरोंऽशे यस्य स्थितो वयसि तस्य समे प्रदिष्टा ।**

**सत्स्वर्थगेषु मरणं स्वयमेव तस्याः कन्यालिगो हरिषु चाल्पसुतत्वमिन्दौ।।१४।।**

**कठिणपदार्थः**= निधनेश्वरो=अष्टमस्थानाधिपतिः। एवं केचिद्वदन्ति। वयं पुनः दशान्तर्दशाकाले वयः शब्देन ब्रूमः। तत्र प्रायः कुमारीणां विवाहासंभवस्तस्मादष्टमस्थानाधिपतिः= यस्यांशके व्यवस्थितः, तस्यान्तर्दशाधिपतिः =तस्या विवाहात्परं विधवता प्रदिष्टोक्ता। सद्ग्रहः= शुभग्रहः।वृश्चिके गवि =वृषे, हरौ=सिंहे । कन्यालिगो=हरीणामन्यतमश्चन्द्रराशिः यस्या तस्या अल्पाः पुत्राः भवन्तीति।

**अवबोधप्रश्नः**

**10.विधवता योगं लिखत।**

---

**।। पुरुषिणी योगाः।।**

सौरे मध्यबले नातिबलवति न चातिबलहीने तथा शीतांशु शशिसितबुधैः बलेन वीर्येण रहितैः विवर्जितैः शेषैः आदित्यभौमजीवैः वीर्यसमन्वितैःसबलै यत्र तत्रावस्थितैः यद्योजराशिः विषमराशि

उद्गमः लग्ने भवति। विषमराशिः लग्ने जाता भवति। तदा जाता मेषमिथुनसिंहतुलाधन्विकुम्भानाम् अन्यतमे सा पुरुषिणी भवति। बहुपुरुष इत्यर्थः।

**।।ब्रह्मवादिनीयोगाः।।**

जीवारस्फुजित् ऐन्दवेषु इति। जीवो बृहस्पतिः,भौमः, आस्फुजित् शुक्रः ऐन्दवो बुधः एतेषु यत्र तत्र अवस्थितेषु बलिषु वीर्यवत्सु तथा प्राग्लग्ने यदि समराशिर्भवति तदा जाता स्त्री भुवि विख्याता सर्वत्र प्रथिता अनेकसास्त्रकुशला अनेकेषु बहुशु शास्त्रेषु कुशला तज्ज्ञा ब्रह्मवादिन्यपि मोक्षशास्त्रे कुशला भवति।

**सौरे मध्यबले बलेनरहितैः शीतांशुशुक्रेन्दुजैः।**

**शेषैर्वीर्य समन्वितैः परुषिणी यद्योजराश्युद्गमः ।।**

**जीवारस्फुजिदैन्दवेषु बलिषु प्राग्-लग्नराशौ समे।**

**विख्याता भुवि नैकशास्त्रनिपुणास्त्री ब्रह्मवादिन्यपि ।। १५।।**

**कठिणपदार्थः,** जीवो=बृहस्पतिः,आरो=भौमः, आस्फुजित्=शुक्रः, ऐन्दवो=बुधः, अनेकशास्त्रकुशला=अनेकेषु बहुशु शास्त्रेषु कुशला तज्ज्ञा ब्रह्मवादिन्यपि मोक्षशास्त्रे कुशला भवति।

पूर्वं सप्तमस्थस्य ग्रहस्य पृथक् पृथक् फलम् उक्तम्। तत्र लग्नात् पापे क्रूरग्रहे अस्ते सप्तमस्थे अस्ते यद्यन्यः केचिद्ग्रहो लग्नात् नवमगतो भवति तदा सा स्त्री प्रागुक्तं फलं न प्राप्नोति। नवमगतस्य ग्रहस्य तुल्यां तत्कथितां प्रव्रज्यां युवतिः स्त्री निःसंशयेन उपैति प्राप्नोति। एवं स्त्रीजातकव्याख्यातम्। उद्वाहे इति। अत्र ये योगाः व्याख्याताः ते चेदुद्वाहे विवाहकाले भवन्ति तदा योगोक्तफलं वाच्यम्। तथा तस्या वरणविधौ कन्यामार्गणकाले प्रदानकाले कन्यादानकाले च चिन्तायां प्रश्नकाले अपि एवं सकलं सर्वं विधेयं वक्तव्यम्, स्त्रीजातकेषु ये शुभाशुभयोगा उक्ता ते तत्रापि शुभाशुभाः वक्तव्याः। न सकलजातकोक्ताः। ते च यथाप्रदर्शितकालेनैव ज्ञेयाः। येषां च वक्ष्यमाणविवाहपटलोक्तयोगैः बाधा भविष्यति। तेऽत्र न वक्तव्याः। युक्त्यैतद्विवाहपटलमुक्तमिति।

**पापे अस्ते नवमगतग्रहस्य तुल्यां प्रव्रज्यां युवतिरुपैत्यसंशयेन ।**

**उद्वाहे वरणविधौ प्रदानकाले चिन्तायामपि सकलं विधेयमेतत्।। १६।।**

**प्रश्नोत्तराणि-**

1. पुञ्जन्मनि यद्यत्फलम् स्त्रीणाम् अक्षमसम्भाव्यं तत्पतिषु तद्भर्तुषु वदेत् ब्रूयात्।
2. लग्नशशिनो अपि यग्मेषु स्थितयोः स्त्री, योषित्प्रकृतिस्थिता स्त्रीस्वभावा भवति।
3. वृषतुलयोः अन्यतमे लग्नगे चन्द्रगे वा बृहस्पति त्रिंशांशकजाता साध्वी भवति।
4. कर्कटेके बुधत्रिंशांशकजाता शिल्पिनी, विज्ञानयुक्ता भवति।
5. यस्याः चरगृहं चरराशिः सप्तमे भवति, तस्याः नित्यं सर्वकालं भर्ता प्रवासान्वितः प्रवासशीलो भवति।
6. यदि बहवः आग्नेयाः क्रूराः सप्तमस्था भवन्ति तदा प्रतिग्रहोक्तफलं त्यक्त्वा तै आग्नेयै अस्तराशिसहितैः विधवा एव भवति।
7. मिथुनकन्ययोः अन्यतरे तदंशके वा सप्तमस्थे जातायाः भर्ता विद्वान् नैपुणज्ञश्च सर्वत्र सूक्ष्मदृष्टिर्भवति।
8. सौर्ये राशौ सिंहे तदंशके वा सप्तमस्थे कान्तो अतिमृदु अतीवकठिनः, अतीव व्यापारकृद्भवति।
9. यस्याः जन्मलग्ने चन्द्रसितौ भवतः सा मात्सर्ययुक्ता सुखासक्ता च भवति।
10. यस्याः क्रूरग्रहो अष्टमे स्थाने भवति तस्या विधवता भवति।

# ।।नैर्याणिकाध्यायः।।

## उद्देश्यम्-

- अष्टमे स्थाने ग्रहयुक्ते वियुक्ते युते वा यथा म्रियते तद्विज्ञानम्।
- शैलाग्राभिघातेषु यैः योगैः म्रियते तान् शार्दूल क्रीडितेनाह।
- मृत्युयोगानि।

### ।।मारणकारणज्ञानम्।।

बलिभिः ग्रहैः मृत्युगृहे क्षणेन मृत्युः भवति। यस्य जन्मलग्नात् मृत्युगृहम् अष्टमं स्थानं शून्यं यो ग्रहो बलवान् पश्यति तस्य ग्रहस्य यो धातुः तत् धातु कोपोद्भवः तेन धातुना प्रकुपितेन सम्रियते। तद्यथा अर्कस्य पित्तं, चन्द्रस्य वातकफौ सौरस्य वात इति। तत्संयुक्तभगात्रज इति।तदित्यनेन लग्नाद् अष्टमस्थानस्य परामर्शः। तेनाष्टमेन युक्तं यद्भगात्रं तत्संयुक्तभगात्रं तज्जातस्तत्सम्भूतः लग्नाद् अष्टमराशिः यस्मिन्नङ्गे कालाख्यपुरुषस्य वर्तते, तस्मिन्नङ्गे दृष्टग्रहोक्तदोषकोपात् म्रियते। भूरिभिः बहुभिः वीर्यान्वितैः सबलैः बहुभवो मृत्युः यदा बहवोऽपि वीर्यान्विताः तच्छून्यम् अष्टमस्थानं पश्यन्ति तदा यावन्तः पश्यन्ति, तावतां ग्रहाणाम् उक्तदोषप्रकोपेन ते च बहवो दोषाः यस्मिन् कालपुरुषाङ्गे लग्नाद् अष्टमराशिः वर्तते तस्मिन्नङ्गे प्रकुप्य निधनं कुर्वन्तीति। अग्नि-अम्बु-वायुधज इति। सूर्यादिभिः अष्टमे स्थाने स्थितैः अग्न्यादिभिः मृत्युः भवति। तद्यथा-यस्य लग्नाद् अष्टमे स्थाने अर्को भवति, तस्याग्नि हेतुको मृत्युः भवति। एवं चन्द्रे अष्टमे अम्बुहेतुकः, भौमे आयुधहेतुकः, बुधः ज्वरहेतुकः जीवो आमयकृतः अविज्ञातव्याधिकहेतुकः शुक्रे तृड्हेतुकः, सौरे क्षुद्धेतुक इति। एतैर्ग्रहैर्बलिभि यथोक्त एव मृत्युः शुभेन कर्मणा भवति। बलहीनैः अशुभेन मध्यबले मध्यमेनेति। विज्ञातमरणप्रकारस्यमरणदेशज्ञानार्थमाह-निधने चरादिष्विति। यस्य

निधनेऽष्टमे स्थाने चरराशिर्भवति स परदेशे म्रियते। यस्य स्थिरः स स्वदेशे, यस्य द्विस्वभावः सोऽध्वप्रदेशे पथि म्रियत इति।

**मृत्युर्मृत्युगृहेक्षणेन बलिभिस्तद्धातु कोपोद्भवस्तत्। संयुक्तभगात्रजो बहुभवो वीर्यान्वितैर्भूरिभिः।**

**अग्न्यंब्वायुधजो ज्वरामयकृतस्तृड्भुत् कृतश्चाष्टमे। सूर्याद्यैर्निधने चरादिषु परस्वाध्वप्रदेशेष्विति।१।**

**अवबोधप्रश्नः**

1. मृत्युचिन्तनं कथं क्रियते?

---

### ।।शिलाप्रहारेण मरणचिन्तनम्।।

सूर्यकुजयोःरविभौमयोः युगपत् तुल्यकालं खबन्धुस्थयोः दशमयोः चतुर्थयोः वा जातस्य शैलाग्रामभिहतस्य शिलाप्रहारेण हतस्य मृत्युः भवति।

### ।।कूपे मरणचिन्तनम्।।

कूप इति। मन्दशशाङ्कभूमितनयैः सौरेन्दुभौमयथासंख्यं बन्ध्वास्तकर्मस्थितैः चतुर्थसप्तमदशस्थैः। तद्यथा सौरे चतुर्थगे चन्द्रे सप्तमगे भौमे दशमगे जातः कूपे पतितो म्रियते।

### ।।स्वजनेनमृत्युः।।

कन्यायाम् इति। हिमोष्णकरयोः चन्द्रार्कयोः कन्यायां स्थितयोः च पापग्रहदृष्टयोः जातः स्वजनेन म्रियते स्वजनेन व्यापद्यते। उभयोदये द्विस्वभावराशौ उदये लग्नगते तत्र चार्कशशिनौ रविचन्द्रौ यदा स्यातां भवेतां तदा तोये जले मज्जितो मग्नो म्रियते।

**शैलाग्राभिहतस्य सूर्यकुजयोर्मृत्युः खबन्धुस्थयोः।**

**कूपेमन्दशशाङ्कभूमितनयैर्बन्ध्वस्तकर्मस्थितैः ।।**

**कन्यायां स्वजनाद्धिमोष्णकरयोः पापग्रहैर्दृष्टयोः।।**

**स्यातां यद्युभयोदये अर्कशशिनौ तोये तदा मज्जितः।।२।।**

**कठिणपदार्थः**=सूर्यकुजयोः=रविभौमयोः, खबन्धुस्थयोः =दशमयोः चतुर्थयोः , मन्दशशाङ्कभूमितनयैः=सौरेन्दुभौमयथासंख्यं, बन्ध्वास्तकर्मस्थितैः =चतुर्थसप्तमदशस्थैः। हिमोष्णकरयोः = चन्द्रार्कयोः, उभयोदये=द्विस्वभावराशौ, उदये= चार्कशशिनौ, रविचन्द्रौ, तोये= जले, मज्जितो= मग्नो म्रियते।

अवबोधप्रश्नः

2. स्वजनवशात् मृत्यु योगः लिखत।

---

**।।जलोदरमृत्युः।।**

मन्दे शनैश्चरे कर्कटगे कुलीरस्थे मृगाङ्के चन्द्रे मृगे मकरस्थिते जातस्य जलोदरकृते जलोदरेण मृत्युर्भवति। शस्त्राग्निप्रभव इति। शशिनि चन्द्रे कुजर्क्षे मेषवृश्चिकयोः अन्यतरस्थे तत्र चाशुभयोः द्वयोः पापयोः मध्यस्थे जातस्य शस्त्राग्निप्रभवः शस्त्रेणाग्निना वा प्रभवति तत्कृतो मृत्युः।

**।।रज्वाग्निनाममृत्युः।।**

कन्यायाम् इति। शीतगौ चन्द्रे कन्यायाम् इति। शीतगौ चन्द्रे कन्यायां तद्वत् स्थिते पापद्वयमध्यगते यदि चेत् जाताः तदा रज्ज्वग्निपातैः रज्ज्वाऽग्निना पातद्वा म्रियत इति।

**मन्दे कर्कटगे जलोदरकृतो मृत्युर्मृगाङ्के मृगे।**

**शस्त्राग्निप्रभवः शशिन्यशुभयोर्मध्ये कुजर्क्षे स्थिते।।**

**कन्यायां रुधिरोत्थशोषजनितस्तद्वत् स्थिते शीतगौ।**

**सौरर्क्षे यदि तद्वदेवहिमगौ रज्ज्वग्निपातैः कृतः ।। ३।।**

**कठिणपदार्थः**मन्दे=शनैश्चरे, कर्कटगे=कुलीरस्थे, मृगाङ्के =मृगे मकरस्थिते, जलोदरकृते=जलोदरेण मृत्युर्भवति। शस्त्राग्निप्रभव इति। शशिनि चन्द्रे कुजर्क्षे = मेषवृश्चिकयोः अन्यतरस्थे तत्र चाशुभयोः द्वयोः पापयोः मध्यस्थे जातस्य शस्त्राग्निप्रभवः शस्त्रेणाग्निना वा प्रभवति तत्कृतो मृत्युः।

**अवबोधप्रश्नः**

3. **जलोदरमृत्यु योगः लिखत?**

---

**।।बन्धनेन मरणम्।।**

अशुभयोः द्वयोः पापयोः धीनवमस्थयोः पञ्चमनवस्थानस्थयोः च सौम्यग्रहैः अदृष्टयोः अनवलोकितयोः जातः बन्धाद् बन्धनेन म्रियते।

द्रेष्काणैरिति। येन लग्नेन पुमान् जातः तस्माद् अष्टमस्थाने यो राशिः तत्कालं वर्तते तत्र यदि सपाशसर्पो द्रेष्काणो भवति। सनिगडो वा तदा जातः बन्धनेन म्रियत इति।

**बन्धाद् धीनवमस्तयोरशुभयोः सौम्यग्रहाद्**

**दृष्टयोर्द्रेष्काणैश्च सपाशसर्पनिगडैश्छिद्रस्थितैर्बन्धतः।**

**कन्यायाम् अशुभान्विते अस्तमयगे चन्द्रे सिते मेषगे**

**सूर्ये लग्नगते च विद्धिमरणं स्त्री हेतुकं मन्दिरे ।। ४।।**

अशुभयोः द्वयोः पापयोः धीनवमस्थयोः पञ्चमनवमस्थयोः च सौम्यग्रहैः अदृष्टयोः अनवलोकितयोः जातः बन्धाद् बन्धनेन म्रियते। द्रेष्कणैरिति। येन लग्नेन पुमान् जातः तस्मात् अष्टमे स्थाने योः राशिः तत्कालं वर्तते तत्र यदि सपाशसर्पो द्रेष्काणो भवति सनिगडो वा तदा जातः बन्धनेन म्रियते। तत्र भुजगपाशभृद् द्रेष्काणः कर्कटद्वितीयः कर्कटतृतीयः वृश्चिकप्रथमः वृश्चिकद्वितीयः मीनान्त्यश्च। निगडद्रेष्काणः मकराद्यः। कन्यायम् इति। मीनलग्नजातः कन्यायम् अस्तगे सप्तमस्थे चन्द्रे तस्मिन् चाशुभान्विते केनचित् पाप्र सहिते सिते शुक्रे मेषगे सूर्ये रवौ लग्नगते जातस्य मरणं मन्दिरे गृहे स्त्रीहेतुकं स्त्रीनिमित्तं विद्धि जानीहि।

**अवबोधप्रश्ने**

4. बन्धानाद् मृत्युयोगं लिखत।
5. स्त्रीनिमित्तं मरण योगं लिखत।

---

**शूलोद्भिन्नतनुः सुखे अवनिसुते सूर्येऽपि वा खे यमेसप्रक्षीणहिमांशुभिश्च युगपत् पापैस्त्रिकोणाद्यगैः ।**

**बन्धुस्थे चरवौ वियत्यवनिजे क्षीणेन्दु संवीक्षितेकाष्ठेनाभिहतः प्रयाति मरणं सूर्यात्मजेनेक्षिते ।। ५।।**

सुखे चतुर्थे स्थाने अवनिसुते भौमे स्थिते। सूर्येऽपि वा इति। रवौ चतुर्थस्थे खे दशमे स्थाने यदि यमः सौरो भवति तदा जातः शूलोद्भिन्नतनुम्रियते शूलेनोद्भिन्ना तनुः यस्य शूलप्रीतस्य तस्य मरणं भवति। सप्रक्षीणेति। पापैः रविभौमसौरैः सप्रक्षीणश्च हिमांशुभिरतीक्षीणचन्द्रसंयुक्तैश्च युगपत्तुल्यकालं त्रिकोणाद्यगैः पञ्चमनवमलग्नस्थैः । एतदुक्तं भवति सक्षीणचन्द्राणां पापनाम् एतत् स्थानत्रयं मुक्त्वा अन्यत्र अवस्थितिः न भवति तदा चकारात् शूलद्भिन्नतनुः म्रियते। अस्मिन्नेव योगे

चतुर्थगे रवौ दशमस्थे भौमे तस्मिंश्च सूर्यत्मजेन शनैश्चरेण ईक्षिते दृष्टे जातः काष्ठेनाभिहतः काष्ठघातेन ताडितो मरणं प्रयाति प्राप्नोति। इत्यर्थः।

**अवबोधप्रश्नः**

6. काष्ठाघातेन मरणयोगं लिखत।

**।।लगुडेन मृत्युयोगः।।**

**रन्ध्रास्पदाङ्गहिबुकैर्लगुडाहताङ्गः प्रक्षीणचन्द्ररुधिरार्किदिनेशयुक्तैः ।**

**तैरेवकर्मनवमोदयपुत्रसंस्थैर्धूमाग्निबन्धनशरीरनिकुट्टनान्तः ।। ६।।**

रन्ध्रमष्टमं स्थानम्, आस्पदं दशमम् अङ्गं लग्नम्, हिबुकस्थानं चतुर्थम् एतैः रन्ध्रास्पदाङ्गहिकैः यथासंख्यं प्रक्षीणचन्द्ररुधिरार्किदिनेशयुक्तैः। एतदुक्तं भवति। अतिक्षीणचन्द्रोऽष्टमे भौमः दशमे, शनिः लग्ने, रविःचतुर्थे एवं विधे योगे एवं विधे योगे जातो लगुडोहतान्तो भवति। तैः एव ग्रहैः प्रक्षीणचन्द्ररुधिरार्किदिनेशैः यथासंख्यं कर्मनवमोदयपुत्रसंस्थैः दशमनवमलग्नपञ्चमस्थैः क्षीणचन्द्रमा दशमे, भौमो नवमे , सौरो लग्ने, अर्कः पञ्चमे यदि भवति तदा जातस्य धूमेनाग्निना बन्धनेन शरीरनिकुट्टनेन काष्ठादिना प्रहरणेन वा तस्य मृत्युर्भवति।

**अवबोधप्रश्नः**

7. लगुडहतान्त योगः लिखत।

## ।।नृपक्रोधेन मृत्युः।।

कुजो, सूर्यो, मन्दः , एतैः चतुर्थे भौमः, सप्तमे सूर्यः, दशमे सौरः यस्य जन्मनि भवन्ति तस्यायुधेन खड्गादिना शिखिनाग्निना क्षितिपालकोपेन नृपक्रोधेन वा एषामन्यतमेन निर्याणं मृत्युः भवति। सौरेन्दुभूमितनयैः शनिशशिभौमैः यथासंख्यं स्वसुखास्पदस्थैः द्वितीयचतुर्थदशमस्थैः द्वतीये सौरः, चतुर्थ सौरः, चतुर्थ चन्द्रः, दशमे भौमः यस्य जन्मनि भवन्ति तस्य क्षतकृमिभिः पतितैः मृत्युः भवति।

**बन्ध्वस्तकर्मसहितैः कुजसूर्य मन्दैर्निर्याणमायुधशिखिक्षितिपालकोपात् ।**

**सौरेन्दुभूमितनयैः स्वसुखास्पदस्थैर्ज्ञेयः क्षतकृमिकृतश्च शरीरघातः ।। ७।।**

कुजो=अङ्गारकः, सूर्यो=रविः, मन्दः=सौरः, एतैः यथासङ्ख्यं बन्ध्वस्तकर्मसहितैः =चतुर्थसप्तममदशमस्थैः, चतुर्थे=भौमः, सप्तमे =सूर्यः, दशमे= सौरः यस्य जन्मनि भवन्ति, तस्यायुधेन=खड्गादिना शिखिनाग्निना क्षितिपालकोपेन=नृपक्रोधेन वा एषामन्यतमेन निर्याणं मृत्युः भवति। सौरेन्दुभूमितनयैः =शनिशशिभौमैः यथासंख्यं स्वसुखास्पदस्थैः=द्वितीयचतुर्थदशमस्थैः।

8. कृमिवशात् मृत्युचिन्तनं कथं क्रियते?

---

**खस्थे अर्के अवनिजे रसातलगते यानप्रपातद्वधो**

**यन्त्रोत्पीडनजः कुजे अस्तमयगे सौरेन्दुनाभ्युद्गमे ।**

**विण्मध्ये रुधिरार्कि शीतकिरणैर्जूकाजसौरत्र्यक्षगैः**

**याते वा गलितेन्दु सूर्यरुधिरैर्व्योमास्त बन्ध्वाह्वयान् ।। ८।।**

क्षीणेन्द्वौ क्षीणचन्द्रे वीर्यान्वितेन सबलेन वक्रेण भौमेन दृष्टे वीक्षिते अर्कजे सौरे निधनस्थिते अष्टमस्थानगते जातस्य गुह्योद्भवरोगपीडया गुह्ये य उद्भूत उत्पन्नः रोगो

गदस्तत्पीडयाऽर्शोभगन्दरार्त्या कृमिशस्त्रदाहजः कृमिजः शस्त्रजः दाहजः अर्शोबगम्दरादिरोगदोषात् कृमिपातेन शस्त्रकर्मणा वा क्रियमाणेन तस्य मृत्युः भवति।

**वीर्यान्वितवक्रवीक्षिते क्षीणेन्दौ निधनस्थिते अर्कजे ।**

**गुह्योद्भवरोगपीडयामृत्युः स्यात् कृमिशस्त्रदाहजः ।। ९।।**

अस्ते सप्तमे रवौ आदित्ये सरुधिरे भौमेन  संयुक्ते स्थिते अर्कपुत्रे निधनेऽष्टमे क्षीणे हिमगौ चन्द्रे रसातलगते चतुर्थस्थानस्थे  जातः खगान्तो भवति खगः पक्षी तत्कृतो मृत्युः भवति। तस्य मृतस्य अग्नि संस्कारो न भवती इत्यर्थः। लग्नपञ्चमाषटमेति । इनः सूर्यः भौमः कुजः मन्दः सौरः चन्द्रः शशाङ्कः एतैः यथासांख्यं लग्नात्मजाष्टमतपस्तु स्थितैः लग्नात्  पञ्चमाष्टमनवमस्थैः तेन लग्नेऽर्कः पञ्चमे भौमः अष्टमे सौरः नवमे चन्द्रो  यस्य जन्मनि  भवति तस्य शैलशिखरात् पर्वतमस्तकात्  पतितस्याशनिपातेन  चोल्कया वज्रपातेन कुड्यपातेन भित्तिपातेन वा मृत्युर्भवति।

**अस्ते रवौ सरुधिरे निधनेऽर्कपुत्रे क्षीणे रसातलगते हिमगौ खगान्तः ।**
**लग्नात्मजाष्टमतपःस्विनभौममन्दचन्द्रैस्तु शैलशिखराशनि कुड्यपातैः ।। १०।।**

येन द्रेष्काणेन पुमान् जातस्तस्माद्यो द्वाविंसो द्रेष्काणो भवति स सूरिभिः पण्डितैः निधनस्य मृत्योः कारणं निमित्तं कथितः।कथम् इत्याह। तस्याधिपतिः इत्यादि। तस्य द्वाविंशस्य द्रेष्काणस्य यो अधिपतिः ग्रहस्तस्य अग्नि अम्बु आयुधज इत्यादि स्वगुणैः योहेतिः पठितः तेन निर्याणं मरणं प्रयच्छति ददति।अथवा यस्मिन्राशौ स द्वाविंशो द्रेष्काणो भवति तस्य राशेः यः स्वामी तत् सम्भवो भवति स स्वगुणैः आत्मीयहेतुभिः निर्याणं मरणं प्रयच्छति ददाति। स च द्वाविंशो द्रेष्काणो तदा अष्टमस्यापि तृतीयः न केवलं यावत्सर्वराशीनाम्  एषैव व्यवस्ता। अनेन क्रमेण प्रकारेण योष्टमराशेः द्रेष्काणः स एव द्वाविंशो द्रेष्काण इति। तत्रैतज् ज्ञातमयस्योक्तयोगानाम् अन्यतमो योगो न भवति न

चाष्टमं स्थानं ग्रहयुतवीक्षितं तस्य द्वाविंशद्रेष्काणाधिपाष्टमराश्यधिपयोः यो बलवान् तदुक्तद्रेषेण मृत्युरिति।

**द्वाविंशः कथितस्तु कारणं द्रेष्काणो निधनस्य सूरिभिः ।**

**तस्याधिपतिर्भवोऽपि वा निर्याणं स्व गुणैः प्रयच्छति ।। ११।।**

पुरुषस्य जन्मसमये होरायां लग्ने यो नवांशको ग्रहस्तेन यो योग्या भूमिस्तस्यां भूमौ स म्रियते। तद्यथा स चेद् राशिः मेषो भवति तदाजाविकसंज्ञभूमौ। वृषभश्चेत् तदा वृषभप्रचारभूमौ। मिथुनश्चेत् तदा गृहे, कर्कटश्चेत् तदा कूपे, सिंहश्चेत् तदा अरण्ये, कन्या चेत् तदा कूपे तुला चेत् तदा पणगृहे , वृश्चिकश्चेत् तदा श्वभ्रे, धन्वी चेत् अश्वपचारभूमौ, मकरश्चेत् तदा अनूप इति। येषां तु पुनः मृत्युयोगे जलादौ मरणमुक्तं तेषां तत्रैव। न केवलं दर्शितराशिवशेन भूप्रदेशो वक्तव्यः। अपि तु योगेक्षणादिभिरिति। स लग्ननवांशकाधिपतिः यस्मिन् राशौ व्यवस्थितः तत्र यद्यनेन ग्रहेण तस्य योगो भवति तदा तस्य च या भूमिः ईक्षणादि यो वा तत्स्थं पश्यति, आदिग्रहणाद्यस्य नवांशके स्थितस्यापि या भूमिरुक्ता तस्यां स म्रियते, इति। अत्र च बहुभूमिसम्भवे ग्रहबलाद् वक्तव्या। ननु च ग्रहस्य का भूमिः? उच्यते, ग्रहस्य आत्मीयराशेः या भूमिः सैवेति। ननु यस्य राशिद्वयं तस्य का भूमिरिति? उच्यते, तत्र त्रिकोणराशेः सम्बन्धिनी भूमिः इति। तद्यथा। आदित्यस्य सिंहभूमिः अरण्यम्। चन्द्रमसःकर्कटभूमिः अनूपम्। भौमस्य मेषभूमिरजाविकसञ्चारप्रदेशः। बुधस्य कन्याभूमि अनूपम्। जीवस्य धनुर्भूमिरश्वप्रचारः। शुक्रस्य तुलाभूमिः विपणिः। शनैश्चरस्य कुम्भभूमिः गृहमिति। केचिदत्र देवालये अग्निविहारकोसशयनक्षित्युत्कराः स्युः इत्यदिकं स्थानमिच्छन्ति। एतच्च शोभनम्। यतः एतेषु स्थानेषु म्रियमाणा दृश्यन्त इति। एवमेतस्माद अन्यत्। परिकल्प्यं चिन्त्यम्। मोहस्त्विति। यावन्तो लग्नस्य नवांशका अनुदिताः शेषाः तेषाम् अंशानां संपीडितानां यावत्कालो भवति, तत्तुल्यः तत्समो मृत्युसमये मरणकाले कालो भवति। एतदुक्तं भवति। यावत्कालो लग्नाद् अवशिष्टः पुरुषस्य जन्मविषये भवति, तावत्कालमिति। स चेल्लग्नराशिः यदि स्वेशेन स्वपतिनेक्षितो

दृष्टस्तदा स एव कालो द्विगुणो वक्तव्यः अर्थादेवं स्वामिना सौम्यग्रहेण च दृष्टस्तदा षड्गुणकालो वक्तव्यः।

**होरा नवांशकपयुक्तसमान भूमौ योगेक्षणादिभिरतः परिकल्प्यमेतत् ।**

**मोहस्तु मृत्युसमयेऽनुदितांशतुल्यः स्वेशेक्षिते द्विगुणितस्त्रिगुणः शुभैश्च ।। १२।।**

**।।शवपरिमाणचिन्तनम्।।**

निधनभवनेऽष्टमे स्थाने यो द्रेष्काणो व्यवस्थितः तद्वशात् शवपरिणामश्चिन्तनीयः। स च गणनया द्वाविंशो द्रेष्काणो भवति। स च यदि दहनद्रेष्काणो अग्निद्रेष्काणः। अथजलद्रेष्काणो भवति तदा संक्लिद्यते जलमध्ये क्षिप्यते। सौम्यग्रहद्रेष्काणो जलद्रेष्काणः अथ मिश्रद्रेष्काणो भवति तदा शुष्यते। सौम्यग्रहद्रेष्काणः पापयुक्तो भवति, पापग्रहद्रेष्काणो वा सौम्ययुक्तः तदा मिश्रद्रेष्काणः। तथा निधनभवनसंस्थैः अष्टमराश्याश्रितैः व्यालवर्गैः सर्पद्रेष्काणैः विडम्बितो भवति तदा श्वशृगालकाकादिभिः भुज्यते। भक्ष्यते इत्यर्थः। अत्र व्यालद्रेष्काणः कर्कटाद्यः कर्कटद्वितीयः वृश्चिकाद्यः वृश्चिकद्वितीयः मीनान्त्यश्च। उक्तं च शशिगृहपूर्वापरगः कीटस्य च मीनपश्चिमोपगतः। निधने यस्य भवन्ति द्रेष्काणास्तस्य च मृतस्य। भुञ्जन्ति वायसाद्याः प्राणिसमूहा न चास्ति सन्देहः। पापग्रहद्रेष्काणो यस्याष्टमराशिसंस्थितो भवति। दहनं प्राप्नोति नरो मृतमात्रो निश्चयात् प्रवदेत्। एवं सौम्यद्रेष्काणो जलमध्ये क्षिप्यते नरोऽत्र मृतः। सौम्यद्रेष्काणः पापैः पापद्रेष्काणोऽपि सौम्ययुक्तः। यस्याष्टभवनगतः शोषं प्राप्नोति सोऽपि मृत इति। एवं प्रकारः शवानां परिणामो विपत्तिः चिन्तनीयो विचार्यः। पृथुविरचितशास्त्राद्विस्तीर्णच्छास्त्राद्वृत्यर्थकादि मरणादि चिन्त्यम्। मृतस्य का गतिः भविष्यति। कस्माच्च लोकादयमागतः?, आदिग्रहणात् तत्र कीदृग् आसीदिति। अनूकशब्देनहातीतजन्मोच्यते।

**दहनजलविमिश्रैर्भस्म संक्लेदशोषैर्निधनभवनसंस्थैर्व्यालवर्गैर्विडन्तः ।**

**इति शवपरिणामश्चिन्तनीयो यथोक्तः पृथुविरचितशास्त्राद्गत्यनूकादि चिन्त्यम् ।। १३।।**

गुरुः जीवः उडुपतिः शुक्रौ चन्द्रसितौ सूर्यभौमौ रविकुजौ यमज्ञौ सौरबुधौ एते विबुधपितृतिरश्चो नारकीयांश्च जातान् कुर्युः। विबुधलोको देवलोकः प्रसिद्धः तिरश्चस्तिर्यङ्कलोकः प्रसिद्धः एभ्यः आगतान् वदेत्। कथम् इति तदर्थम् आह। दिनकरशशिवीर्याधिष्ठितात् त्र्यंशनाथादिति। दिनकरः सूर्यः शशी चन्द्रः अनयोः दिनकरशशिनोः मध्याद्यो बली वीर्यवान् तेनाधिष्ठितो युक्तो यस्त्र्यांशो द्रेष्काणः तस्य यो नाथः स्वामी तस्य यो लोकस्तस्मादागत इति। वक्तव्यम्। तत्र स यदि द्रेष्काणो गुरोः जीवस्य सम्बन्धी भवति। तदा विबुधलोकादागत इति वक्तव्यम्। अथ चन्द्रशुक्रयोः अन्यतरसम्बन्धी भवति, तदा पितृलोकाद् आगत इति वक्तव्यम्। अथ सूर्यभौमयोः अन्यतरसम्बन्धी भवति तदातिर्यग् लोकाद् आगत इति वक्तव्यम्। अथ शनैश्चरभौमयोः अन्यतरसम्बन्धी भवति तदा नरकलोकादागत इति। वक्तव्यम्। यस्मात् लोकाद् आगतः तत्रापि श्रेष्ठमध्यमहीनस्य ज्ञानमाह प्रवरेत्यादि। यस्य ग्रहस्य प्रदर्शितलोकात् तस्य जन्मज्ञानमाहग्रहस्तुङ्गस्थः स्वोच्चराशिगतो भवति तदा तत्र प्रवरः प्रधानः आसीदिति विज्ञेयम्। अथोच्चराशिच्युतो नीचमप्राप्य तदा तत्रासौ मध्यम आसीदिति विज्ञेयम्। नीचस्थः निकृष्टः हीनः एतदनूके प्राग्जन्मनि ज्ञेयम्।

**गुरुरुडुपति शुक्रौ सूर्यभौमौ यमज्ञौ विबुधपितृतिरश्चो नारकीयांश्च कुर्युः।**

**दिनकरशशिवीर्याधिष्ठितात् त्र्यंशनाथात् प्रवरसमनिकृष्टास्तुङ्गहसादनूके ।। १४।।**

यस्य जन्मनि लग्नात् षष्ठसप्तमस्थानानि शून्यानि भवन्ति तस्य तत्कालं रिपुस्थाने षष्ठे यो द्रेष्काणो यश्च रन्ध्रस्थाने अष्टमे त्र्यंसो द्रेष्काणो वर्तते, तयोः मध्ये यो बलवान् तस्य यो लोको अभिहितः स एव गतिः। एवं रिपुरन्ध्रत्र्यंशप इथि। तत्र तेन मृतेन गन्तव्यमिति। अस्तस्थितो वा। अथ लग्नात् षष्ठसप्तमाष्टमस्थानानाम् अन्यतमे स्थाने कश्चिद् ग्रहो भवति तदा तस्य दर्शितलोके तेन

गन्तव्यम्। अथ लग्नात् षष्ठासप्तमाष्टस्थानानां द्वे स्थाने त्रीणि वा सग्रहाणि भवन्ति। अथैकस्मिन्नपि द्वयादयो ग्रहा भवन्ति तेषां ग्रहाणां यो बलवान् तस्य यः प्रदर्शितो लोकाः तेन गन्तव्यम् इति। नन्वस्थस्थितवेत्योकं स्थानमुक्तं तत्र तत्रं सप्तमग्रहणं कृतं तत् षष्ठाष्टमस्थोवपि स्वां गतिं नयतीति किं व्याख्यातम्? उच्यते, अस्तस्थितो वेति वा शब्दश्चशब्दार्थे ज्ञेयः न केवलमस्तस्थिस्तश्चकाराद्रिपुरन्ध्रपश्चेति केचिदस्तस्थितश्चेति पठन्ति। तथा च स्वल्पजातके उक्तम्। सुरपितृतिर्यङ्गानारकान् गुरुरुडुपसितावसृग्रवीज्ञयमौ। रिपुरन्ध्रत्र्यंशप इति। तत्र तेन मृतेन गन्तव्यम् इति। अस्तस्थितो वा। अथ लग्नात् षष्ठसप्तमाष्टमस्थानानाम् अ्यतमे स्थाने कश्चिद्ग्रहो भवति तदा तस्य दर्शितलोके तेन गन्तव्यम्। अथ लग्नात् षष्ठासप्तमाष्टमस्थानानां द्वे स्थाने त्रीणि वा सग्रहाणि भवन्ति। अथैकस्मिन्नपि द्वयादयो ग्रहा भवन्ति तेषां ग्रहाणां यो बलवान् तस्य यः प्रदर्शितो लोकस्तेन गन्तव्यमिति।नन्वस्तस्थितोवेत्येकं स्थानमुक्तं तत्र सप्तमग्रहण कृतं तत् षष्ठाष्टमस्थयोवपि स्वां गतिं नयतीति किं व्यख्याताम्? उच्यते, अस्तस्थितो वेति वा शब्दश्च शब्दार्थे ज्ञेयः न केवलमस्तस्थितश्चकाराद्रिपरन्ध्रपश्चेति केचिदस्तस्थितश्चेति पठन्ति। तथा च स्वल्पजातके उक्तम्। 'सुरपितृतर्यङ्गारकान् गुरुरुडुपसितावसृग्रवीज्ञयमौ। रिपुरन्ध्रत्र्यंशकपा नयन्ति चास्तारिनिधनस्थाः। गुरुस्थेति। अथशब्दः। पादपूरणार्थे। यस्य जन्मनिः गुरुर्बृहस्पतिर्लग्नाद्रिपुस्थाने षष्ठे भवति केन्द्रेषु वा छिद्रेऽष्टमे वा स च स्वोच्चास्थः कर्कटे भवति तदैको योगः।अथवान्त्ये भवने मीनराशावुदयति विलग्नगते तत्र च गुरुवर्ज्यं शेषा ग्रहा अन्ये ग्रहा बलेन वीर्येण प्रोज्झिता वर्जितां भवन्ति तदा द्वितीयो योगः। अस्मिन् योगद्वये जातस्य मोक्षो भविष्यतीति वक्तव्यम्। उदयति भवने अन्त्ये सौम्यभागे च मोक्ष इत्यत्र चकारो वा शब्दस्यार्थे । यथा पुरुषस्य जन्मकालग्रहवशाद् गतिरुक्ता तता मरणकाललग्नवशादपि गतिः वक्तव्या।

**गतिरपि रिपुरन्ध्रत्र्यंशपोऽस्तस्थितो वा गुरुरथरिपु केन्द्रच्छिद्रगः स्वोच्चसंस्थः ।**

**उदयति भवने अन्त्ये सौम्यभागे च मोक्षो भवति यदि बलेन प्रोज्झितास्तत्र शेषाः ।। १५।।**

**प्रश्नोत्तराणि**

1. यस्य जन्मलग्नात् मृत्युगृहम् अष्टमं स्थानं शून्यं यो ग्रहो बलवान् पश्यति तस्य ग्रहस्य यो धातुः तत् धातु कोपोद्भवः तेन धातुना प्रकुपितेन सम्रियते।
2. मन्दे शनैश्चरे कर्कटगे कुलीरस्थे मृगाङ्के चन्द्रे मृगे मकरस्थिते जातस्य जलोदरकृते जलोदरेण मृत्युर्भवति।
3. हिमोष्णकरयोः चन्द्रार्कयोः कन्यायां स्थितयोः च पापग्रहदृष्टयोः जातः स्वजनेन म्रियते स्वजनेन व्यापद्यते।
4. येन लग्नेन पुमान् जातः तस्माद् अष्टमस्थाने यो राशिः तत्कालं वर्तते तत्र यदि सपाशसर्पो द्रेष्काणो भवति। सनिगडो वा तदा जातः बन्धनेन म्रियत इति।
5. मीनलग्नजातः कन्यायम् अस्तगे सप्तमस्थे चन्द्रे तस्मिन् चाशुभान्विते केनचित् पाप्न सहिते सिते शुक्रे मेषगे सूर्ये रवौ लग्नगते जातस्य मरणं मन्दिरे गृहे स्त्रीहेतुकं स्त्रीनिमित्तं विद्धि जानीहि।
6. चतुर्थगे रवौ दशमस्थे भौमे तस्मिंश्च सूर्यत्मजेन शनैश्चरेण ईक्षिते दृष्टे जातः काष्ठेनाभिहतः काष्ठघातेन ताडितो मरणं प्रयाति प्राप्नोति।
7. अतिक्षीणचन्द्रोऽष्टमे रुधिरो भौमः दशमे, आर्किः सौरोऽङ्गे लग्ने, दिनेशो रविश्चतुर्थे एवं विधे योगे एवं विधे योगे जातो लगुडो हतान्तो भवति।
8. सौरेन्दुभूमितनयैः शनिशशिभौमैः यथासंख्यं स्वसुखास्पदस्थैः द्वितीयचतुर्थदशमस्थैः द्वतीये सौरः, चतुर्थ सौरः, चतुर्थ चन्द्रः, दशमे भौमः यस्य जन्मनि भवन्ति तस्य क्षतकृमिभिः पतितैः मृत्युः भवति।

# ।।नष्टजातकाध्यायः।।

## उद्देश्यम्

- प्रसूतिकालायाः ज्ञानम् ।
- वर्षर्तु ज्ञानम्।
- अथायने विलोमे ग्रहपरिज्ञानाद् ऋतुपरिज्ञानं मासपरिज्ञानंम्।
- चन्द्रमानतिथिज्ञानम्।
- मासज्ञानम्।
- जन्मेशराशिज्ञानम्।
- लग्नज्ञानम्।
- लग्नानयनम्।
- नक्षत्रानयनम्।
- वर्षाद्यानयनम्।
- नक्षत्रानयनम्।
- नष्टजातकम्।

---

यस्याधानकालो ज्ञायते तस्याधानकालात् पूर्वमेव जन्मव्याख्यात एव। एवमाधानजन्मकालयोः परिबोधे अज्ञाने सति प्रश्नलग्नात् जन्म ब्रूयात्। येन लग्नेन प्रष्टा पृच्छति तस्य यदि पूर्वार्धं प्रथमहोरा भवति तदा प्रष्टुः भानावादित्ये उदयगते उत्तरायाणस्थे जन्म वक्तव्यम्। मकरादिराशिषट्कस्थे जात इत्यर्थः। अथ लग्नस्यापरार्धं द्वितीया होरा भवति तदा भानौ दक्षिणगते दक्षिणायनस्थे जन्म वक्तव्यम्।कर्कटादि राशिषट्कस्थे जात इत्यर्थः।

तथा च आधानजन्मनी यस्या विज्ञाते तस्य देहिनः जन्म सम्पृच्छतः तस्य प्रश्नलग्नात् विनिर्दिशेत्।

**आधानजन्मापरिबोधकाले सम्पृच्छतो जन्मवदेद्विलग्नात् ।**

**पूर्वापरार्धे भवनस्य विन्द्याद्भानावुदग्दक्षिणगे प्रसूतिम् ।। १।।**

**अवबोधप्रश्नः**

1. नष्टजातके अयन चिन्तनम् कथं क्रियते?

---

**लग्नत्रिकोणेषु गुरुस्त्रिभागैर्वकल्प्यवर्षाणि वयोऽनुमानात् ।**

**ग्रीष्मोऽर्कलग्ने कथितास्तु शेषैरन्यायनर्तावृतुरर्कचारात् ।। २।।**

त्रिभागैः द्रेष्काणैः लग्नत्रिकोणेषु प्रथमपञ्चमनवमस्थानेषु ज्ञेयः। तद्यथा प्रश्नलग्नस्य यदि प्रथमद्रेष्काणो भवति तदा य एव लग्नराशिः तत्रस्थे गुरौ जन्म वक्तव्यम्। अथ लग्नस्य द्वितीयद्रेष्काणः तदा लग्नाद्यो नवमराशिः तत्रस्थे गुरौ जन्म वक्तव्यम्। एवम् केषाञ्चिन्मतम्। अथान्येषां मतं यथा। प्रश्नलग्नस्य यदा प्रथमो द्रेष्काणादयो भवति तदा लग्नराशितो यावत्सङ्ख्ये राशौ बृहस्पचिर्भवति तावत्सङ्ख्यकानि प्रष्टुर्वर्षाणि वक्तव्यानि। यदा लग्नस्य तृतीयो द्रेष्काणो भवति तदा लग्नात् नवमराशितो यावत्सङ्ख्ये राशौ बृहस्पतिर्भवति तावत्सङ्ख्यकानि प्रष्टुर्वर्षाणि वक्तव्यानि। तद् व्याख्यानं न शोभनम्। अथ लग्ने द्वितीयो द्रेष्काणः तदा लग्नात् पञ्चमराशितः यावत्सङ्ख्ये राशौ बृहस्पतिर्भवति तावत्सङ्ख्यानि प्रष्टुर्वर्षाणि वक्तव्यानि। यदा लग्नस्य तृतीयद्रेष्काणो भवति, तदा लग्नात् नवमराशितो यावत्सङ्ख्ये राशौ बृहस्पतिर्भवति तावत्सङ्ख्यकानि प्रष्टुः वर्षाणि वक्तव्यानि। तद् व्याख्यानं न शोभनं, पूर्वव्यख्यानमेव श्रेयः। यस्माद् यवनेश्वरः द्रेष्काणलग्नक्रमस्तु राशौ गुरुः विलग्नादि त्रिकोणगो अभूत्। समुद्गते तद्भवनक्रमेण स्वाचारभादब्दगतिं प्रगण्यात्।' यद्यप्यत्र सामान्येनोक्तं बृहस्पते अवस्थापनम्,

तथा च द्वादशभागक्रमेण प्रतिराशौ सञ्चार्यः।तद्यथा यदि प्रश्नलग्नस्य प्रथमद्वादशभागोदयो भवति तदा लग्नस्थे जीवे जातः। एवं तृतीयादि द्वादशभागः चेत् तदा लग्नात् द्वितीये गुरौ जातः। एवं तृतीयादि द्वादशभागादये तृतीयादिषु स्थानेषु ऊह्यम्। विकल्प्य वर्षाणि वयोनुमानात्। एवं बृहस्पतेः अवस्थानं ज्ञात्वा तस्य एव वयोनुमानात् तस्य कृतिं शरीरमवेक्ष्य वर्षाणि विकल्प्य वयःप्रमाणं बुद्धा द्वादशसु वर्षेषु विकल्पना कार्या। किमस्मिन्नेव भगणपरिवर्तज्ञातराशेः बृहस्पतेः एव स्थानमभूदुत् द्वितीय उत तृतीयादिषु। एवं तस्याकृतिमवेक्ष्य वयोनुमानं वक्तव्यम्। यत्र द्वादशसु वर्षेषु भ्रान्तिर्भवति तत्र पुरुषलक्षणोक्तेन दसाविभागेन द्वादशवर्षिकीं दशां क्षेत्रेषु परिकल्प्य तत्तत् क्षेत्राङ्गसंस्पर्शाद्वर्षज्ञानम्। तथा च पुरुषलक्षणे पठ्यते। पादौ सगुल्फौ प्रथमं प्रदिष्टं जङ्घे द्वितीयं तु स जानुवक्रे। मेढ्रोरुमुष्काश्चततः तृतीयंनाभिं कटिं चेति चतुर्थमाहुः। उदरं कथयन्ति पञ्चमं हृदयं षष्ठमथ स्तनान्वितम्। अथ सप्तममंश जत्रुणी कथयन्ति अष्टमम् ओष्ट कन्धरे। नवम नयने च सुभ्रुणी सललाटं दशमं शिरः तथा। अशुभे षु अशुभं दशाफलं चरणाद्येषु शुभेषु शोभनम्। इति।

**अवबोधप्रश्नः**

2. कदा लग्ने गुरौ जन्म वदेत्?

---

किंतु अत्र विंशति अधिकवर्षशतं जन्मनो अतीतं तस्य नष्टजातकवर्षज्ञानोपाय एव नास्ति। एवं वर्षेषु ज्ञातेषउ ऋतुज्ञानमाह। ग्रीष्मोऽर्कलग्न इति। येन लग्नेन प्रष्टा पृच्छति तत्र चेदर्कः सूर्यः स्थितः तद् द्रेष्काणो वा लग्ने तदा ग्रीष्मे जात इति वक्तव्यम्। कथितस्तु शेषैः इति। शेषैः अन्यैः चन्द्रादिभिः ग्रहैः लग्नस्थैः ऋतुः पूर्वमेव कथित उक्तः द्रेष्काणैः शशिरादय इत्यादिना ग्रन्थेनोक्तः। तत्र यदा शनैश्चरो लग्ने भवति तद्द्रेष्काणो तदा वसन्ते जातः।एवं भौमे

ग्रीष्मे ।एवमेव रवावपि। चन्द्रे लग्नगते तद्द्रेष्काणे वा वर्षासु। बुधे शरदि।जीवे हेमन्त इति। यदा बहवो लग्नगताः भवन्ति, तदा तेषां मध्ये यो बलवान् तदुक्त ऋतौ जात इति वक्तव्यम्।

अन्यायनर्तावृतुरर्कटाराविति।अन्यस्मिन्नयने वा अन्यस्मिन् ऋतौ अर्कचारात् ऋतुः अन्यस्मिन् अयने तदयनासम्भवश्चेतु अन्यो भवति तदा ऋतुः अर्कचारवशेन वक्तव्यः। एतदुक्तं भवति। सौरेण मानेन ऋतुः वक्तव्यः न तु चान्द्रेण मानेन।यथा शिशिर ज्ञाते ममकरकुम्भयोः अन्यतरे राशौ सूर्यस्य अवस्थानं ज्ञेयम्। एवं शेषराशिषु ऊह्यम्। अनेन लौकिकश्चान्द्रमसो निराकृतो भवतीति।

---

**चन्द्रज्ञजीवाः परिवर्तनीयाः शुक्रारमन्दैरयने विलोमे ।**

**द्रेष्काणभागे प्रथमे तु पूर्वो मासोऽनुपाताच्च तिथिर्विकल्प्यः ।। ३।।**

अयने विलोमे सति चन्द्रज्ञजीवाः शुक्रारमन्दैः परिवर्तनीयाः। शशिबुधगुरवः सितभौमशनैश्चरैः अयनव्यत्यये प्राप्ते सति परिवर्तनीयाः, व्यवस्थाप्याः। एतदुक्तं भवति। यद्युत्तरायणे जाते तदा वसन्ते जात इति वक्तव्यम्। चन्द्रः शुक्रेणात्र परिवर्तितः।अथोत्तरायणे शरदि प्राप्तायां ग्रीष्मे जातः। दक्षिणायने ग्रीष्मे ज्ञाते शरदि जातः। अथ बुधोः रविभौमयोः परिवर्तितौ रविभौमो बुधेन च उत्तरायणे मेहन्ते ज्ञाते शिशिरे जातः।दक्षिणायने शिशिरे प्राप्ते हेमन्ते जात इति वक्तव्यम्। अत्र जीवमन्दौ परस्परमपवर्तितौ। एवमृतौ ज्ञाते मासज्ञानमाह। द्रेष्काणभागो वर्तते, तदा ज्ञातार्तौ प्रथमे मासि जन्म इति वक्तव्यम्। अथ लग्ने द्रेष्काणस्य द्वितीयो भागो वर्तते, तदा ज्ञातार्तौ द्वितीये मासि जन्म इति वक्तव्यम्। अत्रापि अर्कावस्थानत एव मासज्ञानम्। अथ एवं मासं ज्ञात्वा तिथिर्ज्ञानार्थामाह। अनुपाताच्च तिथिर्विकल्प्यः।अनुपातः त्र्यैराशिक तिथिः विकल्प्यो लग्नस्य षड्लिप्तशतानि द्रेष्काणः।

द्रेष्काणेन ऋतुज्ञानं तदर्घल्पिताशतत्रयम्। लिप्ताशतत्रयेण मासज्ञानम्। अनुपातात् तिथिः लिप्ता दशकेनैको ज्ञेयाः। मासा राशयो तिथयो भागाः।यस्मिन्च तिथौ ज्ञातवर्षे यथाप्रदर्शित आदित्यो भवति, तस्मिन् तिथौ तस्य जन्म इति वक्तव्यम्।

**अत्रापि होरापटवो द्विजेन्द्राः सूर्यांशतुल्यां तिथिमुद्दिशन्ति।**

**रात्रिद्युसंज्ञेषु विलोमजन्मभागैश्च वेलाः क्रमशो विकल्प्याः ।। ४।।**

अस्मन् तिथिज्ञाने द्विजेन्द्रामुनयो होराशास्त्रज्ञाः, सूर्यांशतुल्याम् अंशस्थाने स्फुटार्कभागसमां तिथिमुद्धिशन्ति कथयन्ति। प्रश्नकाले तात्कालिकेन आदित्येन यावन्तो भागा भुक्ताः तावन्तः शुक्लप्रतिपत् प्रभृति ज्ञातमासस्य तिथयो व्यतीताः। अत्र चन्द्रमासस्य तिथयो व्यतीताः। अत्र चान्द्रमासस्य तिथयो व्यतीताः। अत्र चान्द्रमाने मकरमाने जाते माघमासो ज्ञेयः। एवमन्येष्वपि मासकल्पना कार्या। तथा च मणित्थः।

**"पृच्छाकाले रविणा यावन्तो अंशाः स्फुटेन संभुक्ताः।**

**राशेः अस्तस्तिथयो स्युः शुक्लादावर्कमासस्य।।"**

एवं दिने ज्ञाते किमयं रात्रौ जातो दिवा वेति तदर्थमाह। रात्रिद्युसंज्ञेषु इति।रात्रिद्युसंज्ञाः पूर्वं व्याख्याताः गोजाश्विकर्किमिथुना इत्यादिना। तत्र प्रश्नकाले यदि रात्रिसंज्ञा लग्नो भवति, तदा तस्य विलोमता दिवा जन्म वक्तव्यम्।मेषादिराशीनां चषकाः। मेषः 200 मीन वृषभः 240 कुंभः, मिथुनः 280मकरः, कर्कः 320 धनु, सिंहः 360 वृश्चिक, कन्या400 तुला । एवं दिनरात्रिविभागे ज्ञाते वेलाज्ञानमाह। भागैश्च वेलाः क्रमशो विकल्प्याः। यस्मिन् दिने पुरुषस्य जन्मज्ञानं तस्मिन् दिने आदित्यो विज्ञातः ततस्तयस्य पुरुषस्य यदि दिवा जन्म तदा तस्माद् आदित्याद् दिनप्रमाणं कार्यम्। अथ रात्रौ जन्म तदा रात्रिप्रमाणम्। तत्र प्रश्नलग्नस्य तस्मिन् काले यावन्तः चषका भुक्ताः तैः अनुपातः कार्यः यदि

पुरुषस्य दिवा जन्म तदा दिनप्रमाणेन। यदा रात्रौ तदा रात्रिप्रमाणेन तत्काललग्नभुक्तचषकाणां गणनां कृत्वा तस्यैव लग्नस्य स्वदेशराश्युदयप्रमाणेन भागमपहृत्य अवाप्तां बेलां तावता कालेन गतेन दिनस्य रात्रेर्वा जन्म वक्तव्यम्। एवं लग्नभागैः क्रमशः परिपाट्या समयः विकल्या।

---

**केचिच्छशाङ्काध्युषितान् नवांशाच्छुक्लान्त संज्ञं कथयन्ति मासम् ।**

**लग्नत्रिकोणोत्तमवीर्ययुक्तं सम्प्रोच्यते अङ्गालभनादिभिर्वा ।। ५।।**

केचिदाचार्याः शशाङ्काध्युषीताच्चन्द्रयुक्तान्नवांशात् शुक्लान्तसंज्ञं मासं कथयन्ति प्रश्नकाले यस्मिन् नवांशके नवमेंशे चन्द्रमा भवति तमपि नवांशकं त्रिधा परिकल्प्य तस्मिन् नवांशके नवमें अंशे चन्द्रमा व्यवस्थित इति चन्द्रनवांशकगत नक्षत्रमन्वेष्यम्। तन्नक्षत्रशुक्लान्तसंज्ञकेन सितस्य जन्म वक्तव्यम्। अत्र यस्य नक्षत्रस्य शुक्लान्तसंज्ञो मासो नास्ति, तस्य बृहस्पतिचारोक्तविधिना शुक्लान्तसंज्ञा मासः परिकल्यः। तत्रोक्तम्।

"नक्षत्रेण सहोदयमस्तं वा येन याति सुरमन्त्री। तत्संज्ञं वक्तव्यं वर्ष मासक्रमणैव।

वर्षाणि कार्तिकादीन्याग्नेयद्भद्वयानि योज्यानि। क्रमशस्त्रिभं तु पञ्चमुपान्त्यमन्त्यं च यद्वर्षम्।।"

इति। तत्र चन्द्रमा यदि वृषनवांशके तन्नवांशकसप्तमस्यार्वाग् भवति तदा कार्तिके मासि जात इति वक्तव्यम्।

अथ वृषनवांशके तन्नवांशकषड्कस्योर्ध्वं भवति मिथुननवांशके तन्नवांशकषड्कस्य अर्वाग् भवति यदा चन्द्रमा तदा मार्गशीर्षे मासि जात इति वक्तव्यम्।

अथ मिथुननवांशके तन्नवांशकषड्कस्य ऊर्ध्वं कर्कटनावंशके तन्नवांशकपञ्चकस्य अर्वाग् यदा चन्द्रमा यदा भवति तदा पौषे मासि जात इति वक्तव्यम्।

अथ कर्कटे तत्तन्नवांशकपञ्चकस्योर्ध्वं सिंहनवांशके तन्नवांशचतुष्टयस्य अर्वाग् यदा चन्द्रमा तदा माघे जन्म इति वक्तव्यम्।

अवबोधप्रश्नः

3. कदा माघे मासे जन्म वक्तव्यम्?

**यावाद्गतः शीतकरो विलग्नाच्चन्द्राद्वदेत्तावति जन्मराशिः ।**

**मीनोदये मीनयुगं प्रदिष्टं भक्ष्याहृताकाररुतैश्च चिन्त्यम् ।। ६।।**

पृच्छालग्नात् चन्द्रो यावति राशौ व्यवस्थितः तस्माद् अग्रस्तावति राशिः तत्रस्थे चन्द्रमसि जात इति वक्तव्यम्। मीनलग्नगतो भवति, तदा मीनयुगमेव प्रदिष्टमुक्तम्। मीनस्थचन्द्रमा इति वक्तव्यम्। ननु दर्शितविधिना राशि अनेकप्रकारो यत्र प्राप्तो भिन्नरूपः तत्र को वक्तव्य इत्यांशक्याह। भक्ष्याहृसाकररुतैरिति। यस्य राशे सम्बन्धिभक्ष्यद्रव्यं तस्मिन् काले कृत्रिममानीयते तदाकाराश्च कश्चिद् दृश्यते। यथा मार्जारादिदर्शने सिंहो महिषादिदर्शने वृष इति। अथवा राश्युक्तरूपं पुरुषस्य दृष्ट्या अथवा रुतेन यस्य राशिसदृशप्राणिनो रुतं शब्दः क्रियते तत्रस्थे चन्द्रमसि जात इति। वक्तव्यम्।

**होरानवांशप्रतिमं विलग्नं लग्नाद्रविर्यावति च दृकाणे ।**

**तस्माद्वदेत्तावति वा विलग्नं प्रष्टुः प्रसूताविति शास्त्रमाह ।। ७।।**

होरायां प्रश्नलग्ने यस्य राशेः नवांशकः तत्कालं वर्तते तत्प्रतिमं तमेव अंशकराशिं तस्य जन्मलग्नं वक्तव्यम्। अथवा लग्नाल्लग्नद्रेष्काणादारभ्य रविः सूर्यो यावति, यावत्संख्य

द्रेष्काणे व्यवस्थितः तस्मात् लग्नात् आरभ्य तावति राशौ लग्नगते तस्य जन्म वक्तव्यम्। अत्र च द्वादशभ्योऽधिके द्वादशकमपास्य सङ्ख्यानिर्देशः चतुर्विंशतेः अधिके चतुर्विंशतिमपास्य शेषं वदेत्। स्वमनीषिकायोक्तमिति शास्त्रग्रहणेनैतत्प्रतिपाद्यते।

"पृच्छालग्ननवांशस्य यो राशिः संज्ञया समः। तस्मिंल्लग्नगते राशौ वक्तव्यं जन्म पृच्छतः।।

यावत् सङ्ख्यो गतो लग्नात् द्रेष्काणो दिनकृत् ततः। तावत्सङ्ख्ये लग्नराशौ द्रष्टुर्जन्म विनिर्दिशेत्।।

---

**जन्मादिशेल्लग्नगे वीर्यगे वा छायाङ्गुलघ्नेर्केहते अवशिष्टम्।**

**आसीनसुप्तोत्थिततिष्ठताभं जाया सुखाज्ञोदयगं प्रदिष्टम्।। ८।।**

लग्नगे ग्रहे जन्मादिशेत्। प्रश्नलग्ने यो ग्रहो व्यवस्थितः तं तात्कालिकं कृत्वा लिप्तपिण्डीकार्याम्। अथ बहवो लग्नगता भवन्ति, तदा तेषां यो बलवान् तं तात्कालिकं कृत्वा लिप्तपिण्डीकार्यम्। ततः सलिलसमीकृतायाम् अवनौ द्वादशाङ्गुलेन शङ्कुना तात्कालिकानि छायाङ्गुलानि, गृहीत्वा तैः अङ्गुलैः एकैकं ग्रहं यद् दर्शिकाले लिप्तपिण्डीकृतं गुणयेत। अथवा सर्वग्रहेभ्यो यो बलवान् ग्रहस्तं तात्कालिकं कृत्वा लिप्ता पिण्डीकार्यम्। ततः सलिलसमीकृतायामवनौ द्वादशाङ्गुलेन शङ्कुना तात्कालिका छायाङ्गुलानि गृहीत्वा तैः अङ्गुलैः एकैकं ग्रहं यद्दिर्शितकाले लिप्तपिण्डीकृतं गुणयेत्। अथवा सर्वग्रहेभ्यो यो बलवान् ग्रहस्तं तात्कालिकं कृत्वा लिप्तपिण्डं कृत्वा छायाङ्गुलहतं चार्कशुद्धं कारयेत्। द्वादशभिः विभजेत् तत्र यावत् सङ्ख्यम् अवशिष्टं तावत्सङ्ख्यो मेषादेरारभ्ययोराशिर्भवति तस्मिन् राशौ लग्नगते तस्य जन्म वक्तव्यम्। अथ प्रकारान्तरेणाह- आसीनेत्यादि।आसीन उपविष्टो यदा प्रष्टा पृच्छति तदा लग्नाद्याज्जायास्थानं सप्तमराशि तस्मिन् लग्नगते तस्य जन्म वक्तव्यम्। अथ सुप्तः। सुप्तोऽत्र

शयनपतितो विहितः लब्धनिद्रस्य प्रश्नाभावात्। तत्र पतितो यदा पृच्छति तदा लग्नाद्यात् सुखस्थानं चतुर्थराशिः तस्मिन् लग्नगते तस्य जन्म वक्तव्यम्। अथोत्थितः पृच्छति, तदा तस्मात् लग्नात् यदाज्ञास्थानं दशमो राशिः तस्मिन् लग्नगते तस्य जन्म वक्तव्यम्। अथ शयनाद् आसनाच्चोत्थितः उत्तिष्ठन् पृच्छति तदोदयलग्नराशौ तस्मिन्नेव जन्म वक्तव्यम्।

---

**गोसिंहौ जितुमाष्टमौ क्रियतुले कन्यामृगौ च क्रमात्।**

**संवर्ग्यौ दशकाष्टसप्तविषयैः शेषाः स्वसंख्या गुणाः ।**

**जीवारास्फुजि दैन्दवाः प्रथमवच्छेषा ग्रहाः ।**

**सौम्यवद्राशीनं नियतो विधिर्ग्रहयुतैः कार्या च तद्वर्गणा।। ९।।**

गोसिंहादयो राशयो यथाक्रमं दशादिभिः गुणाकारैः संवर्ग्या गुणनीयाः। तद्यथा । गोसिंहौ वृषसिंहौ दशभिः गुणयेत्। वृषलग्नं लिप्तपिण्डीकृतं दशभिः गुणयेत्। एवं सिंह दशभिरेव। जितुमाष्टमौ मिथुनवृश्चिकौ लग्नगतावष्टभिर्गुणयेत्। क्रियतुले एतौ सप्तभि गुणयेत्। कन्यामृगौ एतौ लग्नगतौ विषयैः गुणयेत्। एवमेते यथाक्रमं संवर्ग्या गुणनीयाः। तत्र गणनया कर्कटचतुर्भिर्गुणयेत्। एवं धन्वीनवभिः । कुम्भमेकादशभिः एवं मीनो द्वादशभिः। एवं तावल्लग्नं स्वगुणकारेण अवश्यमेव गुणयेत्। दशकाष्टसप्तविषयैः। ततः तत्र यदि ग्रहो भवति,

मे-7, वृ-10, मि-8, क-4, सिं -10, क-5, तु -7, वृ-8, ध -9, म-5,कुं-11, मीन-12) तदा ग्रहगुणकारेण अवश्यमेव गुणयेत्।

---

**अवबोधप्रश्नः**

4. मेषस्य कति गुणाकारः भवति?

**सप्ताहतं त्रिघन भाजित शेषमृक्षं दत्त्वाथ वा नवविशोध्य न वाथ वास्मात्।**

**एवं कलत्रसहजात्मजशत्रुभेभ्यः प्रष्टुर्वदेदुदयराशिवशेन तेषाम्॥ १०॥**

सप्ताहतं सप्तभिः गुणयेत्। दत्वाथवेति। ततस्तत्र नव शोध्याः, न किञ्चिद्वा कथमित्युच्यते। यदि स चरराशिः लग्नगतो भवति तदा नव देयाः। स्थिरे न शोध्याः। द्विस्वभावे विलग्ने नव शोद्याः एवं केचिद् व्याचक्षते। वयं पुनर्ब्रूमः यदि प्रश्नलग्ने प्रथमो द्रेष्काणो भवति तदा नव देयाः।द्वितीये न देयाः, नापि शोध्याः। तृतीये नव शोध्याः। एवं कृत्वा तस्य राशेः त्रिघनेन सप्तविंशत्या भागमपहृत्य अवाप्तं त्याज्यम्। तत्र यावत्सङ्ख्यो अङ्कावशेषो भवति, तावत्सङ्ख्यम् अश्विन्यादितः यन्नक्षत्रं तन्नक्षत्रम् अश्विन्यादितः यन्नक्षत्रं तन्नक्षत्रं तस्य प्रष्टुः वक्तव्यम्। केचिद् वदन्ति यथा स्थितस्य राशेः सप्तविंशत्या भागमपहृत्य अवशेषाङ्कनवादानेन विशोधनेन वा यथास्थितेन अङ्केन संवाद उत्पद्यते तथा नक्षत्रं वक्तव्यम्। एवम् इत्यादि कलत्रसहजात्मशत्रुभेभ्य इति। भार्याभर्तृपुत्ररिपुषु नष्टजातकं यदा पृच्छति, तदा तद्भेभ्यस्तद्भावेभ्यः एवं प्रष्टुः पृच्छकस्य वदेत् ब्रूयात्। तमेवोदयरासिं परिकल्पयेद् इत्यर्थः। एतदुक्तं भवति, यदि पुरुषः स्वपत्न्या नक्षत्रं पृच्छति तदा तात्कालिके लग्ने राशिषट्कं देयम्। अथ भ्रातुः पृच्छति तदा तात्कालिके लग्ने राशिद्वयं देयम्। अथ पुत्रस्य पृच्छति, तदा राशिचतुष्कं देयम्। अथ शत्रोःपृच्छति राशिपञ्चकं देयम्। एवं कृत्वा यद्भवति, तदेव उदयराशिं प्रकल्प्य तद्गुणाकारेण गुणयेत्। तत्स्थग्रहगुणाकारेण च ततः तत्र प्राग्वत् नवकदानविशोधने कृत्वा सप्तविंशत्या भागमपहृत्य अवशेषाङ्कसमं यस्य प्रष्टा

पृच्छति तस्य नक्षत्रं वक्तव्यम्। एतदप्युपलक्षाणार्थमेव त्रिराशिसहिता तत्कालिकालग्नात् मित्रस्य वक्तव्यम् तन्नक्षानयनमप्युपलक्षणमेव सकलमपि नष्टजातकं वक्तव्यम्।

**वर्षर्तुमासतिथयो द्युनिशं ह्यूडूनि वेलोदये ऋक्षनवभागविकल्पनाः स्युः ।**

**भूयो दशादिगुणिताः स्वविकल्पभक्तावर्षादयो नवकदानविशोधनाभ्याम् ।। ११।।**

वर्षादीनि सर्वाणि सविकल्पेन भागे हृते यथा पाठक्रमेणानयितव्यानि। तद्यथातात्कालिकं लग्नं लिप्तपिण्डीकृतं राशिगुणाकारहतं ग्रहसंयुक्तं चेद् ग्रहणकाराहतमपि यदेकान्त स्थापितं तत्पुनरपि दशादिगुणं कार्यम्। एतदुक्तं भवति, सा राशिः स्थानचतुष्टये धार्यः। एकत्र दशगुणोऽन्यत्र द्वितीये अष्टगुणो अन्यत्र तृतीये सप्तगुणः चतुर्थे पञ्चगुणः कार्यः। यत उक्तम्। भूय दशादिगुणिताः। भूयः पुनरपि दशकाष्ट सप्तविषयैः गुणनीयाः। ततस्तस्मिन् राशिचतुष्टये प्राग्वन्नवकदानविशोधने कृत्वा स्वविकल्पैः भागमपहृत्य अवाप्तं तेन वर्षादयो ज्ञयाः।

**विज्ञेयादशकेष्वब्दाऋतु मासास्तथैव च ।**

**अष्टकेष्वपि मासाद् अर्धास्तिथयश्च तथा स्मृताः ।। १२।।**

अत्र बहुवचनं बहुधाोपयोगित्वात् कृतम्। यदुक्तम्। स्वविकल्पभक्ताद्विर्षादयस्तदिव्याख्यायते। एते चत्वारो राशयः स्थापितः तेषां नवकदानविशोधनं कृत्वा कर्मयोग्याः सर्वे भवन्ति। ततो दशगुणस्य पृथक्स्थस्य परमायुषा विंशत्यधिकेन वर्षशतेन भागमपहृत्य यो अङ्को अवशिष्यते तदङ्कसमं तस्य वर्षसंख्यानं वर्तते। तस्यैव षड्भिर्भागमपहृत्य ऋतुसङ्ख्या तत्र यो अङ्को अवशिष्यते तदङ्कसमे शशिरादारभ्यर्तौ जात इति वक्तव्यम्। तस्यैव तु माससङ्ख्या द्वाभ्यां भागमपहृत्य यद्येको अवशिष्यते तदा ज्ञातार्तौ प्रथमे मासि जात इति वक्तव्यम्। तस्यैव तु माससङ्ख्या द्वाभ्यां

भागमपहृत्य यद्येको अवशिष्यते तदा ज्ञातार्तौ  प्रथमे मासि जात इति वक्तव्यम्।अथ शून्यमवशिष्यते तदा द्वितीये मासि जातः। एवं कृत्वा दशगुणः कर्मयोग्यो राशिरपास्यः। यस्य विंशत्यधिकाद्वर्षशतादप्यधिकं जन्मनो अतीतं  तस्य नष्टजातकज्ञानोपाय एव नास्ति। अष्टकेष्विति।योऽसावष्टहतो राशिस्तस्य  पृथक्स्थस्य कर्मयोगस्य पक्षसङ्ख्या द्वाभ्यां भागमपहृत्य यद्येको  अवशिष्यते तदा शुक्लपक्षे जात इति वक्तव्यम्। न किञ्चिद् अवशिष्यतेतदा कृष्णपक्षे, तस्यैव तिथिसङ्ख्या पञ्चदशभिः भागमपहृत्य यो अङ्को अवशिष्यते तदङ्कसमाने तिथौ जात इति वक्तव्यम्। एवं कृत्वा अष्टगुणः कर्मयोग्यो राशिरपास्यः।

---

**दिवारात्रिप्रसूतिं च नक्षत्रानयनं तथा।**

**सप्तकष्वपि वर्गेषु नित्यमेवोपलक्षयेत् ।। १३।।**

यस्मिन् दिने पुरुषस्य जन्मज्ञानं तद्दिनप्रमाणं घटिकादिकं कर्तव्यम्। रात्रौ चेत् तदा रात्रिप्रमाणम्। ततः पञ्चगुणस्य राशेः तेन  दिनप्रमाणेन रात्रिप्रमाणेन वा भागमपहृत्य यो अङ्को अवशिष्यते तस्मिन् काले दिनगते,  वा तस्य जन्म वक्तव्यम्।अथ विलग्नम् इत्यादि। अथ शब्दः पादपूरणार्थम्। काले ज्ञाते राश्यादि लग्नं कर्तव्यम्। ततस्तस्य होराद्रेष्काणनवांशद्वादशांशत्रिंशांशभागाः  कर्तव्याः। तात्कालिग्रहाश्च  कर्तव्याः। तया यथाभिहितेन  विधिना दशान्तर्दशाष्टकवर्गादिभिहितस्य फलस्य निर्देशः कार्यः। एवं नष्टजातकं साधयेत्।

**वेलामथ विलग्नं च होरामंशकमेव च ।**

**पञ्चकेषु विजानीयान्नष्टजातकसिद्धये ।। १४।।**

**संस्कारनाममात्राद्विगुणा छायाङ्गुलैः समायुक्ताः ।**

**शेषं त्रिनवकभक्तान् नक्षत्रं तद्धनिष्ठःआदि ।। १५।।**

संस्कारेण नाम तस्य मात्राः संस्कारेणागतस्य नाम्नो मात्राः संस्कारनाममात्राः । संस्कारग्रहणेनातत्प्रतिपादितं भवति। संस्कारेण यत्पुरुषस्य नाम कृतं तस्य मात्रा ग्राह्याः नान्य कस्यचित् कुनामादेः।मात्राश्चेह गृह्यन्ते हल् अर्द्धमात्रिकः। अत्र मात्रिकः इत्यनया स्थित्या ताः संस्कारनाममात्राः संगृह्य द्विगुणीकार्याः। ततः तात्कलिकानि शङ्कुच्छायाङ्गुलानि गृहीत्वा ता द्विगुणमात्राः तैः अङ्गुलैः संयुक्ताः कार्याः। एवं कृते यद्भवति तस्य त्रिनवकेन सप्तविंशत्या भागम् अपहृत्य यः शेषो भवति तदङ्कसमं तस्य धनिष्ठादित आरभ्यं नक्षत्रं वक्तव्यम्।

**द्वित्रिचतुर्दशदशतिथिसप्तत्रिगुणानवाष्टचेन्द्राद्याः ।**

**पञ्चदशघ्नास्तद्दिङ्मुखान्विताभधनिष्ठादि ।। १६।।**

पूर्वाभिमुखो यदा प्रष्टा पृच्छति तदा द्वयोः अङ्का स्थाप्याः। अथाग्नेयाभिमुखास्तदा त्रयाणाम्। अथ दक्षिणाभिमुखस्तदा चतुर्दशानाम्। अथ नैर्ऋत्यभिमुखस्तदा दशानाम्। अथ पश्चिमाभिमुखस्तदा तिथिसंज्ञानां पंचदशानाम्। अथ वायव्याभिमुखस्तदा सप्तत्रिगुणा एकविंशतिः। उत्तराभिमुखस्तदा नवानाम्। एशान्याभिमुखस्तदा अष्टानाम्।तद्यथा । एवं दिगभिमुखप्रष्टुः प्रवेशानाङ्कं गृहीत्वा ततः पञ्चदशगुणः कार्यः। ततः तस्मिन् प्रदेशे यावन्तः पुरुषाः तदभिमुखाः स्थिताः तत्सङ्ख्यान्वितो युक्तः कार्यः। एवं कृते यद्भवति तस्य सप्तविंशत्या भागमपहृत्य यो अङ्को अवशिष्यते तदङ्कसमं तस्य धनिष्ठाद्यारभ्य नक्षत्रं वक्तव्यम्।

**इति नष्टजातकमिदं बहुप्रकारं मया विनिर्दिष्टम् ।**

**ग्राह्यमतः सच्छष्यैः परीक्ष्ययन्ताद्यथा भवति ।। १७।।**

इति शब्दः उपसंहारे। मया वराहमिहिराचार्येण नष्टजातकं बहुप्रकारं बहुभेदविनिर्दिष्टम् उक्तमिदम्। अतो अस्माद् हेतोः सत् शिष्यैः शोभनसच्छात्रैः ग्राह्यम्। यत्रत्नपरीक्ष्य विचार्य यथा येन प्रकारेण सम्भवति सत्यरूपं तथा ग्राह्यमिति। बहुभिः आगमैः मया विचार्य पराशर-वसिष्ठ-यवन-सत्य-मणित्थादीनां मतानि आलोक्य कृतम्। तदेव भूयो निर्मलगुणनिपुणबुद्ध्या विचार्य सम्यक् तया कार्या येन स्फुटसिद्धोऽसौ सम्पद्यते।

**अवबोधप्रश्नोत्तराणि**

1. येन लग्नेन प्रष्टा पृच्छति तस्य यदि पूर्वार्धं प्रथमहोरा भवति तदा प्रष्टुः भानावादित्ये उदयगते उत्तरायाणस्थे जन्म वक्तव्यम्। मकरादिराशिषट्कस्थे जात इत्यर्थः। अथ लग्नस्यापरार्धं द्वितीया होरा भवति तदा भानौ दक्षिणगते दक्षिणायनस्थे जन्म वक्तव्यम्।

2. प्रश्नलग्नस्य यदि प्रथमद्रेष्काणो भवति तदा एव लग्नराशिः तत्रस्थे गुरौ जन्म वक्तव्यम्।

3. अथ कर्कटे तत्तन्नवांशकपञ्चकस्योर्ध्वं सिंहनवांशके तन्नवांशचतुष्टयस्य अर्वाग् यदा चन्द्रमा तदा माघे जन्म इति वक्तव्यम्।

4. मेषस्य 7 गुणाकारः भवति ।

# ।।द्रेष्काणाध्ययः।।

उद्देश्यम्।-

→ मेषाद्यद्रेष्काणस्य स्वरूपम्।

→ मेषद्वितीयद्रेष्काणस्य स्वरूपम्।

→ मेषतृतीयद्रेष्काणफलम्।

→ वृषप्रथमद्रेष्काणजातस्य स्वरूपम्।

→ वृषद्वितीयद्रेष्काणस्य स्वरूपम्।

→ वृषतृतीयद्रेष्काणस्य स्वरूपम्।

→ मिथुनस्य प्रथमद्रेष्काणस्य स्वरूपम्।

→ मिथुनस्य द्वितीयद्रेष्काणस्य स्वरूपम्।

→ मिथुनस्य तृतीयद्रेष्काणस्य स्वरूपम्।

→ कर्काटकपूर्वस्य स्वरूपम्।

→ कर्कटकद्वितीयद्रेष्काणस्य स्वरूपम्।

→ कर्काटकतृतीयद्रेष्काणस्य स्वरूपम्।

→ सिंहपूर्वस्य द्रेष्काणस्य स्वरूपज्ञानम्।

→ सिंहद्वितीयस्य स्वरूपम्।

→ सिंहतृतीयस्य स्वरूपम्।

→ कन्यापूर्वस्य स्वरूपम्।

→ कन्या द्वितीयस्य स्वरूपम्।

→ कन्या तृतीयस्य स्वरूपम्।

→ तुलाद्यस्य स्वरूपम्।

→ तुलाद्वितीयस्य स्वरूपम्।

→ तुलातृतीयस्य स्वरूपम्।

→ वृश्चिकप्रथमस्य स्वरूपम्।

→ वृश्चिकद्वितीयस्य स्वरूपम्।

→ वृश्चिकतृतीयस्य स्वरूपम्।

→ धन्विपूर्वस्य स्वरूपम्।

→ धन्विद्वितीयस्य स्वरूपम्।

→ धन्वितृतीयस्य स्वरूपम्।

→ मकरप्रथमस्य स्वरूपम्।

→ मकरद्वितीयस्य स्वरूपम्।

→ मकरतृतीयस्य स्वरूपम्।

→ कुम्भप्रथमद्रेष्काणस्य स्वरूपम्।

→ कुम्भद्वितीयस्वरूपम्। कुम्भतृतीयस्वरूपम्।

→ मीनप्रथमद्रेष्काणस्य स्वरूपम्। मीनद्वितीयद्रेष्काणस्य स्वरूपम्। मीन तृतीय द्रेष्काणस्य स्वरूपम्।

..........................................................................................................................................................

**मेषाद्यद्रेष्काणस्य स्वरूपम्**

कट्यां सितं अम्बरं वेष्टितं येन। कृष्णः, शक्त इव अभिमुख्येन रक्षां कर्तुं शक्तः समर्थःइव। रौद्रो भीषणः यः परशुं समुद्यतं धत्ते । रक्त विलोचनो स च पुमान् पुरुषः एव पुरुषद्रेष्काणः सायुधो भौमासक्तश्च।

**कट्यां सितवस्त्रवेष्टितः कृष्णः शक्तेवाभिरक्षितुम्। रौद्रः परशुं समुद्यतं धत्ते रक्तविलोचनः पुमान् ।। १।।**

कट्यां=जघने, सितं=श्वेतम्, अम्बरं=वस्त्रं वेष्टितं येन। कृष्णः =असितवर्णः, शक्त इव अभिरक्षितुम् अभिमुख्येन रक्षां कर्तुं शक्तः समर्थःइव। रौद्रो=भीषणः यः परशुं=कुठारं समुद्यतं धत्ते=धारयति। रक्त विलोचनो= लेहिताक्षः स च पुमान् =पुरुषः एव पुरुषद्रेष्काणः सायुधो भौमासक्तश्च।

**अवबोधप्रश्नः**

1. **मेषाद्यद्रेष्काणस्य स्वरूपम्**

### ।। मेषद्वितीयद्रेष्काणस्य स्वरूपम्।।

रक्ताम्बरा, भूषम् भक्ष्यं, भोज्यं तत्र चित्तं यस्याः कुम्भाकृतिः वाजिमुखी, तृषार्ता एकेन पादेन चरणेन उपलक्षिता इदं द्रेष्काणरूपं मेषमध्ये यवनोपदिष्टं कथितम्। एष चतुष्पदद्रेष्काण इति व्याख्यातः तथा खगमुखो द्रेष्काणश्च।

**रक्तमम्बराभूषणभक्ष्यचिन्ता कुम्भाकृतिर्वाजिमुखी तृषार्ता।एकेन पादेन च मेषमध्ये द्रेष्काणरूपं यवनोपदिष्टम् ।। २।।**

रक्ताम्बरा=लोहितवस्त्रा, भूषम्=अलङ्करणम्, भक्ष्यं=भोज्यं, तत्र चित्तं यस्याः कुम्भाकृतिः=घटोदरी वाजिमुखी=अश्ववक्त्रा , तृषार्ता=पिपासार्ता एकेन पादेन चरणेन उपलक्षिता इदं द्रेष्काणरूपं मेषमध्ये= मेषद्वितीयं यवनोपदिष्टं =यवनाचार्यैः कथितम्। एष चतुष्पदद्रेष्काण इति व्याख्यातः तथा खगमुखो द्रेष्काणश्च।

---

### ।।मेषतृतीयद्रेष्काणफलम्।।

क्रूरो, कलाज्ञः, कपिलः, क्रियार्थी, भग्नव्रतः, अभिमुख्येनोद्यतो दण्डः हस्ते पाणौ यस्य। रक्तानि वस्त्राणि बिभर्ति। चण्डः अयं मेषत्रिभागे द्रेष्काणः कथित उक्तः।

**क्रूरः कलाज्ञः कपिलः क्रियार्थी भग्नव्रतोऽभ्युद्यतदण्डहस्तः।**

**रक्तानि वस्त्राणि बिभर्ति चण्डो मेषे तृतीयः कथितस्त्रिभागः ।। ३।।**

क्रूरो=विषमस्वभावः, कलाज्ञः=कलावित्, कपिलः=पिङ्गलः, क्रियार्थी=कर्मसु अभिलाषुकः भग्नव्रतः= स्खलितनियतः, अभिमुख्येनोद्यतो दण्डः= हस्ते पाणौ यस्य। रक्तानि=लोहितानि, वस्त्राणि=अम्बराणि, बिभर्ति= धारयति। चण्डः= क्रोधशीलः। अयं मेषत्रिभागे द्रेष्काणः कथित उक्तः।

---

### ।।वृषप्रथमद्रेष्काणजातस्य स्वरूपम्।।

कुञ्चिताः लूनाः कचाः यस्याः सा कुटिलच्छिन्नकेशा, घटदेहा, दग्धवस्त्र, तृषार्ता, अशने चित्तं यस्याः। आभरणानि अभिवाञ्छति सा च नारी इदं वृषभप्रथमस्य द्रेष्काणस्य स्वरूपम्। एषः स्त्रीद्रेष्काणः साग्निकःशुक्रसक्तश्च।

**कुञ्चित लूनकचा घटदेहादग्धपटा तृषिताशनचित्ता।**

**आभरणान्यभिवाञ्छति नारीरूपमिदं वृषभे प्रथमस्य।।4।।**

कुञ्चिताः=कुटिलाः लूनाः कचाः=केशाः यस्याः सा कुटिलच्छिन्नकेशा, घटदेहा=कुम्भसदृशोदरी,दग्धपटा =दग्धवस्त्र, तृषार्ता =पिपासार्ता, अशने =भोजने चित्तं यस्याः। आभरणानि=भूषणानि अभिवाञ्छति सा च नारी =स्त्री इदं वृषभप्रथमस्य द्रेष्काणस्य स्वरूपम्। एषः स्त्रीद्रेष्काणः साग्निकःशुक्रसक्तश्च।

---

**वृषद्वितीयद्रेष्काणस्य स्वरूपम्।**

क्षेत्रं, धान्यानि, गृहं, धेनुः, कलाः गीतवाद्यनृत्यलेखचित्रकर्मादि एतासां ज्ञः, लाङ्गले सशकटे कुशलः शिक्षितः गोपतितुल्यं, स्कन्धम् उद्वहति। क्षुत्परः अजवदनः मलवासा। एषनरद्रेष्काणः चतुष्पादद्रेष्काणो बुधसक्तश्च।

**क्षेत्रधान्यगृहधेनुकलाज्ञो लाङ्गले सशकटे कुशलश्च।**

**स्कन्धमुद्वहति गोपतितुल्यं क्षुत्परोऽजवदनो मलवासा ।। ५।।**

क्षेत्रं=केदारः, धान्यानि=शालयः, गृहं=वेश्म, धेनुः=गौः, कलाः गीतवाद्यनृत्यलेखचित्रकर्मादि एतासां ज्ञः=पण्डितः, लाङ्गले=हले, सशकटे=शकटसहिते, कुशलः=शिक्षितः, गोपतितुल्यं=वृषभसदृशं, स्कन्धं=ककुदम्, उद्वहति=धारयति। क्षुत्परः=क्षुधायार्तः अजवदनः=छागवक्रं मलवासा=मलिनाम्बरः। एषनरद्रेष्काणः =चतुष्पादद्रेष्काणो बुधसक्तश्च।

---

**।। वृषतृतीयद्रेष्काणस्य स्वरूपम्।।**

द्विपसमकायो अर्थात् हस्तितुल्यदेहः न पुनः हस्तिशरीरः , पाण्डुरदंष्ट्रः शरभसमाङ्घ्रिः, पिङ्गलमूर्तिः कपिलदेहः, अविमृगलोभार्थं व्याकुलं चित्तं यस्य । अयं वनस्य वृषराशेः प्रान्तगतः तृतीयद्रेष्काणः। चतुष्पादाः सौरासक्ताश्चत।

**द्विपसमकायः पाण्डुरदंष्ट्रः शरभसमाङ्घ्रिः पिङ्गलमूर्तिः।**

**अवि मृगलोभव्याकुलचित्तो वृषभवनस्य प्रान्तगतोऽयम् ।। ६।।**

द्विपसमकायो महाशरीरो= हस्तितुल्यदेहः न पुनः हस्तिशरीरः , पाण्डुरदंष्ट्रः=श्वेतदन्तः शरभसमाङ्घ्रः बृहत्पादो न पुनः शरभसदृशपादः, पिङ्गलमूर्तिः=कपिलदेहः अविः प्रसिद्धः, मृगः=अरण्यपशुः अविमृगलोभार्थं व्याकुलं चित्तं यस्य। अयं वनस्य वृषराशेः प्रान्तगतः तृतीयद्रेष्काणः। चतुष्पादाः सौरासक्ताश्चत।

### मिथुनस्य प्रथमद्रेष्काणस्य स्वरूपम्।

नारी शूच्याश्रयं सम्यगभिवाञ्चति इति। रूपान्विता आभरणकार्ये कृत आधरो अभिलाषः श्रद्धा यया हीनप्रजा अपत्यरहिता उच्छ्रितभुजोर्ध्वबाहुकी ऋतुमती सार्तवा वा। तृतीयभवनस्य मिथुनस्याद्यं प्रथमं त्रिभागं द्रेष्काणं तज्ज्ञाः पण्डिताः प्रवदन्तिः।एष स्त्रीद्रेष्काणो बुधसक्ताश्च।

**सूच्याश्रयं समभिवाञ्छति कर्मनारी रूपान्विताभरण कार्य कृतादरा च ।**

**हीनप्रजोच्छ्रितभुजऋतु मती त्रिभागमाद्यं तृतीयभवनस्य वदन्ति तज्ज्ञाः ।। ७।।**

नारी=स्त्री शूच्याश्रयं=कर्म सीवनक्रियां सम्यगभिवाञ्चति इति। रूपान्विता=सुरूपा आभरणकार्ये भूषणकर्मणि, कृत आधरो अभिलाषः श्रद्धा यया हीनप्रजा=अपत्यरहिता उच्छ्रितभुजोर्ध्वबाहुकी ऋतुमती सार्तवा= कामार्ता वा। तृतीयभवनस्य=मिथुनस्याद्यं प्रथमं त्रिभागं द्रेष्काणं तज्ज्ञाः पण्डिताः प्रवदन्ति=कथयन्ति।एष स्त्रीद्रेष्काणो बुधसक्ताश्च।

### मिथुनस्य द्वितीयद्रेष्काणस्य स्वरूपम्।

उद्यानसंस्थ, कवची, धनुष्मान्, शूरो रणप्रियः। शरास्त्रधारी वा पाठः। शराः, काण्डानि तान्येवास्त्राणि तत् धारणे शीलं यस्येति। गरुडाननःक्रीडनं आत्मजाः, अलङ्करणम्, अर्थो, एषां सम्बन्धिनीं चिन्तां करोति। अयं मिथुनस्य राशेःमध्ये द्वितीयद्रेष्काणः इत्यर्थः। एश नरद्रेष्काणसायुधः खरद्रेष्काणः शुक्रसक्ताश्च।

**उद्यानसंस्थः कवची धनुष्माञ्छूरोऽस्त्रधारी गरुडानानाश्च।**

**क्रीडात्मजालंकरणार्थं चिन्तां करोति मध्ये मिथुनस्यराशेः।। ८।।**

उद्यानसंस्थ=उपवने तिष्ठति। कवची=सन्नाहप्रावृतशरीरः, धनुष्मान्=चापहस्तः,शूरो=रणप्रियः। शरास्त्रधारी वा पाठः। शराः=काण्डानि तान्येवास्त्राणि तत् धारणे शीलं यस्येति। गरुडाननः=पक्षिसदृशवक्त्रं

क्रीडनं,क्रीडा=आत्मजाः पुत्राः, अलङ्करणम्=आभरणम्, अर्थो=वित्तम्, एषां सम्बन्धिनीं चिन्तां करोति। अयं मिथुनस्य राशेःमध्ये=द्वितीयद्रेष्काणः इत्यर्थः। एषनरद्रेष्काणसायुधः खरद्रेष्काणः शुक्रसक्ताश्च।

**मिथुनस्य तृतीयद्रेष्काणस्य स्वरूपम्।**

भूषितो, वरुणवत् बहुरत्नः, तूणं, कवचं सन्नाहः एतौ बद्धौ ग्रथितौ येन, सधनुष्कः, नृत्ये वादिते वाद्यविषये कलासु च निःशेषासु विद्वान् तज्ज्ञः काव्यकृत् पण्डितः कवेः कर्म काव्यं तत्करोति। एषः मिथुनस्य राशेः अवसाने तृतीयद्रेष्काण इत्यर्थः। एषः नरद्रेष्काणः, सायुधः सौरसक्ताश्च।

**भूषितो वरुणवद्बहुरत्नो बद्धतूणकवचः सधनुष्कः।**

**नृत्त वादितकलासु च विद्वान् काव्यकृन्-मिथुनराश्यवसाने।। ९।।**

भूषितो=अलङ्कृतः, वरुणवत्=समुद्रवत्, बहुरत्नः =प्रभूतमणिः,तूणं शराधनं,कवचं सन्नाहः एतौ बद्धौ ग्रथितौ येन, सधनुष्कः चापयुक्तः , नृत्ये वादिते वाद्यविषये कलासु च निःसेषासु विद्वान् तज्ज्ञः काव्यकृत् पण्डितः कवेः कर्म =काव्यं तत्करोति। एषः मिथुनस्य राशेः अवसाने तृतीयद्रेष्काण इत्यर्थः। एषः नरद्रेष्काणः, सायुधः सौरसक्ताश्च।

**कर्काटकपूर्वस्य स्वरूपम्।**

**पत्रमूल**पत्राणि च बिभर्ति धारयति। द्विपकायो हस्तिसदृशशरीरः। कानने मालगः मलश्चन्दनवृक्षः तत्रोपगतः स्थितः। शरभाङ्घ्रिः शरभसदृशपादः, क्रोडः सूकरः तत्तुल्यवदनः तत्सदृशवक्रः, हयकण्ठ अश्वः ग्रीवं, कर्कटराशौ प्रथमद्रेष्काणस्य स्वरूपम् उशन्ति कथयन्ति। एष द्रेष्काणश्चतुष्पादश्चन्द्रसक्ताश्च।

**फलभृद् द्विपकायः कानने मलयगः शरभाङ्घ्रिः।**

**क्रोडतुल्यवदनो हयकण्ठः कर्कटे प्रथमरूपमुशन्ति।। १०।।**

पत्राणि=मूलानि फलानि च बिभर्ति धारयति। द्विपकायो=हस्तिसदृशशरीरः। कानने=वने मालगः= मलश्चन्दनवृक्षः तत्रोपगतः स्थितः। शरभाङ्घ्रिः= शरभसदृशपादः, क्रोडः=सूकरः तत्तुल्यवदनः =तत्सदृशवक्रः, हयकण्ठः=अश्वः ग्रीवं, कर्कटराशौ=प्रथमद्रेष्काणस्य स्वरूपम् उशन्ति=कथयन्ति। एष द्रेष्काणश्चतुष्पादश्चन्द्रसक्ताश्च।

### ।। कर्कटकद्वितीयद्रेष्काणस्य स्वरूपम्।।

स्त्री योषिन्मूर्धनि शिरसि पद्मैः कमलैः अर्चिता पूजिता। भोगियुक्ता ससर्पा कर्कशा कठिनयौवनोपेता, अरण्यगता एकान्तस्थिता, विरौति आक्रोशति। पलाशवृक्षस्य साखां लतां समाश्रिता तत्रासक्ता स्थिता। कर्कटस्य राशेः मध्ये स्थिता द्वितीयद्रेष्काणे समवस्थिता। एष स्त्रीद्रेष्काणो व्यालद्रेष्काणे भौमसक्तश्च।

**पद्मार्चिता मूर्धनि भोगियुक्तास्त्रीकर्कशारण्यगताविरौति ।**

**शाखां पलाशस्य समाश्रिता च मध्ये स्थिता कर्कटकस्यराशेः ।। ११।।**

स्त्री=योषित्, मूर्धनि=शिरसि, पद्मैः=कमलैः अर्चिता=पूजिता। भोगियुक्तासससर्पा कर्कशा= कठिनयौवनोपेता, अरण्यगता=एकान्तस्थिता, विरौति=आक्रोशति। पलाशवृक्षस्य साखां लतां समाश्रिता तत्रासक्ता स्थिता। कर्कटस्य राशेः मध्ये स्थिता=द्वितीयद्रेष्काणे समवस्थिता। एष स्त्रीद्रेष्काणो व्यालद्रेष्काणे भौमसक्तश्च।

**अवबोधप्रश्नः**

2. व्यालद्रेष्काणस्वरूपं लिखत।

### ।। कर्काटकतृतीयद्रेष्काणस्य स्वरूपम्।।

भार्या आभरणार्थम् समुद्रं नावाम् आरूढः। सर्पवेष्टिताङ्गो गच्छति सुवर्णनिर्मितैः विभूषणैरलंकरणैर्युतः। चिपिटमुखः तृतीयद्रेष्काणे इत्यर्थः। एष नरेन्द्रद्रेष्काणो व्यालद्रेष्काणो जीवसक्ताश्च।

**भार्याभरणार्थमर्णवं नौस्थो गच्छति सर्पवेष्टितः ।**

**हैमैश्च युतो विभूषणैश्चिपिटास्याङ्न्त्य गतश्च कर्कटे ।। १२।।**

भार्या=जाया तस्या आभरणार्थम्=अलङ्करणनिमित्तमर्णवं समुद्रं नौस्थो=नावाम् आरूढः। सर्पवेष्टिताङ्गो गच्छति=याति हेमैः=सुवर्णनिर्मितैः विभूषणैरलंकरणैर्युतः। चिपिटमुखः=कर्कटेऽन्त्यगतः। तृतीयद्रेष्काणे इत्यर्थः। एष नरेन्द्रद्रेष्काणो= व्यालद्रेष्काणो जीवसक्ताश्च।

### सिंहपूर्वस्य द्रेष्काणस्य स्वरूपज्ञानम्।

शाल्मलेरिति। शाल्मलिवृक्षस्योपर्यग्रे गृध्रः पक्षी, जम्बुकः श्रृगालः , एतौ स्थितौ तथा श्वा सारमेयः, नरो मनुष्यः, स च मलिनैः, मलोपेतैः अम्बरैः वस्त्रै अन्वितो युक्तः, मातृपितृविप्रयोजितो जननी जनक विरहितो रौत्याक्रोशति। इदमाद्यं प्रथमं रूपं सिंहस्योच्यते कथ्यते। सिंहप्रथमद्रेष्काण इत्यर्थः। एष नरद्रेष्काणः चतुष्पाद्द्रेष्काणः खगद्रेष्काणोर्कसक्ताश्च।

**शाल्मलेरुपरि गृध्रजम्बुकौ श्वानरश्च मलिनाम्बरान्वितः |रौति मातृपित्रिविपर्योजितः सिंहरूपमिदमाद्यमुच्यते| १३|**

शाल्मलिवृक्षस्योपर्यग्रे गृध्रः= पक्षी, जम्बुकः=श्रृगालः , एतौ स्थितौ तथा श्वा= सारमेयः, नरो मनुष्यः, स च मलिनैः, मलोपेतैः अम्बरैः वस्त्रै अन्वितो युक्तः, मातृपितृविप्रयोजितो जननी जनक विरहितो रौत्याक्रोशति। इदमाद्यं प्रथमं रूपं सिंहस्योच्यते कथ्यते। सिंहप्रथमद्रेष्काण इत्यर्थः। एष नरद्रेष्काणः चतुष्पाद्द्रेष्काणः खगद्रेष्काणोर्कसक्ताश्च।

### ।। कन्यापूर्वस्य स्वरूपम्।।

कन्या पुष्पप्रपूर्णेन कुसुमपूरितेन कुम्भेन उपलक्षिता मलप्रदिग्धैः अतिमलोपेतैः अम्बरैः वस्त्रैः संवृताङ्गी संवृतावयवा। वस्त्राणि अम्बराणि अर्थो धनम् एषां संयोगम् अभीष्टमाना वाञ्छमाना गुरोःकुलं व्रजति गच्छति। कन्यकाद्याः प्रथमद्रेष्काणः। एष स्त्रीद्रेष्काणे बुधसक्ताश्च।

**पुष्पप्रपूर्णेन घटेन कन्या मलप्रदिग्धाम्बरसंवृताङ्गी ।वस्त्रार्थसंयोगमभीष्टमाना गुरोः कुलं वाञ्छति कन्याकाद्यः |१६|**

कन्या=कुमारी, पुष्पप्रपूर्णेन=कुसुमपूरितेन कुम्भेन उपलक्षिता मलप्रदिग्धैः=अतिमलोपेतैः अम्बरैः=वस्त्रैः संवृताङ्गी=संवृतावयवा। वस्त्राणि=अम्बराणि अर्थो=धनम् एषां संयोगम् अभीष्टमाना=वाञ्छमाना गुरोःकुलं व्रजति गच्छति। कन्यकाद्याः= प्रथमद्रेष्काणः। एष स्त्रीद्रेष्काणे बुधसक्ताश्च।

### ।। कन्या द्वितीयस्य स्वरूपम्।।

पुरुष, प्रगृहीतलेखनिः श्यामो वस्त्रशिराः, कर्पटसंयमितमूर्द्धा केचिद् बद्धशिरा इति पटन्ति। संयमितशिराः। व्ययकृत् आयं प्रवेशं च करोति गणयति। विपुलं कार्मुकं धनुर्बिभर्ति, रोमव्याप्ततनुः एष मध्यमो द्वितीयद्रेष्काणः। एष नरद्रेष्काणः सायुधः सौरसक्ताश्च।

**पुरुषः प्रगृहीतलेखनिः श्यामो वस्त्रशिराव्यायकृत् |**

**विपुलं च बिभर्ति कार्मुकं रोमव्याप्त तनुश्च मध्यमः || १७||**

पुरुष अर्थात् नरः, प्रगृहीतलेखनिः=ययाक्षराणि लिख्यन्ते सा लेखनिः श्यामो =श्यामवर्णः वस्त्रशिराः, कर्पटसंयमितमूर्द्धा केचिद् बद्धशिरा इति पटन्ति। संयमितशिराः। व्ययं= व्ययकृत् आयं प्रवेशं च करोति गणयति। विपुलं=विस्तीर्णं कार्मुकं=धनुर्बिभर्ति धारयति, रोमव्याप्ततनुः=रोमशरीरः एष मध्यमो द्वितीयद्रेष्काणः।एष नरद्रेष्काणः सायुधः सौरसक्ताश्च।

### ।। कन्या तृतीयस्य स्वरूपम् ।।

गौरी, सुधौतान्यग्राणि यस्मिन् दुकूले पटविशेषे तेन गुप्ताच्छादिता। केचित्तु दुकूलहस्ता इति पठन्ति। समुच्छ्रिता , कुम्भो, कठच्छुर्दवी प्रसिद्धा, गृहोपयोगिकं तत्कारे हस्ये यस्या। देवालयं स्त्री, प्रयता प्रवृत्ता गन्तुमुद्यता, वदन्ति मुनयः। कन्यान्त्यगतस्त्रिभागः तृतीयद्रेष्काणः। एष स्त्रीद्रेष्काणः शुक्रसक्ताश्च।

**गौरी सुधौताग्रदुकूलगुप्तासमुच्छ्रिता कुम्भकटच्छुहस्ता |**

**देवालयं स्त्री प्रयता प्रवृत्ता वदन्ति कन्यान्त्यगतस्त्रिभागः || १८||**

गौरी=गौरवर्णा, सुधौतान्यग्राणि यस्मिन् दुकूले पटविशेषे तेन गुप्ताच्छादिता। केचित्तु दुकूलहस्ता इति पठन्ति। समुच्छ्रिता=अत्युच्चा, कुम्भो=घटः, कठच्छुर्दवी=प्रसिद्धा, गृहोपयोगिकं=लोहभाण्डं तत्कारे हस्ये यस्या। देवालयं=सुरगृहं, स्त्री=युवतिः, प्रयता=समाहिता, प्रवृत्ता=गन्तुमुद्यता, वदन्ति कथयन्ति मुनयः। कन्यान्त्यगतस्त्रिभागः तृतीयद्रेष्काणः।एष स्त्रीद्रेष्काणः शुक्रसक्ताश्च।

### ।। तुलाद्यस्य स्वरूपम्।।

वीथ्यान्तरे मार्गमध्ये यदा पणं प्रसारकः समवस्थितः तत्र गतः। पुरुषो नरस्तुलावान् तुलाहस्तः विद्यमानतुलः उन्माने ऊर्ध्वमाने तुलादिके माने मानशब्देन कुडवादौ च तस्मिन् कुशलः तज्ज्ञः प्रतिमानं येन द्रव्याणि सुवर्णरत्नादीनि, परिच्छिद्यन्ते त्तु हस्ते यस्य भाण्डे क्रयद्रव्यं विचिन्तयति ध्यायति तस्य भाण्डस्यैतन्मूल्यमिति तस्य च भाण्डस्य च मूल्यं विचिन्तयति एतद्यवनास्तुलायाः प्रथमद्रेष्काणस्य रूपं वदन्ति कथयन्ति एष नरद्रेष्काणंः शुक्रसक्तश्च।

**वीथ्यन्तरापणगतः पुरुषस्तुलावानुन्मानमानकुशलः प्रतिमानहस्तः।**

**भाण्डं विचिन्तयति तस्य च मूल्यमेतद्रूपं वदन्ति यवनाः प्रथमं तुलायाः ।। १९।।**

वीथ्यान्तरे=मार्गमध्ये यदा पणं प्रसारकः समवस्थितः तत्र गतः। पुरुषो=नरस्तुलावान् तुलाहस्तः विद्यमानतुलः उन्माने= ऊर्ध्वमाने तुलादिके माने=मानशब्देन कुडवादौ च तस्मिन् कुशलः तज्ज्ञः प्रतिमानं येन द्रव्याणि =सुवर्णरत्नादीनि, परिच्छिद्यन्ते त्तु हस्ते यस्य भाण्डे क्रयद्रव्यं विचिन्तयति ध्यायति तस्य भाण्डस्यैतन्मूल्यमिति तस्य च भाण्डस्य च मूल्यं विचिन्तयति एतद्यवनास्तुलायाः प्रथमद्रेष्काणस्य रूपं वदन्ति कथयन्ति एष नरद्रेष्काणः शुक्रसक्तश्च।

**।। तुलाद्वितीयस्य स्वरूपम्।।**

गृध्रमुखो कलशं कुमभं गृहीत्वा विनिष्पातितं निर्विशेषं पतितुम् अबीप्सति वाञ्छति। यतः क्षुधितो बुभुक्षितः तृषितः पिपासितो अतः कलत्रं भार्या सुतान् पुत्रान् मनसा चित्तेनैति गच्छति। अभीप्सति अभिलषति स्मरती इत्यर्थः। इत्येवं प्रकारः तुलाधरमध्यगः तुलाद्वितीयद्रेष्काणः एष नरद्रेष्काणः खगद्रेष्काणः शनैश्चरसक्तश्च।

**कलशं परिगृह्यविनिष्पतितुं समभीप्सति गृध्रमुखः पुरुषः।**

**क्षुधितस्तृषितश्च कलत्रसुतान् मनसेति तुलाधरमध्यगतः ।। २०।।**

गृध्रः= पक्षी गृध्रमुखो=गृध्राननः कलशं =कुमभं गृहीत्वा विनिष्पातितं=निर्विशेषं पतितुम्=अभीप्सति वाञ्छति। यतः क्षुधितो =बुभुक्षितः तृषितः=पिपासितो अतः कलत्रं भार्या सुतान्=पुत्रान् मनसा चित्तेनैति गच्छति। अभीप्सति=अभिलषति स्मरती इत्यर्थः। इत्येवं प्रकारः तुलाधरमध्यगः=तुलाद्वितीयद्रेष्काणः एष नरद्रेष्काणः खगद्रेष्काणः शनैश्चरसक्तश्च।

**तुलातृतीयस्य स्वरूपम्।**

रत्नचित्रितो वनेऽरण्ये विभीषयन् भीषां कुर्वन् तिष्ठति, कीदृशः? काञ्चनं तूणशराधानं वर्म सन्नाहं ते च बिभर्त्ति। फलान्यमिषं च मांसं बिभर्ति नरो मनुष्यो वानररूपभृत् वानरस्यं कपेरिव रूपं बिभर्ति। फलान्याम्रादीनि। केचिद् धनुर्द्धरः किन्नररूपभृन्नर इति पठन्ति।

**विभीषयंस्तिष्ठति रत्नचित्रितो वने मृगान् काञ्चनतूणवर्मभृत् ।**

**फलामिषं वानररूपभृन् नरस्तुला वसाने यवनैरुदाहृतः ।। २१।।**

रत्नचित्रितो= मणिर्विभूषितः वनेऽरण्ये= मृगान्हरिणान्, विभीषयन् =भीषां कुर्वन् तिष्ठति, कीदृशः ? काञ्चनं =सौवर्णं तूण=शराधानं वर्म सन्नाहं ते च बिभर्त्ति=धारयति। फलान्यमिषं च मांसं बिभर्ति नरो=मनुष्यो वानररूपभृत् = कपेरिव रूपं बिभर्ति=धारयति। फलान्याम्रादीनि। केचिद् धनुर्द्धरः किन्नररूपभृन्नर इति पठन्ति।

---

**।। वृश्चिकप्रथमस्य स्वरूपम्।।**

स्त्री वस्त्रैः आभरणैः च विहीना महासागरात् समुपैति। स्थानच्युतात् भ्रष्टा सर्पनिबद्धपादा, मुजगनियमितचरणा, मनोरमा चित्तानन्दविधायिनी, वृश्चिकराशेः प्रथमद्रेष्काणः, एष स्त्रीद्रेष्काणो व्याल द्रेष्काणो भौमसक्ताश्च।

**वस्त्रैर्विहीनाभरणैश्च नारी महा समुद्रात् समुपैति कूलम्।**

**स्थानच्युतासर्पनिबद्धपादा मनोरमा वृश्चिकराशिपूर्वः ।। २२।।**

स्त्री वस्त्रैः आभरणैः च विहीना महासागरात् समुपैति। स्थानच्युतात् भ्रष्टा सर्पनिबद्धपादा,मुजगनियमितचरणा, मनोरमा चित्तानन्दविधायिनी, वृश्चिकराशेः प्रथमद्रेष्काणः, एष स्त्रीद्रेष्काणो व्याल द्रेष्काणो भौमसक्ताश्च।

---

**।। वृश्चिकद्वितीयस्य स्वरूपम्।।**

नारी स्थानसुखानि अभिवाञ्छति भर्तृकृते पतिनिमित्तं भुजगावृतदेहा सर्पव्याप्तशरीरि कच्छपः कुम्भो तत्समानशरीरा। वृश्चिकमध्यरूपं द्वितीयद्रेष्काणम् उशन्ति। एष स्त्री द्रेष्काणो व्यालद्रेष्काणो जीवासक्ताश्च।

**स्थानसुखान्यभिवाञ्छति नारी भत्रृतु कृते भुजगावृतदेहा|**

**कच्छपकुम्भसमानशरीरावृश्चिकमध्यमरूपमुशन्ति || २३||**

---

पृथुलं चिपिटं कच्छपसदृशं वक्रं यस्य, श्वा सारमेयः मृगो हरिणः, श्रृगालः  वराहः , एषां भयकारी, मलनस्य चन्दनस्य प्रदेशम् उत्पत्ति स्थानं भवति। रक्षति स च मृगपतिःसिंहः अन्त्यगतो द्रेष्काणः। एष कूर्माननो सिंहद्रेष्काणः चतुष्पदद्रेष्काणः चन्द्रसक्तश्च।

**पृथुलचिपिटकूर्मतुल्यवक्रः श्वमृगवराहसृगालभीषकारी |**

**अवति च मलयाकरप्रदेशं मृगपतिरन्त्यगतस्य वृश्चिकस्य || २४||**

पृथुलं चिपिटं =चर्पटं कच्छपसदृशं =वक्रं यस्य, श्वा= सारमेयः, मृगो =हरिणः, श्रृगालः= वराहः , एषां भयकारी, मलनस्य चन्दनस्य प्रदेशम् उत्पत्ति स्थानं भवति। रक्षति स च मृगपतिःसिंहः अन्त्यगतो द्रेष्काणः। एष कूर्माननो सिंहद्रेष्काणः चतुष्पदद्रेष्काणः चन्द्रसक्तश्च।

---

मनुष्यवक्रो अश्वसमानकायः, आयतं दीर्घधनुश्चापं गृहीत्वा आश्रमस्थः तत्राश्रमे तिष्ठति। क्रतूपयोज्यानि यज्ञोपकरणादिनी यज्ञभाण्डानि स्त्रुक्स्रुवादीनि तपस्विनः ररक्ष। आद्यः प्रथमो द्रेष्काणो धन्विनः। एषः अश्वसमानकायः। चतुष्पादः सायुधद्रेष्काणः नरद्रेष्काणः जीवसक्ताश्च।

**मनुष्यवक्रोऽश्व समानकायो धनुर्विगृह्यायतमाश्रमस्थः |**

**क्रतूपयोज्यानि तपस्विनश्चररक्षाद्यो धनुषस्त्रिभागः || २५||**

मनुष्यवक्रो=नरवदनः, अश्वसमानकायः= तुरगसदृशदेहः, आयतं= दीर्घधनुश्चापं गृहीत्वा आश्रमस्थः तत्राश्रमे तिष्ठति। क्रतूपयोज्यानि= यज्ञोपकरणादिनी यज्ञभाण्डानि, स्त्रुक्स्रुवादीनि तपस्विनः ररक्ष। आद्यः प्रथमो द्रेष्काणो धन्विनः। एषः अश्वसमानकायः। चतुष्पादः सायुधद्रेष्काणः नरद्रेष्काणः जीवसक्ताश्च।

---

**।। धन्विद्वितीयस्य स्वरूपम्।।**

मनोरमाचम्पकं, हेमसुवर्णं तत्समकान्तिः भद्रासने तिष्ठति। मध्यरूपा न च अतिशोभना समुद्ररत्नानि विघट्टयन्ती स्त्री तिष्ठति। धनुषो मध्यत्रिभागो द्वितीयद्रेष्काणो मुनिभिः प्रदिष्टः उक्तः। एष स्त्रीद्रेष्काणो भौमसक्ताश्च।

**मनोरमाचम्पकहेमवर्णा भद्रासने तिष्ठति मध्यरूपा ।**

**समुद्ररत्नानि विघट्टयन्ती मध्यत्रिभागो धनुषः प्रदिष्टः ।। २६।।**

मनोरमा=चित्ताह्लादकारिणी,चम्पकं=पुष्पविशेषः, हेम=सुवर्णं, तत्सदृशवर्णा तत्समकान्तिः भद्रासने तिष्ठति। मध्यरूपा न च अतिशोभना समुद्ररत्नानि विघट्टयन्ती स्त्री तिष्ठति। धनुषो मध्यत्रिभागो=द्वितीयद्रेष्काणो मुनिभिः प्रदिष्टः उक्तः। एष स्त्रीद्रेष्काणो भौमसक्ताश्च।

**।। धन्वितृतीयस्य स्वरूपम्।।**

नरो सुवर्णं चम्पकः पुष्पविशेषः तदाभः, तत्समानद्युतिः, वरासने प्रधानासने निषण्णः, उपविष्टः दण्डहस्तः कौशेयकानि उद्वहते। अजिनं नवमस्य राशेः तृतीयद्रेष्काणस्य स्वरूपं भवति।एष नरद्रेष्काणः सायुधः अर्कसक्ताश्च।

**कूर्ची नरो हाटक चम्पकाभो वरासने दण्डधरो निषण्णः ।**
**कौशेयकान्युद्वहते अजिनं च तृतीयरूपं नवमस्यराशेः ।। २७।।**

नरो=कूर्ची हाटकं=सुवर्णं चम्पकः=पुष्पविशेषः तदाभः तत्सदृशकान्तिः= तत्समानद्युतिः, वरासने प्रधानासने= निषण्णः, उपविष्टः=दण्डहस्तः कौशेयकानि उद्वहते। अजिनं नवमस्य राशेः तृतीयद्रेष्काणस्य स्वरूपं भवति।एष नरद्रेष्काणः सायुधः अर्कसक्ताश्च।

---

**मकरप्रथमस्य स्वरूपम्।**

रोमचितो, मकरोपमदंष्ट्रः, सूकरस्य कायः, योक्त्रकं येन बलीवर्दा योज्यन्ते, जालकः प्रसिद्धः, येन पक्षिणो बध्यन्ते, एतानि निगडादीनि धारयति। रौद्रमुखो वक्रिताननः, मकरप्रथमः, प्रथमद्रेष्काणः। एष पुरुषद्रेष्काणः बन्धनधारित्वात्सनिगडः सूकरसमानशरीरः न सूकरः तस्मान्न चतुष्पात् शनैश्चरसक्तश्च।

**रोमचितो मकरोपमदंष्ट्रः सूकरकायसमानशरीरः ।योक्त्रकजालक बन्धनधारीरौद्रमुखो मकरप्रथमस्तु ।। २८।।**

रोमचितो=रोमशः, मकरोपमदंष्ट्रः, सूकरस्य कायः, योक्त्रकं येन बलीवर्दा योज्यन्ते, जालकः प्रसिद्धः, येन पक्षिणो बध्यन्ते, एतानि निगडादीनि धारयति। रौद्रमुखो=वक्रिताननः, मकरप्रथमः=प्रथमद्रेष्काणः। एष पुरुषद्रेष्काणः= बन्धनधारित्वात्सनिगडः सूकरसमानशरीरः न सूकरः तस्मान्न चतुष्पात् शनैश्चरसक्तश्च।

---

**।। मकरद्वितीयस्य स्वरूपम्।।**

कलास्वभिज्ञा आभिमुख्येन जानाति, अब्जदलायताक्षि श्यामवर्णा विचित्राणि च मार्गमाणा विभूषणैः अलङ्कृता लोहकर्णा स योषा स्त्री मकरस्य मध्ये द्वितीयद्रेष्काणे प्रदिष्टा उक्ता। एषः स्त्रीद्रेष्काणः शुक्रसक्ताश्च।

**कलास्वभिज्ञाब्जदलायताक्षी श्यामाविचित्राणि च मार्गमाणा।**

**विभूषणालंकृतलोहकर्णा योषा प्रदिष्टा मकरस्य मध्ये।२९।**

कलास्वभिज्ञा= आभिमुख्येन जानाति, अब्जदलायताक्षि=श्यामवर्णा विचित्राणि च मार्गमाणा विभूषणैः अलङ्कृता लोहकर्णा स योषा=स्त्री मकरस्य मध्ये द्वितीयद्रेष्काणे प्रदिष्टा उक्ता। एषः स्त्रीद्रेष्काणः शुक्रसक्ताश्च।

**।। मकरतृतीयस्य स्वरूपम्।।**

किन्नरोपमतनुः किन्नरा देवयोनयः, अश्वमुखाः पुरषाः तत्सदृशी तनुः सकम्बलः, तूणं चापं कवचं सन्नाहः, एतैः तूणचापकवचैः समन्वितो कुम्भ घटं रत्नचित्रितं मणिविरचितं स्कन्धगमं सासक्तम् उद्वहति। मकरराशेः पश्चिमतृतीय - द्रेष्काणः, एष पुरुषद्रेष्काणः, सायुधः बुधसक्तश्च।

**किन्नरोपमतनुः स कम्बलस्तूणचापकवचैः समन्वितः ।कुम्भमुद्वहति रत्नचित्रितं स्कन्धगं मकरराशि पश्चिमः।३०।**

किन्नरोपमतनुः= किन्नरा देवयोनयः, अश्वमुखाः पुरषाः तत्सदृशी तनुः सकम्बलः, तूणं=चापम्, कवचं सन्नाहः, एतैः तूणचापकवचैः समन्वितो कुम्भ=घटं रत्नचित्रितं= मणिविरचितं, स्कन्धगमं=सासक्तम् उद्वहति। मकरराशेः पश्चिमतृतीयद्रेष्काणः, एष पुरुषद्रेष्काणः, सायुधः बुधसक्तश्च।

---

**।। कुम्भप्रथमद्रेष्काणस्य स्वरूपम्।।**

स्नेह मद्यं जलम् भोजनम् एतेषां य आगमः तेन व्याकुलितं मनः चित्तं यस्य। सकम्बलः, कोषकारेवसनः पट्टवासाः कृष्णमृगचर्मयुक्तः गृध्रः पक्षी तत्तुल्यवदनः घटादिगः एष नरद्रेष्काणः खगश्च ।

**स्नेह मद्यजलभोजनागमव्याकुलीकृतमनाः सकम्बलः।**

**कोश कार वसनोऽजिनान्वितो गृध्रतुल्यवदनो घटादिगः।। ३१।।**

स्नेहः=तैलादि मद्यं=पानविशेषः जलम् =उदकं, भोजनम्=अशनम् एतेषां य आगमः तेन व्याकुलितं मनः चित्तं यस्य। सकम्बलः=कम्बलसहितः, कोषकारेवसनः=पट्टवासाः अजिनान्वितः कृष्णमृगचर्मयुक्तः= गृध्रः पक्षी तत्तुल्यवदनः= घटादिगः एष नरद्रेष्काणः खगश्च ।

---

**कुम्भद्वितीयद्रेष्काणस्य स्वरूपम्।**

शकटे गन्नायां दग्धे अग्निना भस्मीकृते सशाल्मले शाल्मलवृक्षैः, सहिते अङ्गना स्त्री लोहान्याहरते गृह्णाति, वने अरण्ये मलिनेन पटेन समलेन वाससा संवृता भाण्डैः भाण्डप्रकारैः मूर्ध्नि गतैः मस्तकारोपितैः उपलक्षिता। केचिद् भाण्डैः आरोपितैः परिपूर्ण इति पठन्ति। मध्यमो द्वितीयद्रेष्काणः। एष स्त्रीद्रेष्काणःसाग्निको बुधसक्तश्च।

**दग्धे शकटे स शाल्मले लोहान्याहरते अङ्गना वने।**

**मलिनेन पटेन संव्न्ता भाण्डैर्मूर्ध्नि गतैश्च मध्यमः ।। ३२।।**

शकटे=गन्नायां दग्धे=अग्निना भस्मीकृते=सशाल्मले शाल्मलवृक्षैः, सहिते अङ्गना= स्त्री लोहान्याहरते गृह्णाति, वने=अरण्ये मलिनेन पटेन =समलेन वाससा=संवृता भाण्डैः=भाण्डप्रकारैः मूर्ध्नि गतैः =मस्तकारोपितैः उपलक्षिता। केचिद् भाण्डैः आरोपितैः परिपूर्ण इति पठन्ति। मध्यमो द्वितीयद्रेष्काणः। एष स्त्रीद्रेष्काणःसाग्निको बुधसक्तश्च।

---

**कुम्भतृतीयस्वरूपम्।**

श्याम , सरोमश्रवणः किरीटि, त्वक् निर्यासः वृक्षनिर्यासः, यथा गुग्गुलु स्नेहः फलं च सुप्रसिद्धमेवाम्नादि एतैः सह भाण्डानि लौहव्यतिमिश्रितानि बिभर्ति तानि च संचारयति । घटस्य तृतीयद्रेष्कणः। एष नरद्रेष्काणः।

**श्यामः सरोम श्रवणः किरीटी त्वक् पत्र निर्यास फलैर्बिभर्ति ।**

**भाण्डानि लोह व्यतिमिश्रितानि सञ्चारयन्त्यन्त गतो घटस्य ।। ३३।।**

श्यामवर्णःसरोमश्रवणः=लोमशकर्णः किरीटि=कौलियुक्तः, त्वक् पत्रं निर्यासः=वृक्षनिर्यासः, यथा गुग्गुलुस्नेहः फलं च सुप्रसिद्धमेवाम्रादि एतैः सह भाण्डानि लौहव्यतिमिश्रितानि=लोहसंयुक्तानि बिभर्ति=धारयति तानि च संचारयति । घटस्य तृतीयद्रेष्कणः। एष नरद्रेष्काणः।

---

**स्रुग्भाण्डमुक्तामणि शङ्खमिश्रैर्व्याक्षिप्तहस्तः सविभूषणश्च ।**

**भार्या विभूषार्थम् अपां निधानं नावा प्लवत्यादि गतो झषस्य ।। ३४।।**

स्रुग्भाण्डानि यज्ञोपपकरणभाण्डानि मुक्ता मौक्तिकं मणयः प्रसिद्धाः शंखः एतैः मिश्रैः एकोकृतैः व्याक्षिप्तो हस्तो यस्य आकुलकरःसविभूषणः भार्या तद्विभूषणार्थं समुद्रे नौस्थो गच्छति।

---

**मीनप्रथमद्रेष्काणस्य स्वरूपम्।**

अत्युच्छ्रिता यस्मिन् उपेते आरोहति। जलधेः समुद्रस्य कूलं प्रयाति। प्रमदा स्त्री, कीदृशी ?परिवारयुक्ता। चम्पकं पुष्पविशेषः मुखवर्णेन चम्पककान्ति मुष्णातीत्यर्थः, एष मीनस्य द्वितीयविभागे मुनिभिर्गदितः उक्तः। एष स्त्रीद्रेष्काणश्चन्द्रसक्ताश्च।

**अत्युच्छ्रितध्वजपताकमुपैति पोतम्।कूलं प्रयाति जलधेः परिवारयुक्ता ।**

**वर्णेन चम्पकमुखी प्रमदा त्रिभागो ।मीनस्य चैष कथितो मुनिभिर्द्वितीयः।। ३५।।**

अत्युच्छ्रिता =पताका यस्मिन् उपेते=तमुपैति आरोहति। जलधेः= समुद्रस्य कूलं प्रयाति। प्रमदा= स्त्री, कीदृशी ?परिवारयुक्ता।चम्पकं=पुष्पविशेषः, मुखवर्णेन=चम्पककान्ति मुष्णातीत्यर्थः, एष मीनस्य द्वितीयविभागे मुनिभिर्गदितः उक्तः। एष स्त्रीद्रेष्काणश्चन्द्रसक्ताश्च।

---

**मीनतृतीयद्रेष्काणस्य स्वरूपम्।**

श्वभ्रान्तिके=सर्पवेष्टिताङ्गो वस्त्रैः विहीना पुरुषः अरण्याम् चोरैः अनलैः व्याकुलितः क्षुभितो अन्तरात्मा यस्या विक्रोशते। झषस्य अन्त्योपगतः द्रेष्काणः। एष व्यालद्रेष्काणो भौमसक्तश्च। द्रेष्काणस्वरूपस्य प्रयोजनं प्रदेशेषु व्याख्यातम्।तथा च यात्रायां वक्ष्यति, "द्रेष्काणाकारचेष्टां गुणसदृशफलं योजयेद्। वृद्धिहेतोः द्रेष्काणे सौम्यरूपे कुसुमफलयुते रत्नभाण्डान्विते च। सौम्यर्दृष्टे जयः स्यात् प्रहरणसदृशे पापदृष्टे च भङ्गः सम्मोहो वाथ बन्धः सभुजगानिगडे पापयुक्ते पिपासुः।" अन्यच्चास्य प्रयोजनं चौररूपस्थानदिसंज्ञानाम्। उक्तं च षट्पञ्चशिकायां पृथुयशसा – "अंशकात् ज्ञायते द्रव्यं द्रेष्काणैः तस्कराः स्मृताः। राशिभ्यः कालदिग्देशो वयो ज्ञातिश्च लग्नपात्।" एवं वृतानि।

**श्वभ्रान्तिके सर्प निवेष्टिताङ्गा वस्त्रैर्विहीनः पुरुषस्त्वटव्याम् |**

**चौरानलव्याकुलितान्तरात्मा विक्रोशते अन्त्योपगतो झषस्य || ३६||**

**अवबोधप्रश्नः**

3. **मीनस्य अन्तिम द्रेष्काणस्य स्वरूपं लिखत।**

**उत्तराणि-**

1. कट्यां सितं अम्बरं वेष्टितं येन। कृष्णः, शक्त इव अभिमुख्येन रक्षां कर्तुं शक्तः समर्थः इव। रौद्रो भीषणः यः परशुं समुद्यतं धत्ते । रक्त विलोचनो स च पुमान् पुरुषः एव पुरुषद्रेष्काणः सायुधो भौमासक्तश्च।

2. स्त्री योषिन्मूर्धनि शिरसि पद्मैः कमलैः अर्चिता पूजिता। भोगियुक्ता ससर्पा कर्कशा कठिनयौवनोपेता, अरण्यगता एकान्तस्थिता, विरौति आक्रोशति। पलाशवृक्षस्य साखां लतां समाश्रिता तत्रासक्ता स्थिता। कर्कटस्य राशेः मध्ये स्थिता द्वितीयद्रेष्काणे समवस्थिता।

3. सर्पवेष्टिताङ्गो वस्त्रैः विहीना पुरुषः अरण्याम् चोरैः अनलैः व्याकुलितः क्षुभितो अन्तरात्मा यस्या विक्रोशते।

## उपसंहाराध्यायः

**उद्देश्यम्-**

- ☞ अध्यायसङ्ग्रहम्।
- ☞ शेषाध्यायसङ्ग्रहम्।
- ☞ यात्रायां निबद्धं शेषाध्यायसङ्ग्रहम्।
- ☞ शेषाध्यायस्य सङ्ग्रहम्।
- ☞ शेषवस्तुसङ्ग्रहम्।
- ☞ कालविशेषेण कुकृताल्पकृतयोः च पुनः करणे सतां प्रार्थनम्।
- ☞ स्वविचारकथनम्।
- ☞ प्रणामपूर्वकाणि शास्त्राणि प्रणामान्तानि।

---

राशिप्रभेदः प्रथमोऽध्यायः, ग्रहयोनिभेदः द्वितीयः, वियोनिजन्म तृतीयः अथ शब्दो आनन्तर्ये, निषेककालः चतुर्थः, जन्मविधिः पञ्चमः, अथ सद्योमरणम् अरिष्टाध्यायः षष्ठः, आयुर्विभागः सप्तमः, दशाविभागः अष्टमः, अष्टकवर्गसंज्ञः नवमः।

**राशिप्रभेदो ग्रहयोनिभेदो वियोनिजन्माथनिषेककालः ।**

**जन्माथ सद्यो मरणं तथायुर्दशा विपाकोऽष्टकवर्गसंज्ञः ।। १।।**

**अवबोधप्रश्नः**

1. **आयुर्दायाध्यायः कतमः भवति?**

कर्माजीवो दशमः राजयोगाध्याय एकादशः खयोगाः नाभसयोगाध्यायः द्वादश, चान्द्रयोगाः सुनफाद्याः चान्द्रयोगाः त्रयोदशः, द्विग्रह त्रिग्रहयोगाध्यायः चतुर्दशः, प्रवृज्ययोगाध्यायः पञ्चदशः,अथ राशिशीलाध्यायः षोडशः। दृष्टिफलाध्यायः सप्तदशः। तस्मात् परोभावाध्यायः अष्टादशः। अथात परमाश्रयाध्यायः एकोनविंशतितमः। प्रकीर्णाध्यायो विंशः।

**कर्माजीवो राजयोगाः खयोगाश्चान्द्रा योगाद्विग्रहाद्याश्च योगाः।**

**प्रव्रजाथो राशिशीलानि दृिष्टर्भावस्तस्मादाश्रयोऽथ प्रकीर्णः ।२।**

**अवबोधप्रश्नः**

2. आजीविका विचारः कस्मिन् अध्याये वर्तते?

---

**नेष्टायोगा जातकं कामिनीनां निर्याणं स्यान्नेष्टजन्मदृकाणः।**

**अध्यायानां विंशतिः पञ्चयुक्ता जन्मन्येतद्यात्रिकं चाभिधास्ये।। ३।।**

अनिष्टयोगाध्यायः एकविंशतिः, स्त्रीजातकाध्यायो द्वाविंशतिः, मरणज्ञानाध्यायः त्रयोविंशतिः, नष्टजातकाध्यायः चतुर्विंशतिः, द्रेष्काणस्वरूपाध्यायः पञ्चविंशतिः, एवं पञ्चयुक्ताध्यायानां विंशतिः, जन्मनि जातके उक्ता कथितोक्ता एतत् जातके।

**अवबोधप्रश्नः**

3. **पञ्चविंशतितमः अध्यायः क ?**

---

**प्रश्नास्तिथिर्भं दिवसः क्षणश्च चन्द्रो विलग्नं त्वथ लग्न भेदः।**

**शुद्धिर्ग्रहाणामथचापवादो विमिश्रकाख्यं तनु वेपनं च ।। ४।।**

प्रश्नाः प्रश्नभेदाध्यायः तिथिः तिथिबलाध्यायः, भं नक्षत्राभिधानं, दिवसो दिवसाभिधानं वारफललक्षणं क्षणो मुहूर्तनिर्देशः, चन्द्रः चन्द्रबलाध्यायः, लग्नं च लग्नविनिश्चयः, अनन्तरं लग्नभेदो होराद्रेष्काणनवांशकद्वादशभागत्रिंशद् भागानां,सफलं ग्रहाणां शुद्धिः सफला समस्तग्रहाणां कुण्डलिकाफलम्। अथान्तरम् अपवादाध्ययः विमिश्रकाख्यं विमिश्रकाध्ययः तनुवेपनं देहस्पन्दनम्।

---

**अतः परं गुह्यकपूजनं स्यात् स्वप्नं ततः स्नानविधिः प्रदिष्टः।**

**यज्ञो ग्रहाणाम् अथ निर्गमश्च क्रमाच्च दिष्टः शकुनोपदेशः ।। ५।।**

अतोऽस्मात् परं गुह्यकपूजनं स्याद् भवेत्, स्वप्नं स्वप्नाध्यायः ततो अनन्तरं स्नानविधिः प्रदिष्टः उक्तः, ग्रहाणां यज्ञो ग्रहयज्ञः, अथानन्तर निर्गमः प्रास्थानिकं  क्रमात् परिपाट्य दष्टि उक्तः शकुनोपदेशः। शकुनरूतज्ञानम्। एष यात्रायां सङ्ग्रहः।

**विवाहकालः करणं ग्रहाणां प्रोक्तं पृथक् तद्विपुलाथ शाखा।**

**स्कन्धैस्त्रिभिर्ज्योतिषसंग्रहोऽयं मया कृतो दैव विदां हिताय ।। ६।।**

विवाहकालो विवाहपटलं ग्रहाणां करणं पञ्चसिद्धान्तिकायां प्रोक्तंकथितं पृथग् विभज्य तद्विपुला, तस्य कारणस्य शुभाशुभज्ञानाय विपुला विस्तीर्णा शाखा कथिता। त्रिभिः स्कन्धैः एतैः गुणित होरा संहिताख्यैरयं ज्योतिः शास्त्रसङ्ग्रहो मया वराहमिहिराचर्येण दैवविदां सांवत्सरिकाणां हितार्थं कृतो विरचितः। विस्तीर्णशास्त्राण्यालोच्य संक्षेपतो मया कृतः।

**पृथु विरचितम् अन्यैः शास्त्रम् एतत् समस्तं तदनु लघु मयेदं तत् प्रदेशार्थम् एव ।**

**कृतमिह हि समर्थं धीविषाणामत्वे ममयदि हयदुक्तं सज्जनैः क्षम्यतां तत्।७।।**

एतत् समस्तं सकलशास्त्रमन्यैःआचार्यैः यवनेश्वरादिभिः पृथु कथितं तदनुशोभनम् अन्तर मया तत्प्रदेशार्थं तदुपदिष्टार्थं लघु स्वल्पं कृतं तत्प्रदेशेऽपि योऽर्थः सोऽस्मिंस्तात्पर्यार्थः। हि यस्माद् अर्थे इहास्मिन् शास्त्रे कृतं धीविषाणामलत्वे बुद्धिश्शृङ्गनिर्मलीकरणविषये समर्थम् उक्तम् एतत् कृतम्। मयाचेह सङ्ग्रहे यदुक्तम् अशोभनं युक्तं कथितं तत्सज्जनैः पण्डितैः मम क्षम्यतां क्षन्तव्यम् इत्यर्थः।

**ग्रन्थस्यया प्रचरतोऽस्य विनाशमेति केख्व्यात् बहुश्रितमुखाधिगमक्रमेण ।**

**यद् वा मया कुकृतम् अल्पमिहाकृतं वा कार्यं तदत्र विदुषा परिहृत्यरागम् ।। ८।।**

अस्य ग्रन्थस्य यत्प्रचरतो विचारमाणस्य यद्विनाशमेति याति लेख्याल्लेखकदोषात् तत् बहुश्रितमुखाधिगमक्रमेण बहुश्रुतानां पण्डितानां मुखाद् अधिगम्य ज्ञात्वा क्रमेण परिपाट्य विदुषा पण्डितेन रागं मात्सर्यमपहृत्य विहाय कर्तव्यम्। ते च शास्त्रार्थापेक्षया संस्कारेण समर्थाः। यद्वा मया कुकृतं कुत्सित कृतं तथाऽल्पमपरिपूर्णं तद्विचार्य विचारेण कर्तव्यम् इत्यर्थः।

**आदित्यदासतनयस्तदवाप्तबोधः कापित्थके सवितृलब्धवरप्रसादः।**

**आवन्तिको मुनिमतान्यवलोक्यसम्यग्घोरां वराहमिहिरो रुचिरां चकार ।। ९।।**

आदित्यदासाख्यो ब्राह्मणः तस्य तनयः पुत्रः तस्माद् एव पितुः आदित्यदासाद् अवाप्तः बोधः ज्ञानं येन। कापित्थाख्ये ग्रामे योऽसौ भगवान् सविता सूर्य तस्मात् लब्धः प्राप्तो वरप्रसादो येन। आवन्तिकः आवन्तिके देशे उज्जयिन्यां वास्तव्यः । कोऽसौ वराहमिहिरः। अयं मुनिमतानि ऋषिप्रणीतानि शास्त्राण्यवलोक्य विचार्य सम्यग् यथावस्तु कृत्वा होरा जातकशास्त्रं रुचिरां शोभनां सुगमां चकार कृतवान् इति।

**अवबोधप्रश्नः**

4. **आचार्याणां परिचयं कुरुत।**

**दिनकरमुनि गुरुचरणप्रणिपातकृतप्रसादमतिनेदम्।**

**शास्त्रमुपसंगृहीतं नमोऽस्तु पूर्वप्रनेतृभ्यः ।। १०।।**

दिनकरो अर्कः तदादिकाः सर्व एव ग्रहाः मुनयो वसिष्ठाद्याः गुरुः आदित्य दासः तेषां चरणप्रणिपातेन पादनमस्कारकारणेन कृतो यः प्रसादो अनुकम्पो तेन अनुनयेन मतिः यस्य तेन दिनकरमुनिचरणप्रणिपातकृत-प्रसादमतिना- मयेदं शास्त्रमुपसङ्गृहीतं स्वीकृतमस्ति। तस्मात् पूर्वप्रणेतृभ्यः पूर्वशास्त्रकारेभ्यो नमोऽस्तु नमस्करणेन यः कृतप्रसादः नाम इति भद्रम्।

**अवबोधप्रश्नः**

1. आयुर्विभागः सप्तमः।
2. कर्माजीवो दशमः।
3. द्रेष्काणस्वरूपाध्यायः
4. आदित्यदासाख्यो ब्राह्मणः तस्य तनयः पुत्रः तस्माद् एव पितुः आदित्यदासाद् अवाप्तः बोधः ज्ञानं येन। कापित्थाख्ये ग्रामे योऽसौ भगवान् सविता सूर्य तस्मात् लब्धः प्राप्तो वरप्रसादो येन। आवन्तिकः आवन्तिके देशे उज्जयिन्यां वास्तव्यः ।